Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीरामकीर्तिमहाकाव्यम्

(थाइरामकथामाश्रित्य प्रणीतमभिनवं संस्कृतमहाकाव्यम्)

प्रणेता

सत्यव्रतशास्त्री

दिल्लीविश्वविद्यालयसंस्कृतविभागाचार्यः
सम्प्रति थाइदेशस्थबैंकाकनगरे शिल्पाकरविश्वविद्यालये
प्राच्यभाषाविभागेऽभ्यागताचार्यः
पुरीस्थश्रीजगन्नाथसंस्कृतविश्वविद्यालयप्राक्तनकुलपतिः

प्राक्कथनलेखिका
देवरत्नराजसुता महाचक्री
सिरिन्थौर्न्
थाइदेशमहाराजकुमारी

मूलामल सचदेव प्रतिष्ठानम्
अमरनाथ सचदेव प्रतिष्ठानम्
बैंकाक

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

आत्मनिवेदनम्

प्रायशो मम सर्वासामपि कृतीनां प्रारम्भे कश्चनानितरसाधारण एव हेतुः। इदं महाकाव्यमपि न तदपवादः। संस्कृतज्ञान् स्वसुहृदोऽहं संस्कृतेनैव पत्राणि प्रहिणोमि, विशेषतस्तु तान् ये संस्कृतेन व्यवहरन्ति, संस्कृतेनैव वा स्वकृतीर्विरचयन्ति। तेषु पत्रेषु कुशलवृत्तादिकमतिरिच्य बहूनन्यानपि विषयांश्चर्चयामि। तेषु केचिच्छास्त्रचर्चापराः, केचित्तत्तद्वस्तुनिरूपणपराः, केचिद्वा यात्रावृत्तान्तपराः। अस्मिन्नेव क्रमे स्वकीयान् शिष्यप्रवरान् सहयोगिनश्च डा० कृष्णलालमहाभागान् बैङ्काकनगरात् पत्रमेकं प्रैरिरम्। मासो ममासीद् अत्रागतवतः। तस्मिन् पत्रे बैंकाकनगरस्य कृते थाइभाषायां देवस्थानार्थकस्य क्रुङ्थेवशब्दस्य प्रयोगः साम्प्रतिकेन चक्रिराजवंशस्य संस्थापकेन चास्य पुरस्य सन्निवेश इति चर्चितम्। स एव च महाराजो रामकीर्त्यभिधानां रामगाथामपि स्वभाषया जगाविति च निर्दिष्टम्। अपराभ्यां तदुत्तरवर्तिभ्यां राजप्रवराभ्यामप्येतद्विषये प्रवृत्तमिति चोक्तम्। ततः परं द्वे अन्ये अपि पत्रे मया डा० कृष्णलालमहाभागान् प्रेरिते यत्र रामकीर्तेः केचन प्रसङ्गा उपवर्णिताः। अयमेव प्रारम्भोऽस्य काव्यस्य। वर्षधारेव पद्यधाराऽत्र स्वयमेव प्रवृत्ता। नात्रान्यः प्रयोजको हेतुर्ऋतेऽन्तःप्रेरणायाः। न मया पद्यपरिष्कारादौ बहु प्रयत्तं न वा तेषां प्रतिलिपीकरणे। न स्तो मयि कालः शक्तिश्च। जरां मयि प्रविशन्तीमिवानुभवामि। यावन्न तयाभिभूये तावदपूर्णाः स्वकृतीः सद्यः प्रारब्धा वा पूर्णतां नेतुमिच्छामि। अत एव च कालक्षेपं परिजिहीर्षामि। तदर्थमेव च प्रतिलिपिकरणादिकं कालसव्यपेक्षं कृत्यजातं परिहायोपयुक्ततरं कार्यान्तरं चिकीर्षामि, तत्रैव चात्मानं व्यापारयितुमिच्छामि।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मूलामल सचदेव प्रतिष्ठानम्
अमरनाथ सचदेव प्रतिष्ठानम्

प्रथमं संस्करणम्
अप्रैल, 1990

सर्वेऽधिकाराः काव्यकृता स्वायत्तीकृताः

मूलसंस्कृतभागाक्षरयोजकाः-
अनुराग एण्टरप्राइज़िज़,
ई-227, फ्लैटिड फैक्ट्री कम्पलैक्स, ओखला, नई दिल्ली-110 020

आङ्गलथाइभाषाक्षरयोजका मुद्रकाश्च-
अमरिन प्रिण्टिंग ग्रुप कं॰ लि॰,
413/27-36, अमरिन रोड, बैंकाक नॉय,
बैंकाक-107 00

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ŚRĪRĀMAKĪRTIMAHĀKĀVYAM

(A Sanskrit Mahākāvya on the Thai Ramakien)

Satya Vrat Shastri

Pandit Manmohan Nath Dar Professor of Sanskrit
University of Delhi
Ex-Vice-Chancellor
Shri Jagannath Sanskrit University, Puri (Orissa)
Presently on deputation with
Department of Oriental Languages
Faculty of Archaeology
Silpakorn University, Bangkok

Foreword by

Her Royal Highness Mahachakri
Sirindhorn
Princess of Thailand

Moolamall Sachdev Foundation
Amarnath Sachdeva Foundation
Bangkok

(5)

CC-0. Prof. Satya Vrat Shastri Collection.

(5) V

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri



FOREWORD

It is my pleasure to introduce to the readers the *Śrīrāmakīrti-mahākāvyam*, an epic poem in Sanskrit by Professor Satya Vrat Shastri. This is a voluminous work of twenty-five cantos dealing with the Thai *Ramakien*, the Rāma story in Thailand. Professor Satya Vrat has a strong compassionate love for Thailand. This love prompted him to write a poem about the country entitled *Thaideśavilāsam* in 1979. This love again has inspired him to compose another poem, a *Mahākāvya* now, on the Thai *Ramakien*.

Here in this book Professor Satya Vrat descibes the *Ramakien* in Sanskrit so that the story as told in the Thai version can be appreciated by millions of scholars in India and other countries. It is certain that his work will be a great contribution to the treasury of Sanskrit literature which has an unbroken history of thousands of years.

In Thailand the *Ramakien* is expressed in diverse forms, may it be literature or the performing or the visual arts. The story must have become popular in Thailand at least as early as the Sukhothai Period (about 700 years ago), for the names of various places in the story such as Rāma Cave and Sītā Cave are found mentioned in some ancient inscriptions. In the Ayudhya Period (A.D. 1350-1767) there could have been several works written on the *Ramakien* in poetic form, but unfortunately only a small vestige is left from that period as is evidenced by references in certain contemporary books. Thereafter King Taksin of Thonburi (1767-1782) wrote a poem on some parts of it which is still widely read to this day.

At the beginning of the Rattanakosin era, King Rama I, the first king of the present dynasty (reigning between 1782-1809), compiled the most complete and comprehensive account of the *Ramakien* in poetic form. King Rama II (reigning between 1809-1824) gave a much shorter version for theatrical performance. King

CC-0. Prof. Satya Vrat Shastri Collection.

8016

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

Rama VI (reigning between 1910-1925) composed a scholarly exposition of the *Ramakien*, tracing in detail its origin and developments. According to him different versions of the *Ramakien* are derived from various sources: the Sanskrit version from Bengal, the *Viṣṇupurāṇa*, the *Hanumannāṭaka* and other indigenous sources. In the Northern, Northeastern and Southern regions of Thailand there exist folk versions which are still well received among the local people.

In the realm of performing art, the story of the *Ramakien* is used exclusively in the performance of *Nang* (shadow play) and *Khon* (masked dance).

In the *Nang*, *Ramakien* characters cut from cattle hide are artistically moved from behind so that their shadows can be seen on the well-lit screen. *Nang* is an abbreviated name for *Nang Yai* (the word *"yai"* in Thai means large). It is so called because the size of the characters is many times larger than those of the *Nang Talung*, another equally popular performance of different contents in Southern Thailand.

Khon dancers wear masks and convey their thoughts and emotions by means of bodily movements and gestures. They do not have to do the speaking as this is done by a special troupe of artists accompanied by an orchestra with singers.

In Thailand a great number of religious monuments, for example, Prasad Phnom Rung and Prasad Hin Pimai, have bas-reliefs depicting scenes from Rama stories. Mural paintings along the gallery at Wat Phra Kaew (the Temple of the Emerald Buddha) and bas-reliefs at Wat Phra Chetubhon also provide good examples of *Ramakien* visual art.

It is a good idea to acquaint the people outside Thailand with the Thai version of the Rāma story, which differs from all the others. This is what Professor Satya Vrat has done in Sanskrit with charming diction. I am sure the work will meet with full applause from lovers of literature.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

आत्मनिवेदनम्

प्रायशो मम सर्वासामपि कृतीनां प्रारम्भे कश्चनानितरसाधारण एव हेतुः। इदं महाकाव्यमपि न तदपवादः। संस्कृतज्ञान् स्वसुहृदोऽहं संस्कृतेनैव पत्राणि प्रहिणोमि, विशेषतस्तु तान् ये संस्कृतेन व्यवहरन्ति, संस्कृतेनैव वा स्वकृतीर्विरचयन्ति। तेषु पत्रेषु कुशलवृत्तादिकमतिरिच्य बहूनन्यानपि विषयांश्चर्चयामि। तेषु केचिच्छास्त्रचर्चापराः, केचित्तत्तद्वस्तुनिरूपणपराः, केचिद्वा यात्रावृत्तान्तपराः। अस्मिन्नेव क्रमे स्वकीयान् शिष्यप्रवरान् सहयोगिनश्च डा० कृष्णलालमहाभागान् बैंकाकनगरात् पत्रमेकं प्रैरिरम्। मासो ममासीद् अत्रागतवतः। तस्मिन् पत्रे बैंकाकनगरस्य कृते थाइभाषायां देवस्थानार्थकस्य क्रुङ्थेवशब्दस्य प्रयोगः साम्प्रतिकेन चक्रिराजवंशस्य संस्थापकेन चास्य पुरस्य सन्निवेश इति चर्चितम्। स एव च महाराजो रामकीर्त्यभिधानां रामगाथामपि स्वभाषया जगाविति च निर्दिष्टम्। अपराभ्यां तदुत्तरवर्तिभ्यां राजप्रवराभ्यामप्येतद्विषये प्रवृत्तमिति चोक्तम्। ततः परं द्वे अन्ये अपि पत्रे मया डा० कृष्णलालमहाभागान् प्रेरिते यत्र रामकीर्तेः केचन प्रसङ्गा उपवर्णिताः। अयमेव प्रारम्भोऽस्य काव्यस्य। वर्षधारेव पद्यधाराऽत्र स्वयमेव प्रवृत्ता। नात्रान्यः प्रयोजको हेतुर्ऋतेऽन्तःप्रेरणायाः।

काव्यमिदं गुरुपूर्णिमोपान्त्ये दिने समाप्तिमगात्। इमानि च वाक्यानि मया पुण्यतमे गुरुपूर्णिमादिवस एवोपनिबध्यन्ते।

यदि वस्तुत एशियाभूखण्डस्य किमपि साधारणं काव्यं तर्हि रामायणमेवेति यदुच्यते तदवितथमेव। सुपरिचितमिदमत्रत्यानां जनानाम्। बहु चात्रात्मीयमपि संयोजितं तैर्यद्रामकथा तैः सुतरामात्मीयेत्यङ्गीकृतेति प्रमाणयति। मम तु श्रीरामायणं प्रति कश्चन विशिष्ट आग्रहः। नैकधा मया श्रीमद्वाल्मीकीयं

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

रामायणमामूलचूलं परिशीलितम्। मम साहित्यअकादमीपुरस्कारोपलब्ध्यनन्तरं पुण्यश्लोका मम पितृचरणा एकत्र सभायां गर्भस्थे मयि ते मम मातृचरणानखिलमपि वाल्मीकीयं रामायणमश्रावयन्नित्यज्ञातचरं किमपि वृत्तं प्रत्यपीपदन्। अतो नेदमाकस्मिकं यद् भाषाविश्लेषणदृष्ट्या श्रीरामायण एव मया सविस्तरं प्रवृत्तम्। सम्प्रति च काव्यरचनार्थमप्युपजीव्यग्रन्थरूपेण रामकीर्त्यपराभिधाने थाइरामायण एव मम प्रवृत्तिः। यान्युपाख्यानानि श्रीमद्वाल्मीकिरामायणे ऽन्येषु वा भरतवर्षे प्रसिद्धेषु रामायणेषु नोपलभ्यन्ते थाइरामायणीयानि तानि मया स्वकाव्येऽस्मिन् विशेषतो वर्णितानि येन थाइरामायणे रामकथागतं वैशिष्ट्यं समुन्मिषेत्।

रामकीर्तिगता रामगाथा तु मम कृते सूत्रमात्रमेव। तदपरिवर्तयताऽपि मयाऽत्र स्वोपज्ञं बहु विन्यस्तं स्वशैल्या।

कस्यापि विषयस्य देवभाषोपनिबन्धने कश्चिदलौकिक एवानन्दः। काव्यग्रन्थमिमं प्रणयता मया स आनन्दः प्रचुरमुपलब्ध आकण्ठं च निपीतः। संस्कृतवाङ्मयसमेधने यावदायुः प्रावर्तिषि। तद्दिशायामेव मम प्रकृतोऽप्ययं प्रयत्नः।

सम्प्रति रामकीर्तिपात्राणां सञ्ज्ञाविषये किञ्चिद्विवक्षामि। द्विविधानि पात्राणि रामकीर्तौ दृग्गोचरीभवन्ति। तानि पात्राणि यानि वाल्मीकिरामायणेऽपि समानानि। तत्पात्राणां सञ्ज्ञा अपि समानाः। केवलमुच्चारणे भेदः। तासां सञ्ज्ञानां वाल्मीकीयमेव स्वरूपं मयाऽत्र गृहीतम्। संस्कृतकाव्ये विकृतं स्वरूपं न सङ्गच्छेतेति धिया। तथा हि दशरथस्थाने न मया तोत्सरोत् शब्दः प्रयुक्तः, न च वा दशकण्ठस्थाने तोत्सकन् इति न च पुनर्लक्ष्मणभरतशत्रुघ्नानां स्थाने लक्क्रोत्सत्रुद् इति न वा विभीषणस्थाने बिभेक् इति। यानि पुना रामकीर्तिगतान्येव पात्राणि वाल्मीकिरामायणे रामायणान्तरेषु वाऽदृष्टचराणि तेषां सञ्ज्ञानां रामकीर्तिगतमेव स्वरूपं मयाऽधिगृहीतम्। न तु ताः संस्कृतस्वरूपमापादिताः। एवं क्रियमाणे तेषां रामकीर्तीयत्वमेव न प्रतिभासेत। किञ्च, तासु सञ्ज्ञासु सन्ति काश्चन तादृश्योऽपि यासां मूलसंस्कृतस्वरूपमिदमित्थंरूपेण न प्रतिपादयितुं शक्यम्। मच्छानुबेञ्जकयी-वीरक्वना-मलिवगब्रह्मेत्यादयः सञ्ज्ञा एवंविधा एव। यत्र

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्वचन संस्कृतस्वरूपमुद्भासतेऽपि तत्रापि निश्चयो नास्ति। तथा हि असुरफद् इति सञ्ज्ञा असुरपदशब्दस्य वा असुरभद्रशब्दस्य वाऽपभ्रंश इति विवादास्पदमेव। अत आसां सञ्ज्ञानां यथातथमेव परिग्रहणमुचितमिति बुद्धिमास्थाय तास्तथैव परिगृहीताः।

थाइदेशे भगवतः शङ्करस्य कृत 'इसुवन्' इति रूपेणोच्चारित ईश्वरशब्दो भगवतो विष्णोश्च कृते 'नराय' इतिरूपेणोच्चारितो नारायणशब्दः प्रयोगमवतरतः। तावेवात्र काव्ये बहुशः प्रयुक्तौ।

रामकीर्तिमहाकाव्यं नामाग्नेयैशियारामायणानां संस्कृतेनोपन्यासे प्रथमः प्रयासः। थाइदेशविषयकेषु संस्कृतग्रन्थेषु च द्वितीयः। प्रथमः थाइदेशविलासाख्योऽपि मदीय एव। अत्र खण्डकाव्यरूपेण समासेन थाइदेशस्येतिहासः, एतत्परम्परा, एतदीयानीतिहासदृष्ट्या संस्कृतिदृष्ट्या च विशिष्टानि स्थानान्युपवर्णितानि।

एतद्ग्रन्थप्रकाशनार्थमार्थिकं साहाय्यमुपपादयतोर्बैंकाकनगरस्थमूलामलसचदेव अमरनाथसचदेवप्रतिष्ठानयोस्तदधिकारिणां च सुतरामधमर्णोऽस्मि। एतान्सर्वानप्यत्र कर्मणि व्यापारयतां परमभागवतानां तपोमूर्तीनां परमश्रद्धेयमहामण्डलेश्वरश्री 1008 लोकेशानन्दगिरिमहाभागानाञ्चाप्यहं सुतरामधमर्णः। कृतिरियं तैस्साशीर्वादमभिनन्दितेति परमा मे कृतकृत्यता। ग्रन्थप्रकाशनसमये ममात्मजेनायुष्मता शरच्चन्द्रेणापि भूयः परिश्रान्तम्। मूलग्रन्थस्य टङ्कणकार्यप्रतिपादनं टङ्कितस्य च तस्य मुद्रणालये दूरस्थिते प्रापणमित्यादि बहु तेन कृतम्। तदर्थमाशीराशिभिरेनमभिनन्दामि। टङ्कैः श्रीजयकृष्णपिपलानीमहाभागैर्यथाकालमस्य टङ्कणं विधाय यत्साहाय्यमकारि तदर्थं तान्साधुवादैरनेकैः सभाजयामि।

इदं नाम महत्सौभाग्यं भारतदेशस्य थाइदेशस्य च यत्थाइदेशमहाराजकुमारी महाचक्री सिरिन्थौर्न् संस्कृतपण्डिता। नाना वर्षाण्येनया संस्कृतवाङ्मयं परिशीलितं तद्रहस्यं चाकलितम्। नैककार्यव्यापृतयाऽपि तया ग्रन्थस्यास्य प्रस्तावना न्यबन्धीति सुतरामस्याः कृतज्ञोऽस्मि। एतस्या एव पूर्वजै रामगाथा स्ववाचोपनिबद्धेत्यस्या ग्रन्थस्यास्य प्रारम्भिकवचनोपन्यासे महत्त्वमपि प्रासङ्गिकत्वमपि। रामकीर्त्यभिधानं रामायणमेतद्देशीयमेव।

CC-0. Prof. Satya Vrat Shastri Collection

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मया समं निवसन्त्याऽपि मम सहधर्मचारिण्या ममैतत्काव्यप्रणयनव्यापृति-हेतोर्न यावदपेक्षं कालो तया सह यापयितुं शक्त इति तस्या आत्मानं क्षमापयामि। अस्मादृशां नामैतादृशान्येव भागधेयानि। आर्यनार्यः सर्वंसहेव सर्वंसहाः।

ग्रन्थोऽयमाङ्गलभाषया मदीयेन सहयोगिना दिल्लीविश्वविद्यालयीय-हिन्दूमहाविद्यालये संस्कृतप्राध्यापकेन डा० जियालालकम्बोजमहाभागेना-नूदितः प्रूफसंशोधनादिकं च महत्या सूक्ष्मेक्षिकया तेनैव विहितम्। दिल्ल्यां ममानुपस्थित्या मुद्रणसम्बन्धिकार्यजातं महता कौशलेन महत्या च निष्ठया तेनैव सम्पादितम्। थाइभाषया ग्रन्थोऽयं बैंकाकस्थशिल्पाकरविश्वविद्यालये प्राच्यभाषाविभागे संस्कृतप्राध्यापकेन डा० चमलौङ् सरपद्नुक् महाभागे-नानूदितः। उभयोरप्येतयोर्विद्वत्प्रवरयोर्मय्यत्यन्तं स्निग्धयोः परमां कृतज्ञतां वहामि।

मरकतबुद्धप्रतिमामन्दिरस्थश्रीरामकीर्तिसम्बद्धदृश्यानां छायाचित्रादिकार्य-सम्पादने शिल्पाकरविश्वविद्यालयीयेनैव ममापरेण सहयोगिना डा० चिरपत्रपण्डविद्यमहाभागेन यत्साहाय्यं व्यधायि तदर्थं तस्याप्यधमर्णोऽस्मि। वात्सुथात्-वात् पो इत्यतो मम सुहृदा डा० साइलर महाभागेनच्छायाचित्रा-दिकार्यं सम्पादितम्। तदर्थं तस्मायपि कृतज्ञतां वहामि।

निकटस्थयोर्भारतथाइदेशयोरतिपुरातनोऽतिनेदीयांश्चैतिहासिकः सांस्कृतिकश्च सम्बन्धः। तस्य भूयोऽपि दार्ढ्यमुभयोरपि कल्याणाय। तदर्थमेव प्रणीतेयं कृतिः।

गुरुपूर्णिमा
18-7-1989

सत्यव्रतशास्त्री
थाइदेशीयबैंकाकनगरस्थे
शिल्पाकरविश्वविद्यालये संस्कृत-
विभागेऽभ्यागताचार्यः
मूलतः
दिल्लीविश्वविद्यालयसंस्कृतविभागाचार्यः

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

PREFACE

Almost all of my works were begun in unusual circumstances. The present one is no exception. I am in the habit of writing letters in Sanskrit to my Sanskritist friends, especially the creative writers among them and touching in them, among other things, some literary points or the other. The present work began with my letter to my esteemed pupil and colleague, Dr. Krishna Lal, presently Professor and Head of the Department of Sanskrit, University of Delhi about a month after my arrival in Bangkok to take up an assignment with the Silpakorn University. In this I said incidentally something about Thailand and its present ruling dynasty some of the Kings of which beginning with the founder of the same Phra Buddha Yod Fa had told the Rāma story, each in his own way, and even if not told, as in the case of Phra Mongkut, the sixth King in the line, had contributed in depth to its scholarly exposition. The first letter was followed by two others and this was the starting point of the present Kāvya. Verse after verse started pouring in. It was just a labour of love, nobody asking me to do it, no prompting, except that from within. It was a great joy creating something in Sanskrit, the language of the gods, the Devabhāṣā, bordering almost on bliss. I have drunken from the cup of this joy to the brim the period I have been working at the Kāvya. It had been all spontaneous. I did not prepare any fair copy of the work from the draft which, as it is, was passed on to the typist for typing. This shows how the stanzas have come out of me, well-formed, in a variety of metres and rhythms. It seems some unseen power had been behind this.

The composition came to completion on the penultimate day of the Gurupūrṇimā. These lines are, however, being written on the great day itself.

It is said, and correctly so, that if there is any truly Asian epic, it is the *Rāmāyaṇa*. It is all too familiar to the peoples of the region who have added to it much of their own, a proof, if ever the same were needed, of their having completely owned it. For me personally the Rāma story has had particular fascination. I have gone through the Vālmīki *Rāmāyaṇa* back and forth several times. My father had revealed at a public meeting soon after my getting the Sahitya Akademi Award in 1968 that he had recited the whole

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

of the Vālmiki *Rāmāyaṇa* to my mother when she was in the family way. It is, therefore, not just an accident that I chose the Vālmiki *Rāmāyaṇa* for a detailed linguistic appraisal. Nor is it just an accident that I have chosen to compose a Mahākāvya on the Thai *Rāmāyaṇa*, the *Ramakien* or the *Rāmakīrti*. What I have done in the present case is that I have chosen to concentrate on as of the episodes of the *Ramakien* as are not to be met with in the Vālmīki *Rāmāyaṇa* or other Indian *Rāmāyaṇas*, highlighting thereby the contribution of the Thais to the development of the Rāma story.

The *Ramakien has* been for me just the thread to pick up the narrative which I have dealt with in my own way. It is this which has enabled me to create a Kāvya out of it.

Now a word about the proper names in the *Ramakien*. Of the names of as of the characters as are common to the Vālmiki *Rāmāyaṇa*, I have adopted the Vālmīkian spellings. Thus I have not referred to Daśaratha as Totsarot, Daśakaṇṭha as Totsakan, Lakṣmaṇa as Lak, Bharata as Phrot, Śatrughna as Satrud, Vibhīṣaṇa as Bibhek, Kumbhakarṇa as Kumphakan and so on. Of the names of as of the characters as are peculiar to the *Ramakien*, I have adopted spellings as they occur there with the sole exception of Suvannamacchā. I have not Sanskritized them. For one, in the case of some, their Sanskrit origin is not clear. Such, for instance, are the names Macchānu, Beñjakayī, Bīrakvanā, Malivaggabrahmā and so on. Even where Sanskrit origin could be noticeable, it cannot be pinpointed, as for instance, one cannot be sure as to whether the name Asuraphad could be traced to Sanskrit Asurapada or Asurabhadra. It is better to adopt it as such. This is precisely what I have done in this and other similar cases. Suvannamacchā I have certainly Sanskritized as Suvarṇamatsyā which appeared to me a lot more aesthetic.

As a story the *Ramakien* is of gripping interest. Told through a variety of incidents and episodes replete with supernatural element it has an appeal of its own. It is a good insight study of the human imagination at play in inventing chips of different hues and sizes, of possibles and impossibles and putting them together to form a unique mosaic.

It is this mosaic that makes the *Ramakien* stand out as an independent entity and not a pale shadow of the pioneering work of Vālmiki who might have been the first to tell the Rāma story, the Ādikavi, but, as the Thai *Ramakien* or many of the other *Rāmāyaṇas*

CC-0. Prof. Satya Vrat Shastri Collection.

16

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

prove, not the last. It is the Rāma story everywhere but not the same. And that is the beauty of it.

The *Ramakien* is here told in Sanskrit because that language has a music of its own. Why not enjoy the story in the time-tested musical setting ? For the other, it at once connects the story with the rich and hallowed tradition of Sanskrit literature, the tradition that has continued uninterrupted to the present day. The importance of being a part of that tradition cannot be over-emphasized. With this the *Ramakien* joins the vast Sanskrit literature going back to thousands of years.

The present one is the first ever Sanskrit Mahākāvya on any of the versions of the Rāma story of Southeast Asia and the second one connected with Thailand after my first ever work on it, the *Thaideśavilāsam* which deals in brief with its history, its places of historical and cultural interest and its traditions.

Financial assistance for the publication of this work was provided by the two Foundations in Bangkok, the Moolamall Sachdev Foundation and the Amarnath Sachdeva Foundation. To the Trustees of the Foundations I owe a deep sense of gratitude. Above all, I am indebted to the most pious of the saints Venerable Mahamandaleshwar 1008 Swami Lokeshanand Giri who encouraged the above philanthropists to undertake the publication of the work and provide for it the necessary financial support. It is a matter of utmost fulfilment for me that the work is blessed by him.

My son Shri Sharat Chandra had been very helpful to me in the course of the printing of the work. I would send him the manuscript from Bangkok in instalments, he would pass it on to the typist, would collect from him the type-script and would hand it over to the far away Press. My hearty blessings to him for all his hard labour.

I am highly grateful to Shri Jai Krishan Piplani for putting the work in type-script in record time.

It is a good fortune of Thailand and India that Her Royal Highness Mahachakri Sirindhorn, the Princess of Thailand, is a scholar of Sanskrit. I am highly grateful to her for contributing the learned Foreword to this work in spite of her busy schedule. The Foreword coming from her has its own importance and appropri-

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri
ateness. It was her ancestors who had told the Rāma story in their own language. The *Ramakien* is of Thailand.

Busy with this work, I could not devote as much time to my wife, Dr. Usha Satya Vrat, though she had been with me all through, as she deserved. I owe her, therefore, profuse apologies.

The English translation of the work was prepared by my colleague Dr. Jiya Lal Kamboj of the Department of Sanskrit of the Hindu College of the University of Delhi, Delhi. He also read through the proofs minutely and maintained perfect co-ordination with the Press in my absence from Delhi and offered valuable suggestions. The Thai translation of the work was prepared by my colleague Dr. Chamlong Sarapadnuke of the Department of Oriental Languages of the Silpakorn University, Bangkok. To both of them I offer hearty thanks.

Dr. Chirapat Prapandvidya, another of my colleagues in the Department of Oriental Languages of the Silpakorn University, Bangkok rendered valuable help in arranging for the slides of the *Ramakien* scenes from Wat Phra Kaew, the Temple of the Emerald Buddha, Bangkok. So did another friend Dr. Sailer for those from Wat Suthat and Wat Po, Bangkok. I am grateful to both of them.

India and Thailand are neighbours with intimate historical and cultural ties. Their further strengthening would be to the good of both. I dedicate the present work to that end.

Satya Vrat Shastri

Guru-Pūrṇimā
18 July, 1989

18

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषयानुक्रमणी

पृष्ठाङ्कः

प्रथमः सर्गः (उपोद्घातः) 1

थाइदेशस्य तद्राजधान्या बैङ्काकपुर्याश्च वर्णनम् — क्रुङ्थेवेत्येवं थाइजनेषु प्रथितस्य शब्दस्यार्थनिरूपणं तन्नगरेतिहासवर्णनं च — रामकीर्तिरिति थाइदेशे ख्याताया रामकथाया इतिवृत्तोपन्यासः — तद्विषये थाइदेशीयानामात्मीयभावस्य चर्चा

द्वितीयः सर्गः (अनोमतन्नुपाख्यानम्) 6

थाइरामायणानुसारेण अनोमतन्नित्याख्यस्याद्यभूपालस्य जन्मनो वर्णनम् — हिरन्तयक्षनाम्नाऽसुरेण कृत उपद्रवः — तत्प्रतीकारार्थं देवानामीश्वरोपसत्तिः — ईश्वरेण नारायणस्मरणम् — नारायणेन तदिच्छापूर्त्यर्थं हिरन्तयक्षस्य वधः — तदनु क्षीराम्बुधिं सम्प्राप्तेन नारायणेन पद्मे शयानस्य कस्यचन शिशोर्दर्शनम् — तेनेश्वराय तदुपायनीकरणम् — ईश्वरेणानोमतन्निति तन्नामकरणम् — पृथिव्या अयमाद्यो राजा भवत्विति चादेशः — तदादेशवशंवदेन महेन्द्रेण तदर्थमयोध्यापुर्या निवेशनम् — तस्माद्दशरथोत्पत्तिस्ततोऽपि च श्रीरामस्य

तृतीयः सर्गः (श्रीरामजन्मोपाख्यानम्) 10

अनपत्यतया दशरथस्य मनसि खेदः — कलैकोटिसमाख्यस्य ऋषेः साहाय्येन तस्य पुत्रेष्टियज्ञाहरणेच्छा — ऋषेरीश्वरपरामर्शाभिलाषो नारायणस्य दशरथपुत्ररूपेण जन्मग्रहणार्थमीश्वरानुरोधसङ्कल्पश्च — ईश्वरेण नारायणस्मरणम् — नारायणेन सलक्ष्मीकाणां शङ्खचक्रगदानन्तनागानां मनुष्यरूपेण भूलोकावतरणदशायां तदनुरोधाभ्युपगमः — ईश्वरेण यज्ञाहरणार्थमृषिसम्प्रेषणम् — यज्ञे वह्नेः चतुरोऽन्नपिण्डान् गृह्णतः कस्यचन पुरुषस्य प्रकटीभावः — तत्कालमेव केनचन तदन्नपिण्डार्धमाच्छिद्योत्पतनम् — अवशिष्टान्नपिण्डभोजनेन दशरथपत्नीनामन्तर्वत्नीत्वम् — रामलक्ष्मणभरतशत्रुघ्नानां च ततो जन्म

चतुर्थः सर्गः (नन्दकोपाख्यानं, सीताजन्मोपाख्यानं, सीताविवाहोपाख्यानं, रामासुरोपाख्यानं च) 13

ईश्वरस्य कैलासशैले नन्दकनामा देवयोनिः कश्चनानुचरः — ईश्वरं द्रष्टुमुपागतैर्देवैर्विनोदार्थं तच्छीर्षकेशोद्धरणम् — तत्प्रतीकारार्थं 'यमेवाङ्गुल्या निर्दिशेय स एव व्यसुर्निपततु' इति वराप्तय ईश्वरसम्प्रार्थनम् — ईश्वरेण तद्वरप्रदानम् — तत्कृतो देवसंहारः — तदुपायार्थं देवैरीश्वरसम्प्रार्थनम् — ईश्वरेण नारायणस्मरणम्, नन्दकनिर्जयार्थं च तत्प्रचोदनम् — नारायणेनाप्सरोरूपं धृत्वा नन्दकेन सह नृत्यक्रीडा — क्रीडामध्ये तेन युक्त्याङ्गुलेः स्वदेहाधोभागे पातनम् — नन्दकेनापि तथैव करणम्, तेन तदधोदेहभङ्गः — तत्कृतो नारायणाधिक्षेपः — जन्मान्तरे द्विभुजैकशीर्षरूपेण प्रजातेन नारायणेन दशाननरूपेण विंशतिबाहुकरूपेण च प्रजातस्य तस्य वधं करिष्यामीति तं प्रति प्रतिपादनम् — नन्दकेन रावणरूपेण नारायणेन च श्रीरामरूपेण जन्मग्रहणम् — मन्दोदर्या अन्नपिण्डगन्धमाघ्राय तदशनाया — काकरूपमाधृत्य काकनानामिकयासुरकन्यकया रावणप्रयुक्तयाऽन्नपिण्डार्धोद्धरणम् — तदशित्वा मन्दोदर्या गर्भाधानं कालेन कन्यकाप्रसूतिश्च — गणकैस्तद्भाग्यपरीक्षायां तन्माध्यमेन दशकण्ठकुलध्वंसलङ्काध्वंसयोरुक्तिः — तच्छ्रुत्वा भयपीडितेन रावणेन विभीषणं प्रति कन्याविषये यथेच्छाचरणोक्तिः — विभीषणप्रयुक्तेन सेवकेन कन्यकां कुम्भे निधाय तस्य नद्यां प्रवाहः — कुम्भस्य तत्र प्राप्तिर्यत्र जनकोऽतपस्यत् — जनकस्य कुम्भे

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सद्यःप्रसूतकन्यकावलोकनेन विस्मयः — मुखं पिधाय तेन कुम्भस्य कस्यापि वृक्षस्य मूले निखननं षोडशवर्षानन्तरं राजधानीं जिगमिषुणा तेन हलेन वृक्षमूलनिखननं ततश्च कुम्भप्राप्तिः, कुम्भाच्च कन्यकाविर्भावः, तया सह तस्य राजधानीं प्रति गमनं तत्र च स्वयंवरायोजनम् — रामेण धनुर्भङ्गे सीतया तस्य वरणं तत्परिणयश्च — अयोध्यां प्रति प्रतिनिवर्तमानस्य तस्य रामासुरेण प्रतिरोधस्तत्पराजयश्च — पराजितेन तेन तदानुकूल्याय तस्मै धनुषोऽर्पणं तेन च वरुणे मम न्यासोऽस्त्विदमिति तं प्रति तत्प्रक्षिप्यायोध्याप्राप्तिः

पञ्चमः सर्गः (रामवनवासोपाख्यानं, जिह्वोपाख्यानं च) 25

अयोध्याप्राप्तौ दशरथस्य रामाभिषेकाभिलाषः — बाल्यकाले क्रीडारसात्परिहासपात्रापादनेन रामं प्रति द्वेषभावं दधानया कुब्जाख्यया परिचारिकया प्रेरितया कैकेय्या दशरथं रामस्य चतुर्दशवर्षवनवासं भरतस्य च राज्येऽभिषेचनमिति वरद्वयप्रार्थनम् — दशरथस्य मृत्युः, ससीतस्य सलक्ष्मणस्य रामस्य च वनं प्रति प्रस्थानम् — एकदा वनं प्रतिष्ठमानेन रावणेन स्वानुपस्थितौ शूर्पणखापतेर्जिह्वस्य लङ्कारक्षार्थं नियोगः — सप्तरात्रिजागरणानन्तरं निद्राक्रान्तेन तेन जिह्वोपबृंहणेन लङ्कां सुगुप्तां कृत्वा शयनम् — अत्रान्तरे तां प्राप्तेन रावणेन मार्गमलभमानेन जिह्वाछेदस्तेन जिह्वस्य प्राणान्तः

षष्ठः सर्गः (सीताहरणोपाख्यानं जटायुवधोपाख्यानं च) 31

पुत्रे निवस्तुं जिगमिषामीति व्याजेन पत्यन्तराभिलाषया शूर्पणखाया वने प्राप्तिस्तत्र च रामं दृष्ट्वा तदभिलाषस्तस्य च स्वं प्रत्यरुचिमभिलक्ष्य तत्र हेतुं समीपस्थां सीतामभिलक्ष्य तज्जिघांसा — लक्ष्मणेन तत्कर्णनासाछेदनं तस्याः खरदूषणोपसत्तिस्तयो रामलक्ष्मणोपरोधस्ताभ्यां च तद्वधे शूर्पणखाया रावणोपगमनं स्वापमानप्रतिशोधनाय तत्प्रेरणं सीतासौन्दर्यवर्णनेन तं समुत्तेज्य तद्धरणाय तत्प्रेरणम् — कामोत्तेजितरावणप्रयुक्तेन मारीचेन हेममृगरूपेण रामकुटीरकसविधे कूर्दनम् — रामेण सीतायास्तत्प्राप्त्यभिलाषं पूरयितुं तदनुगमनं दूरं गते रामशरानुविद्धेन तेन 'हा सीते' इति विनद्य प्राणत्यागः — आशङ्कितया सीतया भ्रातृप्रवृत्त्यर्थं लक्ष्मणप्रेषणम् — संन्यासिवेषेण रावणेन सीताहरणम् — जटायोस्तत्प्रतिरोधः सीताङ्गुलिस्थं माहेश्वरमङ्गुलीयमेव मां हन्तुं शक्तमिति जटायुवचः श्रुत्वा तत्प्रहारेण जटायुवधः — सीतान्वेषणप्रयुक्तौ रामलक्ष्मणौ तदात्मना तच्छरीरममुञ्चता रावणेन सीताहरणं सम्प्रोच्याङ्गुलीयकं च श्रीरामाय समर्प्य विश्रमप्राप्तिः — रामेण शरप्रयोगेण विचित्ररूपा जटायोरन्त्येष्टिः

सप्तमः सर्गः (हनुमत्सम्पर्कोपाख्यानम्) 39

सीतान्वेषणार्थमाहिण्डमानस्य रामस्य मध्येपथं क्वचन वृक्षतले विश्रमः शयनं च — कस्यापि कपेस्तद्वृक्षशाखावधूननम् — तद्धननार्थं प्रयुक्तस्य लक्ष्मणस्य तेन धनुषोऽपनयनं — लक्ष्मणेन जागरितेन रामेण कपेर्लक्षणाभिज्ञानं तेन च कपे रामः साक्षान्नारायण एवेति निश्चये तत्सेवार्थमात्मनोऽर्पणं सीतापुनःप्राप्तिसाहाय्यार्थं रामप्रयुक्तेन तेन प्रतिश्रुतिः सुग्रीवपार्श्वे च तन्नयनं — रामस्य तेन मैत्री तन्मैत्र्या च रामेण वालिवधः

अष्टमः सर्गः (दरभ्यु (थोरप्यु) पाख्यानं वालिवधोपाख्यानं लङ्कादहनोपाख्यानं च) 43

कैलासे राक्षसजातिजातेन तद्द्वारेष्वेकतमस्य रक्षार्थमभिप्रयुक्तेन नन्दकेन कामाभिभूतेन शिवोपपत्न्या दृष्टिमात्मन्यपकर्ष्टुं पुष्पेण तस्यां प्रहारः — उपपत्न्या निवेदिते वृत्ते शिवेन शप्तेन नन्दकेन दरभीतिनामकमहिषरूपप्राप्तिः — पुत्रमुखदर्शनान्तत्वाच्छापस्य तेन महिषेण जातमात्रनैकपुत्रहननं तद्दृष्टिं परिहृत्य कयाऽपि महिष्या गुहान्तःप्रसवेऽपत्याय तत्तातनृशंसकृत्यसूचनं तेन च प्राप्तयौवनेन पितुर्वधः — तदनु गर्वितेन तेनेश्वरं नियुद्धप्रार्थनं तेन च तत्प्रयुक्तेन तदर्थं वालिन उपगमनं — तेन सह तस्य गिरिकन्दरायां नियुद्धं — नियुद्धात्प्राग् गुहातो निर्गतरक्तसमीक्षामाध्यमेन (रक्तं यदि कृष्णवर्णं तर्हि महिषो हतोऽन्यथा वालीति) हताहतनिर्णयमुक्त्वा सुग्रीवस्य गुहामुखे प्रतिष्ठापनं — वालिना महिषवधः — वर्षजलेन

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

रुधिरस्य वर्णविपर्यासे कृते वाली हत इति भ्रममारूढेन सुग्रीवेण शिलोच्चयेन गुहानिर्गमनमार्गोपरोधे ऽतीव काठिन्येन वालिनस्ततोऽपक्रमे भ्रान्तिवशात्सुग्रीवं प्रति मामयं द्वेष्टि मद्राज्यगृध्नुरिति बुद्धिभेदे तस्य स्वराज्यानिष्कासनं — तेन च रामं तद्धननार्थं प्रार्थनं — वृक्षान्तरितेन रामेण सुग्रीवेण नियुध्यमानस्य तस्य हननम् — सुग्रीवस्य रामेण किष्किन्धाराज्येऽभिषेकः — सुग्रीवस्य सीताप्राप्तिसाहाय्यप्रतिश्रवः — तत्सेनायाः समुद्रं प्रति प्रस्थानम् — हनूमतो लङ्कामुपेत्य सीतासन्दर्शनं तस्यायङ्गुलीयकसमर्पणं लङ्कादहनं च

नवमः सर्गः (रावणस्वप्नोपाख्यानं रामशिबिरे गुप्तचरसम्प्रेषणोपाख्यानं च) 50

रावणेन लङ्कायाः प्रतिसंस्कारे तस्याः पूर्वतोऽप्यधिकं भासुरत्वम् — एकस्यां रात्रौ स्वप्ने तेन कृष्णवर्णश्वेतवर्णश्येनद्वन्द्वयुद्धदर्शनं तत्र च श्वेतवर्णश्येनद्वारा कृष्णवर्णश्येनहिंसनं तदनु च नारिकेले कोटरे तैलासेकं विदधतो वर्तिं विन्यस्यतः स्वस्य कोटरे वह्निं प्रज्वलयन्त्याः कस्या अपि योषितस्तेन कोटरदाहस्य वह्नेश्च स्वकरानुप्रवेशस्य दर्शनं — रावणपृष्टेन विभीषणेन स्वप्नानिष्टफलं प्रतिपादयता सीताप्रत्यर्पणानुरोधो रावणेन च तदस्वीकारे विभीषणस्य लङ्काबहिष्करणं तेन च रामोपाश्रयणम् — रामविभीषणमैत्री — वानरा दनुजैर्योद्धुमलं न वेति विभीषणशङ्कां निवारयितुं सुग्रीवप्रेरितैर्वानरैरपूर्वशौर्यप्रदर्शनं तेन च विभीषणस्य तच्छक्तिपरिचयः — शक्तिप्रदर्शनार्थकतरुगिरिशतव्रातसन्दारणोत्थस्य सांराविणस्य रावणश्रवणकुहरपतनं तेन च रामसैन्यगतवृत्तान्तपरिज्ञानार्थं शुक्रसाराख्यस्य दनुजस्य गुप्तचररूपेण प्रेषणं तेन च श्येनरूपेण रामसैन्योपगमनं तत्र च वानररूपेण प्रवेशो विभीषणेन तदभिज्ञानं हनुमतस्तत्सूचनं हनुमता च युक्त्या तदभिज्ञानं कशाभिघातमभिहत्य चिह्नितसर्वाङ्गस्य तस्य च मोचनम् — तदनु रावणस्य रामं स्वपथश्च्यावयितुं साधुवेषेण तदुपगमनम् — रावणमाक्रान्तुं प्रतिषेधनं रामेण च तद्वचोऽनङ्गीकारे विफलप्रयत्नेन रावणेन ततोऽपगमनम्

दशमः सर्गः (बेञ्जकय्युपाख्यानम्) 61

एकया राक्षसकन्यकया रावणप्रचोदितया बेञ्जकयीनामधेयया मृतसीताकृतिमाधाय नद्यामात्मनः प्रवाहणम् — स्नानार्थमागतेन रामेण तदवलोकनं तेन च तस्य शोकः — चिरायमाणस्य तस्यान्वेषणार्थमागतस्य लक्ष्मणस्यापि तादृशी दशा — सुग्रीवहनुमतोरपि राममन्वेषयमाणयोस्तत्रागमनम् — सीता मृतेति हनुमतोऽविश्वासः — तेन चिताप्रज्वालनं तत्र च सीताकृतिशवस्य प्रक्षेपणम् — ततः क्रोशन्त्या बेञ्जकय्या अपक्रमणम् — हनुमता वियदुत्प्लुत्य केशेष्वाकृष्य च भूमौ तदानयनम् — अत्रान्तरे तत्र प्राप्तेन विभीषणेन ममेयं पुत्री यया भवान् प्रवञ्चित इति तस्या वधार्थं रामं प्रति प्रार्थनं रामेण च मित्रपुत्रीति तदनङ्गीकारः, हनुमते च तस्या लङ्काप्रापणायादेशः — मध्येपथमुभयोः प्रणयोद्गमः — तेन च बेञ्जकय्याऽसुरफद् इत्याख्यस्य पुत्रस्य प्रजननं तस्य च लङ्कायां पालनं पोषणं च — हनुमतो रामं प्रति प्रत्यागमनं नानाप्रयत्नवैफल्ये रावणस्य युद्धाय सन्नद्धता रामस्य चापि

एकादशः सर्गः (नीलहनुमद्विग्रहोपाख्यानम्) 68

सेनायाः समुद्रमध्ये स्थितिः — लङ्कापुरीप्राप्तिः सेतुमार्गेण शक्येति तन्निर्माणार्थं श्रीरामेण नीलहनुमतोर्नियुक्तिः — नीलेन शिलानां क्षेपणं हनूमता च तासां यथास्थानं निवेश इति तयोर्निर्बन्धः — हनूमान् नीलस्य पितृव्ये पूर्वं न साध्वचारीदिति प्रतिशोधकामेन नीलेन शिलाक्षेपणेऽति त्वरा यद्वशात्प्रयत्नवतोऽपि हनुमतो यथाकालं तासां निवेशेऽसामर्थ्यम् — कालेन श्रीरामादेशवशात्तयोः कार्यपरीवर्तः — प्रतिशोधधिया हनुमता स्वस्य प्रत्येकं रोमसु शिला निबध्य तासामति त्वरया क्षेपणं नीलस्य च तासां निवेशेऽशक्तिः — तन्निरीक्ष्य रामस्य मनसि क्षोभस्तयोः कृते च नीलः किष्किन्धां गच्छतु सुग्रीवप्रतिनिधिरूपेण तां शास्तु सैन्यस्य कृते यद्यदावश्यकं तस्य तस्य संविधानकं सम्पादयतु हनूमांश्च सप्तभिरेव दिवसैः सेतुं निर्मात्विति दण्डविधानम् — नीलस्य किष्किन्धागमनं हनूमतश्च सेतुनिर्माणकर्मण्यात्मनः सर्वात्मना व्यापारणम्

CC-0. Prof. Satya Vrat Shastri Collection

Digitized by Arya Samaj Foundation Chennai and eGangotri

रुधिरस्य वर्णविपर्यासे कृते वाली हत इति भ्रममारूढेन सुग्रीवेण शिलोच्चयेन गुहानिर्गमनमार्गोपरोधे ऽतीव काठिन्येन वालिनस्ततोऽपक्रमे भ्रान्तिवशात्सुग्रीवं प्रति मामयं द्वेष्टि मद्राज्यगृध्नुरिति बुद्धिभेदे तस्य स्वराज्यानिष्कासनं — तेन च रामं तद्धननार्थं प्रार्थनं — वृक्षान्तरितेन रामेण सुग्रीवेण नियुध्यमानस्य तस्य हननम् — सुग्रीवस्य रामेण किष्किन्धाराज्येऽभिषेकः — सुग्रीवस्य सीताप्राप्तिसाहाय्यप्रतिश्रवः — तत्सेनायाः समुद्रं प्रति प्रस्थानम् — हनूमतो लङ्कामुपेत्य सीतासन्दर्शनं तस्यायङ्गुलीयकसमर्पणं लङ्कादहनं च

नवमः सर्गः (रावणस्वप्नोपाख्यानं रामशिबिरे गुप्तचरसम्प्रेषणोपाख्यानं च) **50**

रावणेन लङ्कायाः प्रतिसंस्कारे तस्याः पूर्वतोऽप्यधिकं भासुरत्वम् — एकस्यां रात्रौ स्वप्ने तेन कृष्णवर्णश्वेतवर्णश्येनद्वन्द्वयुद्धदर्शनं तत्र च श्वेतवर्णश्येनद्वारा कृष्णवर्णश्येनहिंसनं तदनु च नारिकेले कोटरे तैलासेकं विदधतो वर्तिं विन्यस्यतः स्वस्य कोटरे वह्निं प्रज्वलयन्त्याः कस्या अपि योषितस्तेन कोटरदाहस्य वह्नेश्च स्वकरानुप्रवेशस्य दर्शनं — रावणपृष्टेन विभीषणेन स्वप्नानिष्टफलं प्रतिपादयता सीताप्रत्यर्पणानुरोधो रावणेन च तदस्वीकारे विभीषणस्य लङ्काबहिष्करणं तेन च रामोपाश्रयणम् — रामविभीषणमैत्री — वानरा दनुजैर्योद्धुमलं न वेति विभीषणशङ्कां निवारयितुं सुग्रीवप्रेरितैर्वानरैरपूर्वशौर्यप्रदर्शनं तेन च विभीषणस्य तच्छक्तिपरिचयः — शक्तिप्रदर्शनार्थकतरुगिरिशितव्रातसन्दारणोत्थस्य सांराविणस्य रावणश्रवणकुहरपतनं तेन च रामसैन्यगतवृत्तान्तपरिज्ञानार्थं शुक्रसाराख्यस्य दनुजस्य गुप्तचररूपेण प्रेषणं तेन च श्येनरूपेण रामसैन्योपगमनं तत्र च वानररूपेण प्रवेशो विभीषणेन तदभिज्ञानं हनुमतस्तत्सूचनं हनुमता च युक्त्या तदभिज्ञानं कशाभिघातमभिहत्य चिह्नितसर्वाङ्गस्य तस्य च मोचनम् — तदनु रावणस्य रामं स्वपथश्च्यावयितुं साधुवेषेण तदुपगमनम् — रावणमाक्रान्तुं प्रतिषेधनं रामेण च तद्वचोऽनङ्गीकारे विफलप्रयत्नेन रावणेन ततोऽपगमनम्

दशमः सर्गः (बेञ्जकय्युपाख्यानम्) **61**

एकया राक्षसकन्यकया रावणप्रचोदितया बेञ्जकयीनामधेयया मृतसीताकृतिमाधाय नद्यामात्मनः प्रवाहणम् — स्नानार्थमागतेन रामेण तदवलोकनं तेन च तस्य शोकः — चिरायमाणस्य तस्यान्वेषणार्थमागतस्य लक्ष्मणस्यापि तादृशी दशा — सुग्रीवहनुमतोरपि राममन्वेषयमाणयोस्तत्रागमनम् — सीता मृतेति हनुमतोऽविश्वासः — तेन चिताप्रज्वालनं तत्र च सीताकृतिशवस्य प्रक्षेपणम् — ततः क्रोशन्त्या बेञ्जकय्या अपक्रमणम् — हनुमता वियदुत्प्लुत्य केशेष्वाकृष्य च भूमौ तदानयनम् — अत्रान्तरे तत्र प्राप्तेन विभीषणेन ममेयं पुत्री यया भवान् प्रवञ्चित इति तस्या वधार्थं रामं प्रति प्रार्थनं रामेण च मित्रपुत्रीति तदनङ्गीकारः, हनुमते च तस्या लङ्काप्रापणायादेशः — मध्येपथमुभयोः प्रणयोद्गमः — तेन च बेञ्जकय्याऽसुरफद् इत्याख्यस्य पुत्रस्य प्रजननं तस्य च लङ्कायां पालनं पोषणं च — हनुमतो रामं प्रति प्रत्यागमनं नानाप्रयत्नवैफल्ये रावणस्य युद्धाय सन्नद्धता रामस्य चापि

एकादशः सर्गः (नीलहनुमद्विग्रहोपाख्यानम्) **68**

सेनायाः समुद्रमध्ये स्थितिः — लङ्कापुरीप्राप्तिः सेतुमार्गेण शक्येति तन्निर्माणार्थं श्रीरामेण नीलहनुमतोर्नियुक्तिः — नीलेन शिलानां क्षेपणं हनूमता च तासां यथास्थानं निवेश इति तयोर्निर्बन्धः — हनूमान् नीलस्य पितृव्ये पूर्वं न साध्वचारीदिति प्रतिशोधकामेन नीलेन शिलाक्षेपणेऽति त्वरा यद्वशात्प्रयत्नवतोऽपि हनुमतो यथाकालं तासां निवेशेऽसामर्थ्यम् — कालेन श्रीरामादेशवशात्तयोः कार्यपरीवर्तः — प्रतिशोधधिया हनुमता स्वस्य प्रत्येकं रोमसु शिला निबध्य तासामति त्वरया क्षेपणं नीलस्य च तासां निवेशेऽशक्तिः — तन्निरीक्ष्य रामस्य मनसि क्षोभस्तयोः कृते च नीलः किष्किन्धां गच्छतु सुग्रीवप्रतिनिधिरूपेण तां शास्तु सैन्यस्य कृते यद्यदावश्यकं तस्य तस्य संविधानकं सम्पादयतु हनूमांश्च सप्तभिरेव दिवसैः सेतुं निर्मात्विति दण्डविधानम् — नीलस्य किष्किन्धागमनं हनूमतश्च सेतुनिर्माणकर्मण्यात्मनः सर्वात्मना व्यापारणम्

CC-0. Prof. Satya Vrat Shastri Collection

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वादशः सर्गः (सुवर्णमत्स्योपाख्यानम्) 73

कपिसैन्यसहायेन हनूमताऽब्धौ शिलानां यावद्दिनं प्रक्षेपणम् — परेद्युस्तासामदर्शनम् — ततः परेद्युरप्येवमेव — रात्रौ किं भवतीति जिज्ञासमानेन तेनोन्निद्रेण समुद्रमवप्लुत्य सहस्रशो मत्स्यानां मत्सीनां च शिलाव्यपरोपणं दृष्ट्वा विस्मयः — तत्पृष्टैस्तैः स्वराज्ञीवशाद्वयमेवं कुर्म इत्याख्यानम् — हनूमतो राज्ञ्याः सुवर्णमत्स्याया उपसत्तिः — पितू रावणस्यादेशवशादात्मरक्षार्थमेवं क्रियत इति तत्पृष्टायास्तस्या उक्तिः — सीतापहरणरूपं जघन्यं कृत्यमनुष्ठितवतः पितुः साहाय्यस्य हनूमता सयुक्तिकमनौचित्यप्रतिपादनम् — सुवर्णमत्स्यायास्तत्र सहमतिः — तस्याः स्वकार्याद्विरतिर्मत्स्यसैन्यस्य चापि तत्कार्यप्रतिषेधः — परस्परालोकनेन सुवर्णमत्स्याहनूमतोः प्रणयोद्गमः — तयो रतिक्रीडा — ततः सुवर्णमत्स्यया मच्छानुनाम्नः पुत्रस्य प्रसवो रावणभयात् तं समुद्रतीर एव परित्यज्य च लङ्कापुरीं प्रति गमनम् — हनूमतश्च स्वस्थानं पुनरागमः

त्रयोदशः सर्गः (मैयराबोपाख्यानम्) 83

हनुमत्पुरोगैः कपिसैन्यैः समुद्रे सेतुबन्धः सेतुमार्गेण च लङ्कापुरप्राप्तिस्तदुपरोधश्च — विनैव युद्धं विजयप्राप्त्यर्थं रामवधार्थं रावणोद्योगः — अभिन्नमित्रस्य मैयराबस्य तत्कर्मणि तेन विनियोजनम् — मैयराबेण रामसैन्यं प्रविश्य चूर्णविशेषेण सैन्यं निद्रावशे कारयित्वा रामस्य स्वशिबिरादपहरणं स्वदेशे प्रापणं च — विभीषणेन चूर्णप्रभावक्षये निद्रोत्थिताञ्चिन्तापरवशान् रामसहायकाञ्श्रीरामो मैयराबेणापहृतः पातालदेशं च प्रापितो हनूमता च स देशस्त्वरितं गमिकर्मीकर्त्तव्य इति सूचने हनूमतस्तत्क्षणं पातालदेशं प्रति गमनं तत्र च मध्येपथं चक्राकारैः पद्मैः परिपूर्णस्य विशालस्य सरसोऽवलोकनं पद्ममेकं च समुद्धृत्य तन्नालदण्डे स्वस्य प्रवेशनं क्रमाच्चान्यस्य सरसः पुरा सुवर्णमत्स्यायामभिजातेन स्वपुत्रेण मच्छानुनाम्ना परिरक्षितस्यावलोकनं — मच्छानुनाऽनभिज्ञातस्य हनूमतः प्रतिरोधः — तयोर्युद्धं न च कस्यापि विजये क्षणं विरम्य ताभ्यामन्योन्यमालोकनं — हनूमता पृष्टेन मच्छानुना हनूमतः पुत्रो ऽहमित्युक्तौ हनुमतोऽपरिमितो हर्षः — पितुः पुत्रस्य च समागमः — पातालदेशः कथं प्राप्तव्य इति हनूमता पृष्टेन मैयराबेण स्वप्ने कदाचिद् दृष्टपूर्वेण समुद्रतटात्समानीतेन सुतनिर्विशेषं च संवर्धितेन मच्छानुना धर्मसङ्कटे पतितेन युक्त्या 'येन पथा भवानागतस्तेनैव किं गन्तुं न शक्त' इति कृतं सङ्केतं गृहीतवता हनुमता पद्ममुद्धृत्य तन्नालदण्डे स्वप्रवेशनम्

चतुर्दशः सर्गः (मैयराबोपाख्यानं पूर्वतोऽनुवृत्तम्) 97

कञ्चिदध्वानमतिक्रान्तवतस्तस्य केनापि पर्वतेन द्विरदेन मशकावल्या चोपरोधस्तदुपरोधस्य च तेन निवारणं क्रमेण च पाताललोकप्राप्तिः — तत्र च कस्याश्चन रुदत्याः स्त्रिया अवलोकनम् — तत्प्रश्ने तया वीरक्वनाभिधा पातालराजस्वसाऽहं वैयविगाख्यस्य पुत्रस्य कृते विलपामीति कथनं — तप्तोदककुण्डे मत्पुत्रं रामं च निक्षिप्य तौ सममेव जिघांसति स पाप इति च सूचनं — तत्स्थानं मां नयेति हनुमन्निर्बन्धः — दानववीरमुख्यैः संरक्षितेन तोरणेन तत्र संस्थापितां तुलामधिरोप्यातिरिक्तभाराभावनिर्णय एव तत्र प्रवेशः सम्भवीति तत्कथने हनुमता कमलतन्तुरूपेणात्मस्वरूपपरिवर्तनेन तत्र प्रवेशः — श्रीरामसाक्षात्कारानन्तरं मैयराबोपसत्तिर्नियुद्धार्थं तदाह्वानं च — यावदात्मा मैयराबस्य न हन्यते न तावदयं हन्तुं शक्य इति वीरक्वनाकथनानुसारेण त्रिकूटपर्वते भृङ्गरूपं समापन्नस्य तदात्मनो हनूमता पेषणम् — तस्मिंश्च पिष्टे निःसंज्ञस्य मैयराबस्य भूमौ पतनम् — श्रीराममादाय हनूमतः पातालदेशादपक्रमस्तच्छिबिरं प्रति तत्प्रापणं च

पञ्चदशः सर्गः (कुम्भकर्णवधोपाख्यानम्) 110

मैयराबे हते रावणस्य कुम्भकर्णे रामविजयप्रत्ययः — धर्मभीरोः सीताहरणमनुचितं मन्यमानस्य तस्य रावणेन प्रथमं निशितैर्वाक्यैरुत्तेजनम् — तेन कुम्भकर्णस्य महत्सैन्यसहायस्य रामेण योद्धुं विनिर्गमः — तं कथञ्चित्परावर्तयितुं कुम्भकर्णस्य विभीषणोपसत्तिः — तं दृष्ट्वा तस्य क्रोधाग्निज्वलनं तेन

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

विभीषणनिर्भर्त्सनं — रामः साक्षान्नारायण इति धियैव मया स समाश्रित इति विभीषणस्य तं प्रति कथनं — यदि रामो नारायणस्तर्हि मे को नाम मूर्खो यतिः कश्च ऋजुदन्तः कुञ्जरः का च च्छलिनी योषा कश्च शठः पुमान् इति चतुर्णां प्रश्नानां तस्मादुत्तरप्राप्त्यर्थं विभीषणं प्रति कुम्भकर्णस्य कथनं रामस्य वानराणां च तत्रासामर्थ्यम् — अङ्गदेन कुम्भकर्णोपगमनं मत्स्वामी प्रश्नोत्तराणि जानाति तानि समीचीनान्येवेति निश्चेतुं त्वत्त उत्तराणि जिज्ञासत इत्युक्तौ कुम्भकर्णेन रामस्य प्रश्नसमाधानेऽशक्तिं विनिर्धार्य मूर्खो यती राम ऋजुदन्तः कुञ्जरो रावणश्च्छलिनी योषा शूर्पणखा शठः पुमान् विभीषण इति स्वयं समाधानप्रस्तुतिः — तदनु श्रीरामसैन्यं प्रति तत्प्रस्थानं सुग्रीवेण तत्प्रतिरोधश्च — हिमालयाद्रङ्गाख्यं द्रुममानीय मया सह युध्यस्वेति कुम्भकर्णोक्तौ सुग्रीवस्य तदानयनं गतागताभ्यां शक्तिह्रासे (सा नाम युक्तिः कुम्भकर्णेनाङ्गीकृताऽऽसीत्) सुग्रीवं कक्षे धारयित्वा कुम्भकर्णस्य प्रस्थानम् — तद् दृष्ट्वा हनूमतस्तत्परापतनं सुग्रीवमोक्षणं कुम्भकर्णनासाकर्णदंशश्च — लज्जितस्य तस्यैवंस्थितिकस्य लङ्कापुरीप्राप्तिः — स्वापमानप्रतीकाररूपेण तेन मोक्षशक्तिनामकशक्तिप्रयोगचिन्तनं तच्छक्तिशक्तिजागरणाय च प्रथमं पूजाविधानं — पूतिगन्धिशुनः शवस्य रूपमाधाय हनूमता तदुपरि चञ्चुप्रहारं कुर्वतः काकस्य रूपमाधायाङ्गदेन च तद्विघ्नः — अपूर्णमिव पूजां त्यक्त्वा कुम्भकर्णस्य प्रस्थानं लक्ष्मणे मोक्षशक्तिप्रहारस्तेन तस्य निःसञ्ज्ञता — विभीषणकथनानुसारेण हनूमता सर्वयपर्वतादोषधिसमानयनं सूर्योदयात् प्राक् लक्ष्मणेन च तत्सेवनं तेन च तस्य पुनः सञ्ज्ञालाभो रामसैन्ये च तेन महान् हर्षोत्सवः — कुम्भकर्णेन तदुत्तेजितेन रामसैन्यक्षयः — रामेण ब्रह्मास्त्रप्रयोगेण कुम्भकर्णवधः

षोडशः सर्गः (मलिवग्गब्रह्मोपाख्यानम्) 123

कुम्भकर्णवधानन्तरं रावणेन स्वपुत्रस्येन्द्रजितः स्वसेनाध्यक्ष्ये नियोजनम् — इन्द्रजिता रामसेनाया नागपाशे बन्धनम् — रामप्रयुक्तब्लैवान्नामशरतो गरुडस्यागमनेन नागानामपगमनम् — इन्द्रजितो वधः — रामेण रावणसेनाकदनम् — रावणेन राममुक्त्युपायरूपेण न्यायप्रियरूपेण विख्यातं मलिवग्गब्रह्माणं रामेण मम देश आक्रान्त इति जघन्यमाचरितमिति सूचयितुं नान्यविग्वायुवेगेतिसञ्ज्ञकयोर्दूतयोस्तं प्रति प्रेषणं ज्ञात्वेदं वृत्तं स रामं शपेतेति धिया — मलीवराजापराभिधानस्य मलिवग्गब्रह्मणो निष्पक्षतासमाश्रयणधिया देवसङ्घेन सह रामस्य रावणस्य च सेनयोर्मध्येऽवतरणम् — रामस्य च सीतायाश्च वचनं यावन्न शृण्वे यावच्चोपस्थितो देवसङ्घ एतद्व्यवहारसाक्षी न भवति न तावन्निर्णयं प्रवक्ष्य इति पितामहोक्तिः — पितामहोक्त्या रामस्य सीतायाश्च तत्र समानयनमुभयोर्वचः श्रुत्वा देवसङ्घवचसा च रावण एवापराध्यतीति रामशस्त्रेण रावणस्य वधो भवेदिति रावणं प्रति मलिवग्गब्रह्मणः शापः — स्वाभिप्रायासिद्ध्या रावणस्य खेदः

सप्तदशः सर्गः (रावणात्मोपाख्यानम्) 128

रामरावणयोर्युद्धम् — रावणस्य रामप्रेषितैर्निशितैः शरैरप्यङ्गभङ्गमनवलोक्य यावन्न ऋषेर्गोपुत्रसञ्ज्ञकस्य तद्गुरोराश्रमे पञ्जरे स्थापितस्तदात्मा हन्यते न तावत्तस्य वधः सम्भवीति विभीषणवचः श्रुत्वा हनुमतो युक्तिमाश्रितवता मया छलमार्ग आश्रीयते चेन्नाहं संशयेन दृश्य इति राममुक्त्वा गोपुत्राश्रमे सहाङ्गदेन गमनं रामो न मयि साध्वाचरतीति चोक्त्वा रावणमुपाश्रयितुमिच्छा मनसि मे समुदिताऽतस्तस्याभिमतं चेत्स मां रावणं प्रापयतु, स्वयं तदुपगमने शत्रुपक्षादागत इति मां दृष्ट्वैव क्रोधेन स मां चाङ्गदं च हन्यात् — गोपुत्रे तेन सह गन्तुमङ्गीकृतवति हनुमतोऽङ्गदस्य गोपुत्रस्य च लङ्कापुरीं प्रति प्रस्थानम् — प्रस्थानात्पूर्वं स्थापितरावणात्मनः पञ्जरस्य रामद्वारा चौर्यसम्भावनां प्रख्याप्य सहैव तन्नयने हनूमत ऋषिप्रेरणा — लङ्कासीमानं प्राप्तवतां हनुमदङ्गदगोपुत्राणां सीमातिक्रान्तो भवति चेद् द्राक् रावणात्मा रावणेन सङ्गच्छेत स च वध्यकोटिमापद्येतेति प्रश्नस्य ऋषिमनस्युदयस्तेन च तस्य व्याकुलीभावः — पञ्जरोऽङ्गदकरे तिष्ठतु केवलमावां (हनुमान् गोपुत्रश्च) रावणमुपसीदावोऽङ्गदश्च सीम्नि प्रतीक्षतामिति हनुमदुक्तेर्गोपुत्रेणाङ्गीकारः — उभयोः प्रस्थानम् — कञ्चिदध्वानमतिक्रान्तवतोस्तयोर्हनुमताऽङ्गदो मया किञ्चिदावश्यकं सन्देष्टव्य इत्युक्त्वा तं

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रत्युपगमनं पञ्जराद्वास्तविकमात्मानमुद्धृत्य तत्स्थाने कृत्रिमात्मनः स्थापनमङ्गदेन च तत्प्रयुक्तेन वास्तविकात्मनः समुद्रतीरे निखननं रावणस्य च तेन वध्यत्वकोटिप्राप्तिः — रामशैरस्तस्य वधः

139

अष्टादशः सर्गः (महीपालदेवासुरोपाख्यानम्)

रावणश्चिराय न दृष्ट इति धिया तत्सखस्य चक्रवालाख्यभुवः शासकस्य महीपालदेवस्य तद्दर्शनार्थं लङ्कापुर्युपगमनं तत्र च सकलं वृत्तं विदित्वा ज्ञातिद्रोही विभीषणो मत्सखवधे हेतुरिति स मे वध्य इति धिया तेन लङ्कोपरोधे विभीषणस्य व्याकुलीभावः — लङ्काविजयानन्तरं तस्य (विभीषणस्य) सामर्थ्यमून-मभिलक्ष्य सम्भाविताया आपदस्तं रक्षितुं प्रतिसप्ताहं शरं प्रेषयितास्मि यदि कयाऽप्यापदा ग्रस्तो भवेस्तर्हि तद्द्वारा लेखं प्रेषयेति रामोक्तिमनुस्मृत्य तेन (विभीषणेन) लेखप्रेषणं यदनुवाच्य रामेण तत्साहाय्यार्थं हनूमतः प्रेषणम् — हनूमतो महीपालदेवेन नियुद्धं तद्वधश्च

146

एकोनविंशः सर्गः (लङ्कोपद्रवोपाख्यानम्)

रावणवधानन्तरं मन्दोदर्याः पुत्रप्रसवः — वरणीसुराख्येन केनापि रावणभृत्येन वैणासुरवंशनाम्ने तस्मै रावणसुताय तत्पितृव्येन विभीषणेन रावणविषये यत्कृतं तस्य ज्ञापनं तेन च प्राप्तयौवनेन पितृव्यं हत्वा पितृवधस्य प्रतिशोधो विधेय इति कृतो निर्णयः — तदर्थं मलिवन्नरेशं चक्रवर्तीत्यभिधमुपगत्य साहाय्यार्थं तेन प्रार्थनं तेन च तदभ्युपगमे लङ्कापुरीं प्रस्थानम् — हनूमतः पुरा बेञ्जकय्यां प्रजातेनासुरफन्नाम्ना सुतेन तदापद्वारणार्थं क्वापि पर्वते हनूमांस्तपस्यतीति कुतोऽपि श्रुत्वा तदन्वेषणार्थं पर्वतात्पर्वतं प्रस्थानम् — पूर्वं कस्मिंश्चिद्वने हनुमताऽऽम्रैराकृष्टेन तद्भक्षणे प्रवृत्तेन तन्मुखनिःसरद्रसस्य मार्जनं कपिस्वभावात्सर्वेष्वङ्गेषु कृतवता स्वस्त्रीजनोपहास्यत्वम् — लज्जितेन तद्दोषोपक्षयार्थं तपश्चर्तुं कृतकामेन तेन दिष्फैल्क्रपेरुपगमनं, तेन कथं कपिस्तपः चर्तुं शक्नुयादिति प्रश्नसमाधानधिया तस्य मनुष्यरूपापादनं तद्रूपेण च तेन तपश्चरणं — तत्स्थितावसुरफदस्तदुपसत्तिः, दृष्टो भवता क्वापि हनूमानिति तं प्रति तत्प्रश्नः — अहमेव हनूमानिति तेन कथनम् — कथं मनुष्यरूपेणायं तपस्यन्मे पिता हनूमान् भवितुमर्हति तस्य कपित्वादिति तच्छङ्कायाः स्वशक्तिप्रदर्शनद्वारा निवारणम् — पितृपुत्रयोराकस्मिकः सङ्गमः — असुरफदा हनूमते लङ्कापुरीवृत्तप्रतिपादनं यच्छ्रुत्वा खिद्किन् (किष्किन्धा) पुरीमुपेत्य ततः सैन्यसङ्ग्रहं कृत्वाऽयोध्यापुरीमुपगत्य भरतशत्रुघ्नाभ्यां सह तस्य लङ्कापुरीं प्रति प्रस्थानम् — दीर्घीकृतेन नीलकलेवरेणात्र समुद्रसेतु-कार्यसाधनम् — उभयोरपि पक्षयोर्भीषणं युद्धम् — वैणासुरवंशवधः — विभीषणमोचनम् — ततो मलिवन्नगरं प्रति प्रस्थानम् — भरतेन ब्रह्मास्त्रप्रयोगेण मलिवन्नरेशस्य वधः — भरतेन तत्स्थाने हनूमतः सुवर्णमत्स्यायां प्रजातस्य पुत्रस्य मच्छानोरभिषेकः, चक्रवर्तिपुत्र्या रत्नमाल्यास्तदग्रमहिषीपदे च स्थापनम्

156

विंशः सर्गः (सीतानिर्वासनोपाख्यानम्)

अयोध्यायां सीतारामयोः सुप्रतिष्ठितत्वम् — एकदा रामेण वने गमनं सीतया च तद्विरहोष्माणं शमयितुं नद्यां स्नानार्थं गमनम् — तदानीमेव छिद्रं प्रपश्य शूर्पणखायाः पुत्र्याऽतुलेत्याख्यया सीताकृतकिङ्कर्या स्वमातुः पूर्वकृतदुर्व्यवहारप्रतिशोधार्थं दशमुखाकृतौ स्वं कुतूहलं प्रदर्श्य तच्चित्रणे सीतानुरोधस्तयाऽपि सखीस्नेहं तां प्रति बिभ्रत्या तत्स्वीकृत्योपलखण्डके दशमुखाकृतिचित्रणम् — तदानीमेव रामस्य प्रत्यागमनम् — तद्दृष्टिपरिहारार्थं सीतया तन्मार्जनोद्योगस्तत्रासाफल्येनातुलाकृतेन तदन्तः स्वस्य प्रवेशनेन तस्य भूयस्तरामपि स्फुटत्वेन च तस्य शयनाधस्तात्स्थापनम् — शयनमास्थितेन रामेणात्युष्णतानुभवः — तत्कारणान्वेषणार्थं प्रयुक्तेन लक्ष्मणेन शयनपरिवर्तने कृते तच्चित्रपरापतनम् — केनेदं कृतमिति रामप्रश्ने मम चेटीवचनानुसारतो मया कृतमिदमिति सीतावचः — राममनसि कदाचिद्रावणेऽनुरक्तैषेति सन्देहोद्गमः क्रोधश्च — हन्तव्येयमिति लक्ष्मणं प्रत्यादेशो हतायां च तस्यां तस्या हृदयं प्रमाणरूपेणोपस्थापयितव्यमिति चाज्ञा, तदनुसारेण सीतया सह लक्ष्मणस्य वनं प्रति प्रस्थानम् — तत्र क्वापि वृक्षस्याधस्तले सीतया

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

रामवचः पाल्यतामित्युक्तिः — लक्ष्मणस्य [illegible] प्रति शैथिल्यमभिलक्ष्य सीतया परुष-वचनैस्तदुद्दीपनं यद्वशात् तेन तस्यां खड्गनिपातनं तस्य च लक्ष्यच्युतिः — कदाचिद्दयावशादियमिति नेत्रे निमील्य पुनरपि बलात्तत्प्रहारस्तथापि सीताया अक्षतत्वं लक्ष्मणस्य पुनः सञ्ज्ञाहीनत्वेन भूमौ पतनम् — तदर्थं सीताविलापः — लब्धसञ्ज्ञेन लक्ष्मणेन सीतामहत्वैव प्रस्थानं मध्येमार्गं च कस्यापि मृतस्य हरिणस्य हृदयमुद्धृत्य सीताया इदमिति रामाय तत्प्रदर्शनम् — पशोरिवेदं जघन्यमिति तद् दृष्ट्वा रामस्योक्तिः

एकविंशः सर्गः (लवजन्मोपाख्यानम्) 172

प्रतिनिवृत्ते लक्ष्मणे सीताविलापः — तत्क्रन्दनमाकर्ण्येन्द्रेण महिषरूपं धृत्वा तत्समीप आगमनं तदक्षणोश्च कञ्चिद्विचित्रमेव भावं परिलक्ष्य सीतायास्तदनुगमनं — महिषस्य महर्षिवज्मृगाश्रम-सविधेऽवस्थितिः — तद्रुदितानुसारिणो महर्षेः सीतासमीप आगमनं तस्याश्च स्वकीयाश्रमे नयनं तत्र च निवासार्थं कुटीरकस्य तां प्रति निर्देशः — कालेन सीतया पुत्रप्रसवः — प्रसवकाले महेन्द्रपत्न्या स्वयं धात्रीकृत्यनिर्वाहो महर्षिणा च मङ्कुट इति तस्य नामकरणं जातकर्मादिसंस्कारनिर्वहणं च — अङ्गुलीयैका-भरणया सीतया स्वपुत्राङ्गुलावङ्गुलीयकस्य स्वाङ्गुलितोऽपहृत्य निवेशनम् — एकदा ध्यानमग्नमहर्षिसविधे स्वपुत्रं सन्निधाप्य नद्यां स्नानार्थं सीताया गमनं मध्येमार्गं स्वापत्यजातेन सह वृक्षाद् वृक्षं प्रकूर्दमानाः प्लवगीश्चावलोक्य कदाचित्तदपत्यजातं पतेत्, अहो अनवधानता आसामिति प्राकृतिकार्द्रभावात्ताः प्रति तद्वचः — तासां च वयं त्वत्तोऽधिकं सावधाना यद्वयं स्वापत्यजातं हृदये निदध्मो न च त्वद्वद् ध्यानमग्नऋषेः पार्श्वे इति तदुपालम्भवच आकर्ण्य प्रत्यावृत्य स्वपुत्रमृषिपार्श्वतोऽपनीय नदीं प्रति गमनम् — ध्यानभङ्गे सीतापुत्रमनवलोकयमानेन महर्षिणाऽनवगतवृत्तेन पुत्रविनाशः सीतायाः कृते दुःसहो भवेदिति नूलशिशुनिर्माणे प्रवृत्तिः — तदर्थं पाषाणखण्डे तत्समानाकृतिलेखनम् — अत्रान्तरे सपुत्रायाः सीतायास्तत्र प्राप्तौ लिखित-शिश्वाकृतिप्राणप्रतिष्ठा पूर्वविचिन्तिता सम्प्रत्यनपेक्षितेति तत्कथने सीताया नूलोऽयं शिशुर्मत्पुत्रसङ्क्रीडने सहायो भवेदिति तत्प्राणप्रतिष्ठायां तत्प्रेरणम् — तेन च तथैव करणम् — सीतयोभयोरपि बालयोः सम्यक् पोषणम्

द्वाविंश सर्गः (लवमङ्कुटरामसमागमोपाख्यानम्) 183

महर्षिवज्मृगस्याश्रमे वसतोर्बालयोर्दशवर्षव्यपगमः — एकदा निजाम्बाया अनुमत्या तयोर्दूरवने गमनं तत्र च लक्ष्यपरीक्षार्थं मङ्कुटेनैकस्मिन् महावृक्षे शरप्रहारस्तेन च तस्य द्विधा भवने महतः सांराविणस्योदयः — मयि नारायणे भूलोके स्थिते केनायं जनित इति तदन्वेषणाय रामस्याश्वमेधाहरणनिश्चयः — अश्वस्य ग्रीवायां यः कोऽपीममारोहेन्निरुन्ध्याद्वा स राजद्रोहीति दण्ड्यो भवेदिति लेखोऽतिसृष्टः — अश्वश्च स लेखश्च मङ्कुटदृष्टौ पतितौ — लेखो दृप्तवचोनिबद्ध इति तस्य क्रोधानलोद्दीप्तिः — तेनाश्वारोहणं वनान्तरे तद्वाहनं च — हनूमतस्तदसहनं — प्रतिरोधार्थमुद्यतं तं दृष्ट्वा तस्य मङ्कुटेन बाणेन निःसञ्ज्ञीकरणं — सञ्ज्ञालाभे च तेन बालवत्स्वरूपकरणं मङ्कुटं प्रति च जिघांसयाऽभिधावनं मङ्कुटेन पुनस्तस्य हतप्रायता-पादनं — कपिमपि सन्तं वाससी वसानं तं दृष्ट्वा न हन्तव्य इति धिया रज्जुभिस्तस्य बन्धनं स्वामिनमृते च न कश्चिदिमं मोचयितुं शक्त इति च व्यवस्थाकरणं — हनुमतो विलापः — भरतशत्रुघ्नयोरपि तद्बन्धनापाकरणे ऽशक्तिः — हनुमतोऽयोध्यायां श्रीरामोपगमनं तस्य दशां दृष्ट्वा च रामस्य बालौ दण्डयितुं वनागमनम् — तेन मङ्कुटस्य भर्त्सनम् — तयोर्युद्धम् — उभाभ्यामपि प्रयुक्तयोः शरयोर्लक्ष्य-च्युतिः — मङ्कुटशरस्य पुष्पराशिरूपेण परिणतौ रामपादाभिपूजनम् — रामस्य मङ्कुटविषये जिज्ञासा — सीताया अहं सुतो महर्षिवज्मृगाश्रमे निवसामीति तदुक्तिः — मत्पुत्रोऽयमिति रामस्य ज्ञानम् — तद्धृदि वात्सल्योदयः — सीताऽपि जीवतीति तस्य भूयस्तरां प्रमोदः — तां द्रष्टुमिच्छामीति तदुक्तिः — बालाभ्यां सह तस्य सीतोपगमनम् — बालाभ्यां च तस्यै वृत्तजातस्य निवेदनम्

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

 Digitized by Arya Samaj Foundation Chennai and eGangotri

193

त्रयोविंशः सर्गः (सीतापातालप्रवेशोपाख्यानम्) रामं दृष्ट्वा सीताया मनसि द्विविधभावोद्गमः, प्रथमं चिराददृष्टस्य तस्य दर्शनेन लोचनतृप्तिः, तदनु वधादेशाद्वने दशवर्षाणि यावच्च नानाकष्टसहनात्कठोरतोदयो मत्पुत्रकौ कष्टमापादयितुमयमत्रोपेत इति च शङ्कोदयः — रामेण सीतां प्रति पूर्वकृतापराधस्य क्षमापणम् अयोध्यापुरीं स्वेन सह गन्तुं च प्रार्थना — सीतया तदस्वीकारे स्वपुत्रकौ स्वेन सह प्रेषयितुमाग्रहः — निजस्यैकाकिताकष्टेऽपि पुत्रयोर्हितानुरोधेन तस्यास्तदर्थं स्वीकृतिः — पुत्रयो रामेण सहायोध्यापुरीं प्रति प्रस्थानम्

202

चतुर्विंशः सर्गः (सीतापातालप्रवेशोपाख्यानं पूर्वानुवृत्तम्) कञ्चित्कालं तत्रावस्थित्यनन्तरं तयोर्मनसि मातुः स्मृते-बालौ दृष्ट्वाऽयोध्यावासिजनप्रहर्षः — रुदयः — तयोस्तदुपगमनम् — तन्माध्यमेन त्वं मां नोपयासि चेन्ममाश्रुजालं मम प्राणहृत्स्यादिति रामेण सीतां प्रति सन्देशस्य प्रेषणं यच्छ्रुत्वा यद्येवं भवेत्तवान्तिमदर्शनार्थमयोध्यापुरीमुपैतास्मीति बालमुखेन तस्या रामं प्रति सन्देशः — कञ्चित्कालं सीतायां न्युष्य बालयोः स्वातातोपगमनं सीतासन्देशनिवेदनं च येन रामस्य मर्मवेधः — सीतासङ्गमाभ्युपायं चिन्तयमानस्य तस्य सीतावचस्येव तदुपलब्धिः — त्वद्वियोगार्ति-विदीर्णचेता रामो दिवं गत इति सन्देशस्य सीतां प्रति हनुमद्द्वारा तेन प्रेषणं यच्छ्रुत्वा सीताया अयोध्यागमनं विलपनं च — विलपन्त्यां तस्यां तिरस्करिण्यां प्रच्छन्नस्य रामस्य तत्पुरतः प्रकटीभावो येन सीताया प्रथममत्याश्चर्यं तदनु प्रवञ्चितास्मीति महान्क्षोभो रामेणात्मनः समर्पणेऽपि नाहमत्र स्थास्यामीति ततः प्रस्थानोपक्रमः — द्वाराणि सर्वतोऽत्र रुद्धानीति नेतो निर्गमनोपाय इति रामोक्तौ सीतायाः स्वेष्टदेवसम्प्रार्थने पृथ्व्याः स्वयं विदीर्णतेति विचित्रघटनाघटनम् — नागविरुण्णिति नाम्ना राज्ञा शासितस्य पाताललोकस्य राजधानीं प्रति सीतागमनम् — दृश्यमेतद् दृष्ट्वा सीतावियोगार्तस्य निःसञ्ज्ञस्य रामस्य भूमौ पतनम्

211

पञ्चविंशः सर्गः (सीतारामसमागमोपाख्यानम्) कालेन लब्धसञ्ज्ञस्य रामस्य स्वकार्यसक्तता — श्रीशङ्करादेशवशात्प्रतिशतवर्षमायोज्यमानस्य सृष्टिप्रपञ्चे यद्यद्वर्तते तस्य तस्य तत्तद्देवैर्विवरणोपस्थापनप्रयोजनकस्य देवसभस्यायोजनम् — तत्रेन्द्रादिभिर्देवैः सृष्टौ सर्वत्र वार्तस्य निवेदनं रामेण जिता राक्षसा मूषकवद्बिलेषु प्रविष्टा न कुत्रापि भयं नोपद्रवो वाऽभिलक्ष्येते इति च सूचनम् — यद्वशात्सर्वमिदं वृत्तं स रामः सीतावियोगेनाहर्निशं सन्तप्यते तेन भगवांस्तादृशमुपायं चिन्तयतु येन तदार्तिपरिहारः स्यादिति देवोक्तौ श्रीशङ्करेण रामश्च जानकी च देवसभ आनाय्येताम् — सीतामनुकूलयितुं प्रथमं स रामं निरभर्त्सयत् यथास्थितिमजानतैव सीतावधः समादिष्टः, हनुमन्मुखेन स्वमृत्युं प्रख्याप्य सीता वञ्चिता, तच्छ्रुत्वा समुपेतायाः सीताया निर्गम उपरुद्ध इत्यपराधत्रयं प्रख्याप्य सीतां तत्त्रयस्य कृते क्षमां याचस्वेति तदादेशः — रामेण सीतां क्षमायाचनम् — क्षमापणानन्तरं सीता रामं स्वीकरोत्विति शिवोक्तौ सीताया रामस्यास्थिरचित्तवृत्तिकत्वात्तत्राप्रवृत्तिः — मत्प्रसादरूपेण स्वीकुर्विममिति शिवोक्तौ तया तत्स्वीकारः — तेन रामस्य प्रहर्षः — ससीतस्य तस्यायोध्यापुरीं प्रत्या-गमनम् — प्रजानामनेन हर्षप्रकर्षः — रामेण नानायज्ञाहरणमतिविमलकीर्त्तिप्राप्तिश्च

26

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रथमः सर्गः

(उपोद्घातः)

(इन्द्रवज्रावृत्तम् उपजातिवृत्तञ्च)

अस्त्येशियानामनि सुप्रसिद्धे
द्वीपे विशालेऽतिविशालकीर्तिः ।
आग्नेयदिङ्मण्डलमौलिभूतो
देशोऽतिरम्यो भुवि थाइलैण्डः ।।1।।


श्यामेतिनामातिपुराणमस्य
ख्यातं पुराणादिषु यद्विहाय ।
थाईतिजात्यध्युषितत्वहेतो-
र्यं थाइलैण्डं कथयन्ति लोकाः ।।2।।

राजा प्रजारञ्जनमादधानः
सर्वात्मना बुद्धवचःप्रमाणः ।
अतुल्यतेजःपदवीं दधानः
प्रशास्ति यं भूमिबलाभिधानः ।।3।।

अकृष्टपच्यं खलु यत्र सस्यं
रम्यास्तथा शाद्वलभूमिभागाः ।
मन्दं प्रवान्तश्च यदीयवाता
आगन्तुकानां रमयन्ति चेतः ।।4।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri



CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

देशस्य तस्यास्ति भृशं विशाला
कण्ठे भुवः शुभ्रतरेव माला ।
ऐश्वर्यसौन्दर्यविलासधानी
बैंकाकनाम्नी खलु राजधानी ।।5।।[1]

(अनुष्टुब्वृत्तम्)

बैंकाकेति समाख्यास्या यद्यपि प्रथिता पुरः ।
तथाऽपि थाइदेशीया नैनयैतां प्रचक्षते ।।6।।

क्रुङ्थेवेत्यन्यदेवास्ति नाम तेषु प्रथां गतम् ।
प्रयुञ्जते तदेवैते न बैंकाकेति जातुचित् ।।7।।

क्रुङ्शब्दः थाइमूलोऽस्ति थेवः संस्कृतमूलकः ।
क्रुङ्शब्दार्थः स्थानमिति थेवो देवार्थको मतः ।।8।।

अपभ्रंशः थेवशब्दो देवस्यैवेत्यसंशयम् ।
गैर्वाण्या देवशब्दोऽत्र थेवरूपेण गद्यते ।।9।।

देवस्थानं भवेदर्थः क्रुङ्थेवस्येति निश्चितम् ।
नात्र कश्चिद्विसंवादो विदुषां परिलक्ष्यते ।।10।।

अतीता किञ्चिदधिका हायनानां शतद्वयी ।
पुरस्यास्य निविष्टस्य सुतरामृद्धिशालिनः ।।11।।

चक्रिवंश्या भूमिपालाः थाइदेशं प्रशासति ।
तन्मूलपुरुषः कश्चित्पुरमेतन्न्यवेशयत् ।।12।।

1. काव्यस्यास्य प्रथमपञ्चपद्यानि काव्यकर्तुरपरस्मात्काव्यात् थाइदेशविलासात्समुद्धृतानि ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रस्तुतौ रामगाथाया नाट्यरूपेण सा कृतिः ।
अधुनाऽपि नृपालस्य बहुधाऽस्योपयुज्यते ।। 23 ।।

मङ्कुटाख्यस्तत्परोऽभून्मान्यो भूपालसत्तमः ।
स्वबुद्ध्या रामगाथां यो व्याख्यत् ख्यातो मनीषिषु ।। 24 ।।

रामगाथाविषयिणी बह्वी तेन गवेषणा ।
कृता येन कृतिस्तस्य सुतरां ज्ञानवर्धिनी ।। 25 ।।

अनेकान् विषयान् गूढान् सम्बद्धान् रामगाथया ।
निपुणं स समालोच्य विशदं प्रत्यपीपदत् ।। 26 ।।

थाइदेश्यास्ततः पूर्वं नैवाजानन् मनागपि ।
रामायणस्य कर्ताऽऽसीद् वाल्मीकिर्मुनिपुङ्गवः ।। 27 ।।

थाइदेश्या रामगाथाऽभूदत्रास्याः समुद्भवः ।
नृपतेर्मङ्कुटात्पूर्वमित्येवं मेनिरे जनाः ।। 28 ।।

स एव नृपतिः कृत्या स्वया तान् प्रत्यबूबुधत् ।
यदस्या दिव्यगाथाया भारतेऽभूत्समुद्भवः ।। 29 ।।

साम्प्रतं शिक्षिता लोका इदं जानन्त्यसंशयम् ।
अशिक्षिताः पुनर्नैवं बुध्यन्ते स्वमते स्थिताः ।। 30 ।।

जनी रामस्य सीतायाश्चात्रैवाजन्यसंशयम् ।
रामरावणयोर्युद्धमत्रैव समजायत ।। 31 ।।

अयोध्या नाम नगरी देशेऽत्राद्यापि राजते ।
सञ्जीवनी यतो नीता सोऽद्रिरत्रैव दृश्यते ।। 32 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

लवस्य रामपुत्रस्य नाम स्वात्मनि बिभ्रती ।
पुरी लोपबुरी चापि देशेऽत्रैव विराजते ।। 33 ।।

शरेण राममुक्तेन सञ्जाता हरिता शिला ।
मध्येपुरि स्थिता यत्र रामं स्मारयतेऽनिशम् ।। 34 ।।

इत्येवं प्राकृता लोका गतानुगतिका इह ।
रामगाथां दृढं थाइदेशीयामेव मन्वते ।। 35 ।।

(इन्द्रवज्रावृत्तम् उपजातिवृत्तञ्च)

आत्मीयभावः परिलक्ष्यतेऽत्र
रामायणेऽन्यत्र सुदुर्लभो यः ।
दृश्यानि नाना विविधस्थलेषु
तस्मात्पुरा शिल्पिभिरङ्किंतानि ।। 36 ।।

आत्मीयभावेन हृदि स्थितेन
तेनैव नानाऽत्र कथानकानि ।
संयोजितानि प्रथयन्ति किञ्चिद्
रामायणस्यान्यदिव स्वरूपम् ।। 37 ।।

आस्ते पुनर्मूलकथा तथैव
तस्यां न भेदः परिलक्ष्यतेऽत्र ।
भेदः पुनर्भाति नवेषु सत्यं
कथानकेष्वेव न चेतरत्र ।। 38 ।।

स्फुटं भवेत्तावदनेन विज्ञ-
वर्गाय वैशिष्ट्यमिहास्ति यद्वा ।
नवीनमत्रास्ति विचारणीयं
रामायणे रामकथाभिरस्मे ।। 39 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वितीयः सर्गः

(अनोमतन्नुपाख्यानम्)

(अनुष्टुब्वृत्तम्)

अनोमतन्निति ख्यातो माननीयतमो नृणाम् ।
आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव ।।1।।

थाइरामायणे तावदित्थं तस्य समुद्भवः ।
वर्णितोऽस्ति नृपालस्य स्वयं जातस्य धीमतः ।।2।।

(इन्द्रवज्रावृत्तम् उपजातिवृत्तञ्च)

हिरन्तयक्षेति बभूव कश्चि-
न्मायाविनामग्रसरोऽसुरेन्द्रः ।
देवेषु यो विप्रचकार[1] शैले
वसन् विशाले किल चक्रवाले ।।3।।

तत्पीडिता देवगणा उपाय-
न्नुपायमन्यं न हि वीक्षमाणाः ।
देवाधिदेवं शरणं शरण्यं
कैलासवासं विपदां निरासम् ।।4।।

1. विरुद्धं चेष्टितवानित्यर्थः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

एकोऽत्र नारायण एव सत्यं
नाशेऽसुरस्यास्य भवेत्समर्थः ।
इत्थं विचिन्त्य प्रभुरीश्वरो द्राक्
तमेव तावन्मनसा जगाम ।।5।।

उपस्थितोऽभूत्स्मृतमात्र एव
नारायणः पर्वतजाप्रियेण ।
पप्रच्छ चैनं किमु मेऽस्ति कार्यं
स्मार्यत्वकोटिं गमितोऽस्मि येन ।।6।।

तमीश्वरः प्राह हिरन्तयक्ष-
नामासुरः पीडयते सुरौघम् ।
त्रस्तश्च भीतश्च कदर्थितश्च
मामद्य येनायमभिप्रपन्नः ।।7।।

लोके प्रपन्नार्तिहरो मतोऽह-
मतो विपन्नं शरणं प्रपन्नम् ।
देवौघमेनं परिरक्षितुं मे
विष्णो ! द्रढीयान् मनसोऽभिलाषः ।।8।।

एनं भवान् मे मनसोऽभिलाषं
सर्वात्मना पूरयितुं समर्थः ।
अतो भवान् यातु च हन्तु चैनं
दुर्दानवं पातु च देवसङ्घम् ।।9।।

एवं प्रयुक्तः परमेश्वरेण
नारायणो लोकपरायणोऽसौ ।
सम्प्रस्थितोऽद्रिं प्रति चक्रवाल-
नाम्ना प्रसिद्धं तमुपागमच्च ।।10।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

आयोधयामास च तत्र भीमं
स दानवं नाम हिरन्तयक्षम् ।
शस्त्रैस्सुतीक्ष्णैरतिपापवृत्तिं
देवार्दकं तं निजघान चापि ।।11।।

निहत्य चैनं समुपाजगाम
क्षीराम्बुधिं नाम निजालयं सः ।
उपागतश्चापि ददर्श तत्र
पद्मे शयानं शिशुमेकमेषः ।।12।।

एनं समादाय स आशु दोर्भ्यां
कैलासशैलं समुपाजगाम ।
सन्दर्शयामास तमीश्वरं च
समर्पयामास मुदा च तस्मै ।।13।।

अनोमतन्नित्यथ नामधेयं
तस्मै ददावीश्वर आशुतोषः ।
राजा भवत्वेष शिशुः शुभाङ्ग
आद्यः पृथिव्या इति चादिदेश ।।14।।

तस्याभवद्राजवरस्य राज-
धानी सुरम्या खलु पुर्ययोध्या ।
महेश्वरादेशवशंवदेन
स्वयं महेन्द्रेण निवेशिता या ।।15।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

निवेशनार्थं स्वपुरात्स पुर्याः
शक्रो यदा प्रास्थित दिव्यशक्तिः ।
मध्येपथं दैववशात्तदानीं
स सङ्गतोऽभूदृषिभिश्चतुर्भिः ।। 16 ।।

अछन्गवीदाहयुगाग्रयाग-
सञ्ज्ञा अभूवन्नृषयो वरास्ते ।
तन्नामधेयादिममक्षरौघ-
माश्रित्य पुर्याः कृतमास्त नाम ।। 17 ।।

(प्रहर्षिणीवृत्तम्)

सम्प्राप्तो जननमनोमतन्नृपस्य
सत्पुत्रो दशरथ इत्युदारसत्त्वः ।
तस्याभूदखिलजगन्नमस्यंभूतः
श्रीरामो गुणगणमण्डितस्तनूजः ।। 18 ।।

तस्यैवाखिलजनवन्दितस्य दिव्यं
चारित्रं विशदमुपास्य रामभक्ताः ।
गायन्ति स्वरचितकाव्यमाध्यमेन
तत्काव्यं प्रसरति रामकीर्तिनाम्ना ।। 19 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

9

Digitized by Arya Samaj Foundation Chennai and eGangotri

तृतीयः सर्गः

(श्रीरामजन्मोपाख्यानम्)

(पूर्वपीठिका)

(अनुष्टब्वृत्तम्)

कौसल्या च सुमित्रा च कैकेयीत्यभिधानिकाः ।
तिस्रो दशरथस्यासन् महिष्यो भुवि विश्रुताः ।।1।।

सतीष्वपि सतीष्वस्य तासु नैवाप भूपतिः ।
सुतं तेन च खेदोऽस्य महांश्चित्तेऽभ्यवर्तत ।।2।।

कलैकोटिसमाख्यस्य साहाय्येन ऋषेरसौ ।
यज्ञं पुत्रेष्टिनामानमचिकीर्षन्मृगाकृतेः ।।3।।

स यज्ञाहरणात्पूर्वं परामर्ष्टुं समैहत ।
ईश्वरं, स ययौ तस्मात्कैलासं गिरिमुत्तमम् ।।4।।

उत्पीडितं च भीतं च तदाऽऽसीद् भुवनत्रयम् ।
ब्रह्मविष्ण्वीश्वरावाप्तवरोन्मत्तासुराधमैः ।।5।।

जायते पुत्ररूपेण यदि नारायणः स्वयम् ।
राज्ञो दशरथस्य स्यात् तदा रक्षाऽस्य निश्चितम् ।।6।।

ईश्वरेणानुरोद्धव्यः स इति प्रत्यपीपदत् ।
तमृषिर्लोकलोकेशं लोकसङ्ग्रहमिच्छुकः ।।7।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ओमित्युवाच तमृषिमीश्वरः सद्य एव च ।
न्यमन्त्रयत देवेशं प्रभुं नारायणं तदा ।।8।।

तन्निमन्त्रणमासाद्य नारायण उपागमत् ।
कैलासशैलं त्वरितं समगंस्तेश्वरेण च ।।9।।

परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
भवान् दशरथापत्यं भवत्विति मतिर्मम ।।10।।

एवमुक्तो महेशेनोमित्युवाच रमापतिः ।
एवं भविष्यति यदि शङ्खचक्रगदा मम ।।11।।

अनन्तनागेन समं लक्ष्म्या चापि महेश्वर ।
मनुष्यरूपेण महीमागच्छेयुर्मया सह ।।12।।

तथास्त्विति महेशस्तं प्रत्युवाच ययौ स च ।
ऋषिं तदोन्मुखीभूय महेश इदमुक्तवान् ।।13।।

निवर्तस्व ऋषे! तावदयोध्यामाहरस्व च ।
पुत्रेष्टियज्ञं यद्वह्नेर्दिव्यः कश्चन पूरुषः ।।14।।

प्रदीप्तसर्वावयवो दिव्याभरणभूषितः ।
अन्नपिण्डान् करे गृह्णन् चतुरः प्रकटीभवेत् ।।15।।

दक्षिणस्या दिशः कश्चित्तस्मिन्नेव क्षणे ऋषे! ।
समापत्यान्नपिण्डार्धमाच्छिद्यैवोत्पतिष्यति ।।16।।

पिण्डानामवशिष्टौ द्वौ भोजयेर्महिषीर्ऋषे ! ।
राज्ञ्यो येन भवेयुस्ता अन्तर्वत्न्यः शुभाङ्गनाः ।।17।।

जनयेयुः सुतांश्चापि चतुरश्चतुराञ्शुभान् ।
येन लोकस्य कल्याणं भविष्यति भविष्यति ।।18।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तथैव सर्वं सम्पन्नं यथोचे प्रभुरीश्वरः ।
प्रभोर्वाक्यं महेशस्य न कदाप्यन्यथा भवेत् ।। 19 ।।

कौसल्यातः प्रजातोऽभूत्स्वयं नारायणः प्रभुः ।
रामरूपेण हरितवर्णो वर्ण्यो विपश्चिताम् ।। 20 ।।

चक्रं भरतरूपेण कैकेय्या गर्भतोऽभवत् ।
रक्तवर्णो भृशं रक्तः स्वभ्रातुः पादपङ्कजे ।। 21 ।।

नागशङ्खे उभे जाते सुमित्रागर्भतस्तदा ।
सम्भूयैव पीतवर्णलक्ष्मणाकृतिधारिणी ।। 22 ।।

गदा शत्रुघ्नरूपेण जाता पुत्रोऽरुणाकृतिः ।
तस्या एव सुमित्राया गर्भतो भ्रातृवत्सलः ।। 23 ।।

(इन्द्रवज्रावृत्तम्)

एवं पृथिव्यामवतीर्ण आसी-
न्नारायणो लोकपरायणः प्राक् ।
स्वैर्वाहनैः शङ्खगदात्रिशूल-
चक्रैस्तदीयानुजरूपधृद्भिः ।। 24 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

चतुर्थः सर्गः

(नन्दकोपाख्यानम्। रावणस्य पूर्वजन्मवृत्तान्तः)

(इन्द्रवज्रावृत्तम् उपजातिवृत्तञ्च)

नारायणस्य ह्यवतारकाले
लङ्कापुरीं राक्षसजातिमुख्यः।
शशास जेता भुवनत्रयस्य
दशाननो वेदविदां वरेण्यः ।।1।।

भ्रातॄनसौ स्वान् भृशमत्यशेत
वीर्येण वीरानपि योद्धृवर्यः।
तत्पूर्वजन्मार्जितकर्मणोऽभूत्
प्रभावतः कर्मगतिर्विचित्रा ।।2।।

अभूत्पुरा नन्दकसञ्ज्ञकोऽसौ
कैलासशैले किल देवयोनिः।
महेश्वरं द्रष्टुमुपागतानां
प्रक्षालयन् पादयुगं सुराणाम् ।।3।।

स सेवकत्वेन नियुक्त एवं
विनोदभाङ् निर्जरसां बभूव।
उपाहसंस्ते . समुपेयिवांस-
स्तं शीर्षकेशोद्धरणक्रमेण ।।4।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

नारायणेन च्छलितोऽस्मि तावद्
बुद्ध्वेति दुःखार्दितचित्तवृत्तिः ।
नारायणं नन्दक आह नैतत्
कृतं त्वया साधु विजानताऽपि ।। 16 ।।

नारायणेनापि समाश्रितोऽभूत्
पन्थास्त्वया निन्द्यतमो जगत्याम् ।
नारायणस्तन्निशमय्य वाक्यं
तमाह यद्येवमिहास्ति ते धीः ।। 17 ।।

विधानमेवं विदधामि तर्हि
यत्त्वं प्रजातो जननान्तरे स्याः ।
दशाननो विंशतिबाहुकश्च
जायेय चाहं द्विभुजैकशीर्षः ।। 18 ।।

योत्स्ये त्वयाऽहं च तथास्थितस्त्वां
सम्प्रापयिष्ये च यमस्य धाम ।
उक्त्वैवमेनं परिसान्त्वपूर्वं
नारायणस्तस्य वधं चकार ।। 19 ।।

(अनुष्टुब्वृत्तम्)

स एव नन्दको नाम दशवक्त्रोऽन्यजन्मनि ।
अभवद्रामभद्रश्च प्रभुर्नारायणोऽभवत् ।।20 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

(सीताजन्मोपाख्यानम्)

(अनुष्टुब्वृत्तम्)

दशवक्त्रस्वरूपेण स्थितोऽसौ पृथिवीतले ।
समुद्रपरिखां लङ्कामशिषद्‌वृद्धिशालिनीम् ।। 21 ।।

नैकासु तस्य राज्ञीषु मन्दोदर्यामवर्तत ।
प्रेमातिशय इत्यस्याः स वचो बह्वमन्यत ।। 22 ।।

आघ्राय गन्धं पिण्डानां प्रसरन्तं चतसृषु ।
दिक्षु सोचे स्वभर्तारमशनायामि तानिति ।। 23 ।।

समादृतस्तद्वचसि स आहासुरयोषितम् ।
काकनानामिकामेकां पिण्डान्सत्वरमाहर ।। 24 ।।

काकरूपं समाधृत्य ययावुत्तरकोसलान् ।
पिण्डानामर्धभागं च समापत्योद्दधार सा ।। 25 ।।

उद्धृत्य तानानिनाय पुरीं लङ्कां ददौ च सा ।
रावणाय नृपायैतान् मन्दोदर्यै ददौ च सः ।। 26 ।।

तानशित्वा बभूवान्तर्वत्नी मन्दोदरी तदा ।
क्रमेण सुषुवे चापि कन्यामेकां विलक्षणाम् ।। 27 ।।

जातमात्रैव सा कन्या रावणो हन्यतामिति ।
त्रिरवादीद्वचो नो च पित्रोस्तच्छ्रोत्रमापतत् ।। 28 ।।

राध्यन्तोऽस्यै कन्यकायै विभीषणपुरोगमाः ।
अनेके शास्त्रनिष्णाता गणकाः समजीगणन् ।। 29 ।।

दशकण्ठकुलध्वंसं लङ्काविध्वंसमेव च ।
यच्छ्रुत्वा दशकण्ठोऽभूदाकण्ठं भयपीडितः ।। 30 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

विभीषणं भ्रातरं च बभाण स भयार्दितः ।
कन्याया विषयेऽमुष्या यथेच्छसि तथा कुरु ।। 31 ।।

विभीषणो घटे न्यास्थत्कन्यामाह च किङ्करम् ।
तरङ्गिण्यां घटोऽयं भोः ! सत्वरं क्षिप्यतामिति ।। 32 ।।

(इन्द्रवज्रावृत्तम् उपजातिवृत्तञ्च)

क्षिप्तो बभूवाथ घटः क्षणेन
विभीषणादेशवशंवदेन ।
तत्किङ्करेण, प्रबभूव हन्त!
तरङ्गिणी मज्जयितुं न तं च ।। 33 ।।

कन्या हि लक्ष्म्या अवतार आसीद्
अतः प्रभावादुदपादि तस्याः ।
मध्येनदि व्याप्तविचित्रगन्धं
पद्मं यदात्मन्यधि कुम्भमाधात् ।। 34 ।।

लक्ष्म्याः प्रभावेण च कुम्भ एष
तरंस्तरङ्गेषु सुखं तटिन्याः ।
योगीव पद्मासनमाप्रपन्न-
स्तस्यास्तटं तत्समुपाजगाम ।। 35 ।।

यत्रास्त राजा ऋषिवेषधारी
नाम्ना ऽतपस्यज्जनको मनस्वी ।
स्नानार्थमस्यास्तटमीयिवान् स
पद्मे शयानं घटमालुलोके ।। 36 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

गृह्णात्विमं, तच्च तथा बभूव
द्राक् तत्र पद्मं प्रकटीबभूव ।। 42 ।।

कुम्भं तदाऽतिष्ठिपदत्र पद्मे
देवांश्च कन्याकुशलं समन्तात् ।
ऋषिः स सम्प्रार्तथतातिभक्त्या
ततो न्यवर्तिष्ट तपस्यितुं च ।। 43 ।।

तपस्यतः षोडश तस्य याताः
संवत्सरा घोरतमां तपस्याम् ।
सिद्धिश्च नाप्ताऽभवदित्यनेन
नातः परं तप्तुमसौ चकाङ्क्ष ।। 44 ।।

ववाञ्छ चापि प्रतिगन्तुमेष
स्वमेव राज्यं पुनरेव राजा ।
प्राक् तत्र गन्तुं स्मृतिरुद्बभूव
तस्यान्तरङ्गे विमले घटस्य ।। 45 ।।

स्वसेवकं सोममसावुवाच
त्वं याहि वृक्षं निखनाशु चैव ।
तन्मूल एकं घटमानयेश्च
तदेव चक्रे च वशंवदः सः ।। 46 ।।

दीर्घं खनंश्चापि यदा स नाप
घटं तदा म्लानमुखो नृपं सः ।
उपेयिवान्वृत्तमदश्च दुःखा-
न्यवीविदत्तं स च तं समाह ।। 47 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्वं राजधानीं मिथिलाभिधानां
प्रयाहि तस्याश्च समानयस्व ।
हलैः खनित्रैश्च सुसज्जितानि
सैन्यानि पृथ्वीप्रविदारणाय ।। 48 ।।

यदा चिरायापि न तानि शेकुः
कुम्भं समासादयितुं तदानीम् ।
हलं नृपालः स्वयमेव धृत्वा
समुद्यतो भूमिविकर्षणेऽभूत् ।। 49 ।।

तत्कालमेव प्रकटो घटोऽभूत्
तन्मध्य आसीच्च विलोभनीया ।
अध्यासती पङ्कजपत्रपङ्क्तिं
दिव्यस्वरूपा खलु कन्यकैका ।। 50 ।।

गण्डच्छविन्यक्कृतपुण्डरीका-
ममूं विशालायतपक्ष्मलाक्षीम् ।
हेमद्युतिं चन्द्रमरीचिगौरीं
दृष्ट्वा जना विस्मयमभ्युपायन् ।। 51 ।।

यतोऽभवल्लाङ्गलकृष्टसीता-
समुद्भवोऽस्या अत एव नाम ।
सीतेति तस्या अभवत्पितेति
ख्यातश्च पृथ्व्यां जनको बभूव ।। 52 ।।

(सीताविवाहोपाख्यानम्)

तया समं संन्यवृतत्तपस्वी
स्वां राजधानीं जनको नृपेन्द्रः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

विवाहयोग्यामवलोक्य तां च
स्वयंवरं संरचयाम्बभूव ।।53।।

दिग्भ्यो विदिग्भ्यः समुपेयिवांस-
स्तद्वृत्तमाकर्ण्य महीमहेन्द्राः ।
अनिन्द्यसौन्दर्यमयीं तनूजा-
मुद्वोढुकामा मिथिलाधिपस्य ।।54।।

स्वयंवरे शार्वमसौ न्यधत्त
शार्ङ्गं तदर्थं च विधिं व्यधत्त ।
आरोपितज्यं य इदं विदध्यात्
स मे तनूजां परिणेतुमर्हः ।।55।।

ज्यारोपणस्यात्र तु का कथाऽऽसी-
न्नैकोऽपि राजन्यजनेषु शक्तः ।
आसीत्समुत्थापयितुं महेश-
शार्ङ्गं गरीयस्त्ववशादमुष्य ।।56।।

उपस्थितस्तत्र सलक्ष्मणोऽभूत्
स्वयंवरे कौशिकसम्प्रयुक्तः ।
रामोऽभिरामोऽपि युवत्वमाप्तो
रामाभिसम्प्रार्थनयोपपन्नः ।।57।।

उत्थापयामास धनुः प्रवीरः
शार्वं गरीयो ननु हेलयैव ।
उत्थापने तच्च बभूव भग्नं
स सीतया चापि वृतो बभूव ।।58।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

यथाभिकाङ्क्षं समुपस्थितं सन्
मद्धस्तगामित्वमुपैत्विदं द्राक् ।
रामः स रामासुरमेवमुक्त्वा
विसर्जयामास रघुप्रवीरः ।।64।।

(अनुष्टुब्वृत्तम्)

एवं रामासुरे पूर्वं निर्जिते निर्जितेन्द्रियः ।
क्रममाणः पथा स्वेन रामोऽयोध्यामुपागमत् ।।65।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पञ्चमः सर्गः

(रामवनवासोपाख्यानं जिह्वोपाख्यानं च)

(इन्द्रवज्रावृत्तम् उपजातिवृत्तञ्च)

प्राप्ते तु रामे स्वपुरीमयोध्यां
राज्येऽभिषेक्तुं जनकस्तमैच्छत् ।
कुब्जाप्रयुक्ता नहि केकयानां
वंश्याऽभ्यनन्दत्त्विदमस्य पत्नी ।।1।।

कुब्जाभिधाना परिचारिकाऽऽसीत्
प्रिया भृशं केकयराजपुत्र्याः ।
द्वेषस्य भावं रघुनन्दने या
न्यधाद्धृदि प्राक्चरितापमानात् ।।2।।

क्रीडारसादल्पवयाः कुमार-
स्तत्कुब्जपृष्ठं तरसा जघान ।
कुब्जत्वमस्या यत आश्वपागात्
सत्सङ्गमेनेव कुबुद्धिदोषः ।।3।।

क्रीडारसाद्दाशरथिः पुनश्च
किञ्चित्क्षणानन्तरमेव रामः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

बाणेन तस्यां प्रजहार येन
कुब्जत्वमस्यां प्रकटीबभूव ।।4।।

सर्वेऽपि पार्श्वस्थजना अनेन
दृश्येन तावद्धसितुं प्रवृत्ताः ।
अहो! जनानामुपहासपात्रं
रामेण नीता ऽस्म्यहमित्थमत्र ।।5।।

अनेन तस्या हृदयान्तरिक्ष-
मुद्वेगमेघान्तरितं बभूव ।
बालस्य लीलाऽपि विमुग्धभावा-
दत्यन्तमुद्वेगकरी भवेन्नु ।।6।।

निजावमानं निजमानसे सा
कुब्जा दधौ शल्यमिवार्त्तिदायि ।
वमाननायाः[1] प्रतिकारवेला-
मुदीक्षमाणा व्यनयच्च कालम् ।।7।।

वक्रा शरीरेण च चेतसा च
स्थिताऽभवत्साऽवसरप्रतीक्षा ।
राज्याभिषेको रघुनन्दनस्य
तस्याः कृते सोऽवसरो बभूव ।।8।।

पूर्वापकारप्रतिशोधनाय
दन्दह्यमाना हृदयेन कुब्जा ।
मत्वोपयुक्तावसरं जगाम
सा सत्वरं केकयराजपुत्रीम् ।।9।।

1. वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोरित्यनेनाकारलोपे रूपम्।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri
उवाच चैनां तनयः सपत्न्याः
राज्येऽभिषिक्तो भवतीति वृत्तम् ।
ज्ञात्वाऽपि किं त्वं न कमप्युपायं
विचिन्तयस्यद्य विचारमूढा ।। 10 ।।

रामेऽभिषिक्ते नृपतौ पुरेऽत्र
का ते दशा वा भरतस्य वा स्यात् ।
अकालहीनं तत आश्रयस्व
कमप्युपायं न चिरं विधेहि ।। 11 ।।

दन्दह्यमाने भवनेऽग्निना स्यात्
कूपस्य तावत्खननं वृथैव ।
नो चेन्मतिस्ते स्फुरतीह भद्रे!
मतिं मम त्वं समुपाश्रयस्व ।। 12 ।।

स्मरस्यपि त्वं समराङ्गणे यद्
युद्धेऽसुरैः प्राणपणेन पूर्वम् ।
कष्टं प्रपन्नं पतिमभ्यरक्षः
सोऽदाद् वरौ ते च भृशं प्रतीतः ।। 13 ।।

याचस्व तौ सम्प्रति तं वरेण्ये
तदीयकालः समुपस्थितोऽद्य ।
नैवं यदि त्वं प्रविधास्यसि द्राक्
कालः पिबेत्तद्रसमेव नूनम् ।। 14 ।।

रामस्य वर्षाणि चतुर्दश त्वं
वनेऽधिवासं, भरतस्य चापि ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तथास्त्विति प्रत्यशृणोद्दशास्यं
जिह्वो ररक्षावहितः पुरीञ्च ।
नक्तन्दिवं सोऽयमतन्द्रितः सन्
कार्ये स्वके दत्तमना बभूव ।। 21 ।।

न सप्त रात्रीरशयिष्ट जिह्वो
निद्रां विजेष्येऽहमिति प्रणुन्नः ।
तदाऽवहेलाप्रतिशोधभावा-
दिवैनमाक्रान्तवती तु निद्रा ।। 22 ।।

लङ्कापुरीरक्षणमस्तु सुप्ते
कथं मयीति प्रतिपन्नचिन्तः ।
दीर्घीचकारासुर एष जिह्वां
तयाऽऽवृणोच्चापि समस्तलङ्काम् ।। 23 ।।

दुष्कर्मरेखा विततेव जिह्वा
तां पातयामास तमस्यनन्ते ।
अत्रान्तरे तामुपसेदिवान्नो
मार्गं प्रवेशाय दशास्य आप ।। 24 ।।

चिच्छेद जिह्वां तरसा तरस्वी
ततः स लङ्कामभिगन्तुकामः ।
छेदे च तस्याः पतितो बभूव
जिह्वो व्यसुस्तत्क्षणमेव भूमौ ।। 25 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ततोऽनु बुद्ध्वा सकलं यथावद्
वृत्तं पुलस्त्यस्य सुतोऽनुतेपे ।
शुचा परीतोऽन्तिमकृत्यजातं
चकार रक्षोविधिना च तस्य ।। 26 ।।

(विद्युन्मालावृत्तम्)

अज्ञानेनान्याय्यं भूयो
लोकः कुर्यात् कृत्यं लोके ।
पश्चात्तापो येनास्य स्याद्
दुःखं चित्ते प्रादुःष्याच्च[1] ।। 27 ।।

1. प्रादुः ष्यात् = प्रकटीभवेत्। उपसर्गप्रादुर्भ्यामस्तिर्यच्परः (8.3.37) इत्यनेन षत्वम्।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

षष्ठः सर्गः

(सीताहरणोपाख्यानं जटायुवधोपाख्यानं च)

(इन्द्रवज्रावृत्तम् उपजातिवृत्तञ्च)

पत्यौ गते कर्मजितावनिं स्वां
स्वं जीवितं शून्यमिवाकलय्य ।
स्वकुम्भकाशाभिधपुत्रवक्त्र-
सन्दर्शनेच्छामिषतो न्यगादीत् ।।1।।

सहोदरं शूर्पणखा, दशास्य!
पत्युर्विहीना कथमत्र दीना ।
विनोदयेय स्वमिति प्रबुध्य
पुत्रं यियासामि निवस्तुमस्मिन् ।।2।।

पुत्रस्य सन्दर्शनमास्त नूनं
व्याजो मनस्यन्यदिवास्त तस्याः ।
सा पुंश्चली कामविकारजुष्टा
निजार्थमन्यं पतिमाचकाङ्क्ष ।।3।।

अन्वेष्टुकामा तमिमं प्रयाता
तदेव तावद्वनमास्त यत्र ।
रामः ससीतः सहलक्ष्मणश्च
कालं स्वकं यापयितुं प्रवृत्तः ।।4।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri



CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

यदैव दृष्टौ रघुनन्दनोऽस्याः
पपात विद्धा ह्यभवत्तदैव ।
पञ्चेषुबाणैरसुराङ्गना सा
रामे न कस्याभिरमेत दृष्टिः ।।5।।

मायावशात्सा परिवर्त्य रूपं
विलोभनीयाकृतिमादधाना ।
सुराङ्गनानामपि लोभनीयं
रामं सकामाऽभिससार रामा ।।6।।

रामस्तु तस्यां रुचिमादधान्नो
सदैकपत्नीव्रतमादधानः ।
तच्चित्रमस्याः कृत आस्त नार्य-
शीलं विदू राक्षसनार्य आर्यम् ।।7।।

ततः समन्तादवलोकयन्ती
ददर्श सैकत्र विदेहपुत्रीम् ।
स्वस्मिंश्च तां सा विपरीतभावे
हेतुं विजज्ञे रघुनन्दनस्य ।।8।।

एषा नु यावद् ध्रियते न तावत्
रामानुकूल्यं मयि सम्भवि स्यात् ।
नैकत्र कोशेऽसियुगं सह स्या-
दित्येवमात्मन्यधि सम्प्रधार्य ।।9।।

सा राक्षसीरूपमभिप्रपन्ना
तां हन्तुमभ्यद्रवदात्तवेगा ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

इमां तवार्थं समुपानयन्त्या-
मुपायनं लक्ष्मण आपतन्माम् ।
कृत्वा विरूपामथ मां स मत्तो
मत्तोऽच्छिनत्तां जनकस्य पुत्रीम् ।। 16 ।।

स त्वं प्रयाहि त्वरयोपपन्नो
हरस्व चैनां कमनीयकान्तिम् ।
ममापमानं प्रतिशोध्य चैव
तद्रामरामारमणं विधेहि ।। 17 ।।

श्रुत्वा स सौन्दर्यकथाममुष्याः
स्वसुर्मुखात् कामशरानुविद्धः ।
सीतां निजाङ्कानुगतां विधातु-
मुपायसञ्चिन्तनतत्परोऽभूत् ।। 18 ।।

आहूय मारीचमुवाच कञ्चित्
स राक्षसं राक्षसजातिमुख्यः ।
मारीच हे! हेममृगो भव त्वं
प्रयाहि रामस्य कुटीरकं च ।। 19 ।।

मायाविनामग्रसरः स एवं
मारीचनामा विदधेऽसुराग्र्यः ।
संकूर्दमानः प्रकटीबभूव
कुटीरकाग्रे च रघूद्वहस्य ।। 20 ।।

असम्भवं हेममृगस्य जन्म
तथाऽपि सीता लुलुभे मृगाय ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रायः समासन्नपराभवाणां
धियो विपर्यस्ततरा भवन्ति ।। 21 ।।

सा प्राह भर्त्तारममुं मदर्थं
विचित्ररूपं मृगमानयस्व ।
न चानुमेने सहसा च तत्स
मायाऽसुराणामिति बोधयंस्ताम् ।। 22 ।।

भूयोऽपि तस्यां हठमाश्रयन्त्यां
तदीयवाञ्छापरिपूरणाय ।
मृगं ग्रहीतुं स जगाम धीरो
न च ग्रहीतुं तमभूत्स शक्तः ।। 23 ।।

वनान्तरं दूरतरं गते स
तस्मिञ्शरं प्राणहरं मुमोच ।
येन प्रविद्धो मृग आर्त्तनादं
हा जानकीति प्रविनद्य नष्टः ।। 24 ।।

श्रुत्वा तु तप्तायससन्निभं तं
सीता समुद्वेगमपारमाप ।
सम्प्रेषयामास च लक्ष्मणं सा
शीघ्रं तदीयाग्रजरक्षणाय ।। 25 ।।

अत्रान्तरे तत्र समापतद् द्राक्
लङ्केश्वरः सन्धृतसाधुवेषः ।
सहायहीनां च जहार सीतां
लङ्कापुरीं तामनयच्च भीताम् ।। 26 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मध्येपथं तच्छ्वशुरस्य मित्रं
जटायुनामा किल गृध्रराजः ।
जरातुरः सन्नपि तं रुरोध
सर्वं तदाश्चर्यकरं बभूव ।। 27 ।।

तीक्ष्णेन तुण्डेन स पक्षिराजो
दशाननं तं बलवत्तुतोद ।
असिप्रहारा इव तत्प्रहारा-
स्तस्मायसह्याः सुतरामभूवन् ।। 28 ।।

यत्नं श्रयित्वाऽपि दशाननस्तं
दिशां विजेता न शशाक हन्तुम् ।
विकत्थनस्तं स तदा बभाषे
स्वं वीर्यमाख्यापयितुं जटायुः ।। 29 ।।

तवासिना वा विशिखेन वाऽहं
शस्त्रेण वाऽन्येन कथञ्चनापि ।
हन्तुं न लोकत्रितयेऽपि शक्य-
स्तथाविधा मे खलु शक्तिरस्ति ।। 30 ।।

माहेश्वरं केवलमङ्गुलीयं
सीताङ्गुलिप्रत्ययमादधानम् ।
शक्नोति मां हन्तुमतो वृथा ते
शस्त्राणि चास्त्राणि च मूढबुद्धे! ।। 31 ।।

श्रुत्वादसीयं वचनं स्मयोक्तं
क्षणात्प्रसुप्तोत्थितवद्दशास्यः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सीताङ्गुलेर्द्रागपकृष्य धूर्त-
स्तदङ्गुलीयं प्रजहार तस्मिन् ।। 32 ।।

तदङ्गुलीयप्रहृतः स पक्षी
विदेहजास्त्रैः सममेव हन्त ।
प्राणान् प्रियान् स्वान् विमुमोच वीरो
लोकान्स्वपुण्यौघजितान् ययौ च ।। 33 ।।

अत्रान्तरे राघववीरमुख्यौ
कुटीरकं स्वं प्रति संनिवृत्तौ ।
सीतामदृष्ट्वा व्यथितान्तरङ्गौ
तन्मार्गणे स्वां मतिमादधाते ।। 34 ।।

आहिण्डमानौ विपिनान्तरेषु
तौ दृष्टवन्तौ किल गृध्रराजम् ।
हतेऽपि यस्मिन् न समत्यजद्यं
विशेषकार्यान्तरितो यदात्मा ।। 35 ।।

रामं दशास्येन शठेन तावद्
विदेहजाया हरणं स ऊचे ।
सीताङ्गुलीयं च समर्प्य तस्मै
कृती विशश्राम सुखं स आत्मा ।। 36 ।।

अन्त्येष्टिकृत्यं कृतिनो जटायो-
स्तस्यात्मनीनस्य विधातुमिच्छुः ।
मुमोच रामः शरमेकमारा-
च्चितां भृशं यो ज्वलयांबभूव ।। 37 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

शरेण चान्येन स गृध्रदेह-
मारोपयामास शनैश्चितायाम् ।
दग्धे च देहे स शरेण ताव-
दन्येन वह्निं शमयाम्बभूव ।। 38 ।।

एवं विनिष्पाद्य विचित्ररूप-
मन्त्येष्टिकृत्यं विहगोत्तमस्य ।
दशास्यसम्मार्गणसम्प्रयुक्तः
स दक्षिणाशां प्रति सम्प्रतस्थे ।। 39 ।।

(पुष्पिताग्रावृत्तम्)

कथमपि जनकात्मजाविहीनः
समयमयापयदात्मनि प्रलीनः ।
अविरतगमनाच्छ्रमं प्रपन्नो
दशरथवंशधरो भृशं विपन्नः ।। 40 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तद्दृष्टिमात्मन्यपकर्ष्टुमेष
शाखामृगोऽधूनयदत्र शाखाम् ।
वृक्षस्य यस्याध उपास्त निद्रां
रामो जगन्नेत्रयुगाभिरामः ।।5।।

तं धूनयन्तं समवेक्ष्य शाखा-
मतर्जयल्लक्ष्मण आत्तरोषः ।
नासौ च तस्माद्विरतो बभूव
शाखां दुधावैव मुहुर्मुहुश्च ।।6।।

दण्ड्योऽयमित्यात्तमनाः कुमारः
श्रीलक्ष्मणः कार्मुकमाददे स्वम् ।
शरं तथोग्रं च निहन्तुकामः
शाखामृगं चापलसम्प्रयुक्तम् ।।7।।

उभावपि द्राक् प्रहसन्निवाप-
निन्ये करात्तस्य सुविस्मितस्य ।
आरूढवांश्चैव पुनः स शाखां
शाखामृगस्तां धवितुं प्रवृत्तः ।।8।।

एवं गते लक्ष्मण आत्तलज्जो
निजाग्रजं जागरयाम्बभूव ।
निवेदयामास च सर्ववृत्तं
खर्वीकृतस्वाखिलवीर्यगर्वः ।।9।।

श्रुत्वादसीयं वचनं विचित्रं
रामः क्षणाद् ऊर्ध्वमवालुलोके ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

शाखामृगं चापि ददर्श तत्रा-
भिजज्ञिवांस्तस्य च लक्षणानि ।। 10 ।।

ज्ञातानि विज्ञाय निजानि शाखा-
मृगः समस्तानि तु लक्षणानि ।
विवेद वृक्षस्य तले निषण्णं
जनं स नारायणमेव साक्षात् ।। 11 ।।

ततः स वृक्षादवतीर्य सद्य-
स्तत्पादपद्मश्रयणाभिकाङ्क्षः ।
विनीतवत्तस्य पुरः स्थितोऽभूत्
तं चाब्रवीत्स्वं च समर्प्य तस्मै ।। 12 ।।

अद्यप्रभृत्यस्मि तवाङ्ग दासो
नाम्ना हनूमान् पवनस्य पुत्रः ।
त्वद्दर्शनाप्यायितमानसं मां
त्वमाज्ञया तुष्टतमं विधेहि ।। 13 ।।

वाचं तदीयाममृतायमानां
निपीय तं दाशरथिर्बभाषे ।
भार्या हृता मे दशकण्ठनाम्ना-
ऽसुराऽधमेनात्र विधेहि साह्यम् ।। 14 ।।

ओमित्युवाचाथ कपिप्रवीरः
सुग्रीवपार्श्वे प्रणिनाय तं च ।
मित्रत्वमापद्यत येन तस्य
समं निवासेन वनेऽत्र पूर्वम् ।। 15 ।।

41

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अष्टमः सर्गः

(दरभ्यु (थोरप्यु)पाख्यानं वालिवधोपाख्यानं लङ्कादहनोपाख्यानं च)

(इन्द्रवज्रावृत्तम् उपजातिवृत्तञ्च)

आसीत्पुरा राक्षसजातिजातः
कैलासवासी किल नन्दकालः ।
द्वारेषु कैलासगिरेः स आसी-
देकस्य रक्षार्थमभिप्रयुक्तः ।।1।।

स एकदोद्यानगतां शिवस्य
दृष्ट्वोपपत्नीं[1] सुतरां विमुग्धः ।
विधातुमात्माभिमुखीमकस्मात्
पुष्पेण तां सम्प्रजहार कामी ।।2।।

तदीयधाष्टर्येन विकम्पिता सा
प्रभुं प्रपेदे तरसेश्वरं द्राक् ।
स चापि शापं विससर्ज तस्मै
न वृत्तभङ्गोऽस्य बभूव सह्यः ।।3।।

स तेन जज्ञे दरभाभिधानो
विशालरूपो महिषः क्षणेन ।

1. प्रभोः शिवस्य नानोपपत्न्य आसन्निति थाइरामायणम्। तास्वन्यतमां विलोक्य नन्दकालो मोहमापत्।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तनूजवक्त्राम्बुजदर्शनान्तो
बभूव शापो दनुजस्य तस्य ।।4।।

हनिष्यतेऽसौ तनुजेन तेने-
त्येवं प्रभुस्तत्र विधिं वितेने ।
हेतोर्यतोऽसौ खलु जातमात्रान्
सुताननेकान् निजघान दैत्यः ।।5।।

सुदुःखितास्तेन समा[1] बभूवुः
समा महिष्यः सुतहिंसयाऽत्र ।
आगामिपुत्रस्य च रक्षणार्थ-
मिमा मनः स्वं द्रढयाम्बभूवुः ।।6।।

अथैकदा गर्भवती प्रजाता
तस्माद्दनूजान्महिषी यदैका ।
तद्दर्शनं सा परिहर्तुकामा
वनस्य कस्यापि गुहां विवेश ।।7।।

कालेन साऽसोष्ट सुतं दृढाङ्गं
तं चाह तत्तातनृशंसकृत्यम् ।
विसृज्य तत्रैव च तं कथञ्चिद्
दीना गुहातो बहिराजगाम ।।8।।

कालेन पुत्रो दरभीतिनामा
ऽज्ञातः पितुः काननमाससाद ।
स्मरन्स्वमातुर्वचनस्य चापि
नियोधनायाह्वयत स्वतातम् ।।9।।

1. वर्षाणीत्यर्थः । कालाध्वनोरत्यन्तसंयोग (2.3.5) इत्यनेन द्वितीया ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदन्यथात्वेऽनुमिनोत्वसौ यद्
भ्राताऽस्य वाली निहतो युधीति ।। 15 ।।

एवं प्रबोध्यानुजमेष योद्धुं
गुहां परेद्युः प्रविवेश वाली ।
तिष्ठंस्तदीये वचनेऽनुजश्च
गुहामुखे दत्तमुखः स्थितोऽभूत् ।। 16 ।।

कालो व्यतीयाय यदा तु कश्चिद्
घोरं प्रवृत्तस्य नियोधनस्य ।
तदा प्रवृत्तो घनघोरवर्षी
देवो वने वर्षितुमात्तवेगः ।। 17 ।।

अत्रान्तरेऽभून्निहतो नियुद्धे
श्रीवालिनाऽसौ महिषो दुरात्मा ।
प्रवाहिता यस्य बभूव कायाद्
रक्तस्य धाराऽगुरुनिम्नगेव ।। 18 ।।

सम्मिश्रणाद् वृष्टिजलस्य तस्यां
कृष्णत्वमालक्ष्यत नैव तस्याः ।
भ्रान्तिं गतो यद्वशतोऽग्रजो मे
हतोऽस्ति सुग्रीव इति प्रपेदे ।। 19 ।।

ततो गुहातो बहिरागमस्य
कर्तुं निरोधं महिषस्य तावत् ।
गुहामुखं सोऽपिहितं व्यधत्त
निरन्तरं तत्र शिलोच्चयेन ।। 20 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रत्यर्थिनं स्वं विनिहत्य यावद्
गुहामुखान्निष्क्रमणाय वाली ।
उपैति तत्तावदसावपश्यत्
प्रपूरितं दीर्घशिलोच्चयेन ।। 21 ।।

प्रयत्नमास्थाय तदा महान्तं
वाली शिलौघं स पृथक् चकार ।
आगन्तुमीशश्च यथाकथञ्चिद्
बहिर्गुहातः स बभूव वीरः ।। 22 ।।

सुग्रीव एनं ननु कस्य हेतो-
र्गुहामुखे स्थापितवाञ् शिलौघम् ।
इत्येव सञ्चिन्तनतत्परस्य
बुद्धिभ्रमः प्रादुरभूदनिष्टः ।। 23 ।।

स्यान्नाम राज्ये मम गृध्नुरेष
मन्मृत्युमाकाङ्क्षति मेऽनुजोऽपि ।
अहं गुहायां विलयं प्रयाया-
मित्येव चेतस्यभिसन्धिरस्य ।। 24 ।।

अहो! दुरात्माऽयमतीव पापी
यो भ्रातुरेवेच्छति नाम मृत्युम् ।
विचिन्तयन्नेवमसौ बभूव
क्रोधानलोद्दीप्तमना मनस्वी ।। 25 ।।

उपेयिवांश्च स्वकराजधानीं
सुग्रीवमस्याः स बहिश्चकार ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

नैवाशृणोत्तस्य वचश्च रोषाद्
बुद्धिभ्रमस्तस्य दृढो बभूव ।। 26 ।।

पृथक्कृतोऽसौ सुतरां निरागाः
सुग्रीव आसीन्मनसाऽतिरुग्णः ।
विनाऽपराधं नहि कस्य चेतो-
ऽवमानना दुःखभरं तनोति ।। 27 ।।

क्रोधात्स सम्प्रार्तथत स्वकस्य
भ्रातुर्वधं राघववीरमुख्यम् ।
सम्पादनं तस्य च सोऽचिरेण
तं राघवः प्रत्यशृणोच्छरण्यः ।। 28 ।।

नियोधने वालिनमाह्वयस्वे-
त्येवं स सुग्रीवमुवाच वीरः ।
तथा चकारापि च तद्गिराऽसौ
वाली नियोद्धुं च समाजगाम ।। 29 ।।

वृत्ते नियुद्धे च ककुत्स्थवंश्यः
शरेण वृक्षान्तरितो जघान ।
सुग्रीवराजाग्रजमुग्रबुद्धिं
राज्ये च सुग्रीवमथाभ्यषिञ्चत् ।। 30 ।।

साहाय्यमस्य प्रतिशुश्रुवान्स
विदेहजायाः पुनराप्तिहेतोः ।
सुग्रीवराजः प्रथमोपकार-
कृतज्ञतामात्मनि सन्दधानः ।। 31 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुत्रीकृतो वालिसुतोऽङ्गदोऽपि
साह्वाय सम्प्रैर्यत तेन वीरः ।
अन्येऽपि ये नीलफदादयस्ते
सम्प्रेरितास्तेन सहायतायै ।। 32 ।।

सर्वा चमूस्तस्य विशालरूपा
सुग्रीवराजस्य समुद्रगेव ।
लङ्कापुरीं जेतुमुपात्तभावा
समुद्रतीरं समभिप्रपन्ना ।। 33 ।।

ततोऽनु विद्वान् हनुमाञ्जगाम
लङ्कापुरीं तत्र ददर्श चापि ।
सीतामभिज्ञानमुपानयन्सो-
ऽङ्गुलीयकं दाशरथिप्रदत्तम् ।। 34 ।।

निवर्तमानश्च ततः स लङ्कां
दग्धात्स्वपुच्छाद्दनुजैर्नृशंसैः ।
ददाह हाहाकृतमास्त येन
स्वाहाकृतञ्चापि समस्तपुर्याम् ।। 35 ।।

(द्रुतविलम्बितवृत्तम्)

तदनु दाशरथिं समुपेयिवान्
सकलवृत्तमुवाच कपिर्बुधः ।
स च सहायवृतोऽभवदुद्यतो
दशमुखाक्रमणाय विवेकवान् ।। 36 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

नवमः सर्गः

(रावणस्वप्नोपाख्यानं रामशिबिरे
गुप्तचरसम्प्रेषणोपाख्यानं च)

(मन्दाक्रान्तावृत्तम्)

लङ्कां यद्यप्यदहदखिलां वायुपुत्रस्तरस्वी
नैतच्चिन्तामणुमपि मनस्यातनोद् गर्वितस्य ।
पौलस्त्यस्य प्रथितयशसो लोकलोकैकजेतु-
र्धीरा आपद्यपि निपतिता नैव मुञ्चन्ति धैर्यम् ।।1।।

अल्पेनैवासुरपुरपतिः कालखण्डेन लङ्कां
तेने दीप्रां पुनरिति परं विस्मयं तद्वितेने ।
संस्कारोऽस्यै मुहुरपि ददे काम्यकान्तिं प्रभूतां
येनात्यर्थं कनकवदियं तप्तवर्णा बभासे ।।2।।

लङ्का यस्मादभवदधिकं पूर्वतोऽपि प्रदीप्रा
पूर्णा भोगै रुचिरतरकैर्देवलोकेऽपि काम्यैः ।
तेनात्यर्थं सुखमनुभवन् रावणस्तां शशास
देवैर्यक्षैरुरगपतिभिः पूज्यमानोऽसुरैश्च ।।3।।

सेयं शान्तिर्नहि चिरमवातिष्ठतामुष्य चित्ते
किञ्चिन्नैव स्थिरमिह जगत्यस्ति सञ्चारशीले ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुप्तो रात्रावयमतिसुखी स्वप्नमेकं ददर्श
कस्याञ्चिद्योऽजनयदभितोऽस्यान्यथावृत्ति चेतः ।।4।।

तस्मिन्स्वप्नेऽतितुमुलतया युध्यमानौ ददर्श
श्येनावेकोऽभवदिह ययोः कृष्णवर्णस्तथा च ।
आसीदेकोऽतिधवलरुचिर्येन कृष्णो हतोऽभूत्
प्रत्यग्दिग्भागत उपगतः पूर्वकाष्ठागतेन ।।5।।

तत्पश्चात्स स्वककरगते कोटरे नारिकेले
तैलासेकं विदधतमहो स्वं ददर्शातिमुग्धः ।
वर्तिं तस्मिन् निदधतमसौ स्वं यदा पश्यति द्राग्
योषा तत्रापतति सहसाऽदृष्टपूर्वा कुतश्चित् ।।6 ।।

वर्तिं सा प्रज्वलयति तदा येन तत् कोटरं द्राग्
दग्धं वह्निः करतलमनु प्राविशच्चापि तस्य ।
सर्वः कायस्तदनु सुतरामन्वभूद्वह्निदाहं
तस्मिन्काले झटिति शयनादुत्थितोऽभूद्दनूजः ।।7 ।।

स्वप्नद्वय्या क्रकचयुगलाभिख्यतामादधत्या
शङ्काजालैः प्रबलतरकैर्दीर्यमाणान्तरङ्गः ।
स्वप्नव्याख्यां स निजमनुजं पृष्टवान् बुद्धिमन्तं
ब्रूहि भ्रातः फलमिह शुभं वाऽशुभं स्वप्नयोर्मे ।।8 ।।

तं सम्प्रोचे नयविनयमानग्रजं स्वप्नशास्त्र-
धुर्यो भ्रातः! शृणु फलमिह प्रोच्यमानं मयाऽत्र ।
स्वप्नावेतौ सुभृशमशुभौ कष्टसंसूचकौ ते
दुख्यच्चेताः कथमपि तयोर्वच्म्यनिष्टं फलं ते ।।9।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कृष्णः श्येनस्त्वमसि धवलश्चास्ति रामोऽभिरामो
हिंसा कार्ष्णी धवलविहिता तेऽन्तसंसूचिकाऽस्ति ।
लङ्कापुर्या विगणय विभो नारिकेलं प्रतीकं
तत्तैलं ते कुलमविकलं वह्निसाद्यद् भवेन्नु ।। 10 ।।

योषा स्वप्ने नयनविषयं या गता ते बभूव
दीपं यावज्ज्वलयति पुरा कोटरं नारिकेलम् ।
सा नौ भ्रातः सकलकलहद्वारभूता स्वसैव
वह्निज्वाला ऽति कुटिलधिया दीपिता भोस्तयैव ।। 11 ।।

ज्वाला भ्रातर्निजकरतलं याऽनुभूता दहन्ती
सैषा साध्वी जनकतनया त्वद्विनाशैकहेतुः ।
तां त्वं शान्त्या दशरथसुतं द्राग् विनिर्यातयस्व
रक्षाथो च प्रियमिह कुलं राक्षसानां समस्तम् ।। 12 ।।

इत्थङ्कारं वचनरचनां संविरच्यात्मनीने
तूष्णीम्भूते दनुजकुलजे स्वेऽनुजे क्रोधताम्रः ।
पौलस्त्यस्तं परुषवचनैभर्त्सयामास तीव्रं
रज्जुच्छेदे घटमिव नु को धारयेत् सद्वचोऽज्ञः? ।। 13 ।।

निर्यात्या मे जनकतनयेत्येवमात्थात्र यत्त्वं
तत्ते नूनं कलुषहृदयं स्पष्टमाविष्करोति ।
भ्राता मे त्वं कथमिव नु मे राघवान्नाशमात्थ
लङ्कायां त्वं निवससि परं शत्रुपक्षे स्थितोऽसि ।। 14 ।।

शक्तिं न्यूनां गणयसि कथं राघवान्मे विजेतु-
र्दिक्पालानां सकलभुवनस्पृह्यकीर्तेर्विमूढ ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

केचिच्चाथो पवनमबलं तेनिरे स्वस्य वेगा-
दन्ये चाथो जलधिमतुलं शुष्कतां नीतवन्तः ।।26।।

दृष्ट्वा दृश्यं तदखिलमभूद्विस्मयाविष्टचेता
हृष्यद्रोमा निजनयनयोर्विश्वसन्नो महात्मा ।
पौलस्त्यस्यावरज इति तं प्राह सुग्रीवराजं
भास्वद्वक्त्रं दशरथसुतेऽत्यन्तरक्तं कपीन्द्रम् ।।27।।

शक्तिर्या ऽभूत् सपदि भवतां सैन्यसङ्घस्य दृष्टा
नातः पूर्वं कुहचन मयाऽऽलोकितेति ब्रवीमि ।
यत्सत्यं ते कपिवरभटा राक्षसैर्योद्धुमर्हा
एषां शक्त्या रघुवरजयं निश्चितं तर्कयामि ।।28।।

योऽभूच्छब्दस्तरुगिरिशतव्रातसन्दारणोत्थो
व्याप्नोत्सोऽयं सकलभुवनं नादयन् दिग्दिगन्तान् ।
लङ्कापुर्यामपि गतवता राक्षसेन्द्रस्य तेन
स्पृष्टास्तावच्छ्रवणकुहरा[1] विस्मयाविष्टबुद्धेः ।।29।।

कोऽयं शब्दः कुत इत इतः किङ्कृतो वा किमर्थं
वाऽयं लोके जनित इति स स्वाञ्जनानन्वयुङ्क्त ।
ते तं प्रोचुः कपिवरभटै राघवस्यैष चम्वा
शब्दो भीमो जनित इह यो विस्मयं नस्तनोति ।।30।।

तच्छ्रुत्वाऽसौ रिपुकुलगतं वृत्तमिच्छन्निबोद्धुं
सर्वं सूक्ष्मं प्रणिधिमकरोच्छुक्रसाराख्यमेकम् ।
रक्षोवीरं च तमचकथद्रामभद्रस्य सैन्यं
यातुं द्रष्टुं विदधति भटा यत्तदर्थं प्रवृत्ताः ।।31।।

1. दशास्यस्य तस्य नाना श्रवणकुहरा इति बहुवचनप्रयोगः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

(इन्द्रवज्रावृत्तम् उपजातिवृत्तञ्च)

श्येनाकृतिं स्वां विरचय्य दूतो
रामस्य तावच्छिबिरं विवेश।
तत्राप्तमात्रश्च कपिर्बभूवा-
निरीक्ष्यमाणोऽन्यकपिप्रवेकैः ॥32॥

विभीषणस्याथ न सूक्ष्मदृष्टे-
र्दृष्टिं परीहर्तुमसौ शशाक।
कपिस्वरूपेऽपि तमभ्यजानात्
तं रावणस्य प्रणिधिं स विज्ञः ॥33॥

इदं हनूमन्तमुवाच चापि
स चाप्यभिज्ञातुमिमं ववाञ्छ।
तदर्थमात्मानमतस्ततान
वितानरूपं पवनस्य पुत्रः ॥34॥

समादिदेशाथ कपिप्रवीरान्
एकैकमेतुं स तदन्तराशु।
ततश्च निर्यातुमिमं विधिं सो
ऽभिज्ञातुमाधादिह शुक्रसारम् ॥35॥

एनं विधिं सैष समाश्रितः सन्
ददर्श सूक्ष्मेक्षिकयैकमेकम्।
कपिं कपीनां प्रवरो विवेकी
शत्रोः स्पशं मार्गयितुं प्रवृत्तः ॥36॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कपिस्वरूपेण विवेश धूर्तः
क्रमाद्यदा तत्र तु शुक्रसारः ।
निमेषहीनाक्षियुगेन जज्ञे
छायाविहीनत्ववशेन चापि ।। 37 ।।

दैत्यं कपिस्तं निगृहीतवांश्च
कशाभिघातं हतवान्दृढं च ।
चिह्नानि सर्वावयवेषु तस्य
कृत्वा व्यमुञ्चच्च विलज्जितं सः ।। 38 ।।

लङ्कानरेशं स समभ्युपेतो
न्यवीविदत्तं निजवृत्तजातम् ।
शौर्यं कपीनां तमबोधयच्च
वैलक्ष्यशल्यं हृदये दधानः ।। 39 ।।

मोघे प्रयत्ने प्रणिधेः प्रजाते
स्वयं दशास्यः कृतसाधुवेशः ।
रामस्य सेनामनुसम्प्रविष्टो
दुष्टाभिसन्धिर्मकरो यथाऽब्धिम् ।। 40 ।।

तपस्विवेषेऽपि विभीषणेना-
भिज्ञात आसीत्कपटी तथाऽपि ।
मन्त्रप्रभावेण गतः स तूष्णी-
म्भावं न वक्तुं प्रबभूव किञ्चित् ।। 41 ।।

रामः पुरस्तादवलोक्य साधुं
तं पूजयाञ्चक्र उवाच चापि ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

वस्तुस्थितिं नो कलयाऽपि जानं-
स्तद्द्वेषमात्रेण हृतान्तरङ्गः ।। 42 ।।

कुतो भवानत्र मदीयभाग्यात्
प्राप्तोऽस्ति सम्भावयितुं स्वयं माम् ।
तपस्विनां दर्शनमेव पुण्यं
तेषां गिरः पुण्यतरास्ततोऽपि ।। 43 ।।

सम्भावनां वर्धयितुं मदीया-
माख्यातु मां किङ्करणीयमस्ति ।
मया नियोगक्रिययोत्सुकेन
सेवा सतां सत्फलदायिनी स्यात् ।। 44 ।।

श्रुत्वादसीयं वचनं दशास्य-
श्छद्मस्वरूपस्तमुवाच वाचम् ।
काम्यं न मे किञ्चिदपीह लोके
परोपकाराय ममास्ति कायः ।। 45 ।।

श्रुतं मया यद्दशकन्धरं त्व-
माक्रान्तुकामः कपिसेनयाऽसि ।
सोऽयं न कामोऽस्ति तवाभिरामो
नाशोऽत्र ते स्यात्परिणाम एव ।। 46 ।।

त्वां राम तस्मात्परिबोधये मा
दशास्यवह्नौ शलभायितो भूः ।
त्रैलोक्यजेता क्व स राक्षसेन्द्रैः
परीवृतस्त्वं क्व च वानरैर्भीः ।। 47 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

दुःसाहसं त्वं त्यज याहि चापि
भ्रात्रा समं काननमेव भूयः ।
विवेकिनो नो सहसा क्रमन्ते
पथा ध्रुवं येन भवेद्विनाशः ।। 48 ।।

आकर्ण्य तस्याप्रियवाक्यजालं
तान्तान्तरङ्गोऽपि बहिः प्रशान्तः ।
काल्यं वचश्छद्मतपस्विनि द्राक्
प्रावर्तयद् दाशरथिर्महात्मा ।। 49 ।।

भार्या हृता मेऽधमराक्षसेन
ततोऽस्ति मे दण्ड्यतमो मतोऽयम् ।
वृत्तोऽहमस्मादभिषेणनेऽस्य
प्रयोजकोऽन्यो नहि मेऽत्र हेतुः ।। 50 ।।

चापद्वितीये मयि युध्यमाने
स्थातुं ममाग्रे न भवेदलं सः ।
एकैकशः कर्तयितास्मि तस्य
तीक्ष्णैर्दशास्यानि शरैरहं द्राक् ।। 51 ।।

किं वा बहूक्तेन मदीय एष
दृढोऽस्ति सङ्कल्प इति प्रजानन् ।
न मामतश्चालयितुं समर्थो
भवाञ्शिलौघं पवनो यथैव ।। 52 ।।

श्रुत्वादसीयं वचनं विषण्णो
लङ्कां दशास्यो न्यवृतद्विमूढः ।

54 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सञ्चिन्तयामास च सोऽन्यमेवो-
पायं ततो रोद्धुमना अपायम् ।। 53 ।।

(मालिनीवृत्तम्)

यदि भवति विषादस्योदयो रामचित्ते
नहि कथमपि शक्तः स्यादयं सङ्गराय ।
इति धियमभिपन्नस्तत्परावर्तनार्थं
दशमुख इह गूढां युक्तिमेकां प्रपन्नः ।। 54 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्येव सञ्चिन्त्य सदा परेषां
प्रवञ्चनायां निपुणो दुरात्मा ।
दशाननो राक्षसकन्यकां तां
न्ययोजयत्कर्मणि तत्र घोरे ।।5।।

यथाऽनुमानं दनुजस्य तस्य
यदा ऽऽगतो दाशरथिर्विधातुम् ।
स्नानादिकं दैनिककृत्यजातं
तटे तटिन्याः समवालुलोके ।।6।।

मृतं शरीरं जनकात्मजाया
नदीप्रवाहेण समुह्यमानम् ।
तदा स संमोहमुपागतोऽभू-
दमुञ्चदश्रूणि च लुप्तधैर्यः ।।7।।

अन्वेषणायाथ चिरायमाणस्या-
र्यस्य सौमित्रिरुपागतस्तम् ।
दृष्ट्वा विषादाम्बुनिधौ निमग्नं
दुःखस्य कोटिं परमां जगाम ।।8।।

स्नानाय यातो न पुनर्निवृत्तः
श्रीराम इत्यस्तसमस्तकार्यौ ।
सम्प्रास्थिषातां शिबिरात्स्वकीयात्
सुग्रीवराजो हनुमांश्च वीरः ।।9।।

अन्वेषयन्तौ सुतरां सचिन्तौ
कूलङ्कषातीरमवापतुस्तौ ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

म्लानाननौ भ्रातृवरौ विलोक्य
दुःखं परं तावुपजग्मतुश्च ।। 10 ।।

विवेकशीलस्तु तयोर्हनूमान्
प्रत्यैन्न सीतामरणं कथञ्चित् ।
प्राणान्न जह्याज्जनकात्मजेति
दृढा मतिस्तस्य कपेर्बभूव ।। 11 ।।

कष्टं श्रिताऽपि स्वपते[1]र्वियुक्ता-
ऽप्येषा न जह्यात्पतिसङ्गमाशाम् ।
भूमेः सुता भूमिवदेव तस्या
धैर्यं भवेद्धैर्यधना मता सा ।। 12 ।।

न प्राकृतेव व्यवहारमेषा
समाश्रयेज्जातुचिदत्र लोके ।
न वृक्षशाखेव पतेत्प्रचण्डे
वायौ स्थिरा स्याद्गिरिशृङ्खलेव ।। 13 ।।

मायाविनामग्रसरा मदान्धाः
किं वाऽसुरा नैव विदध्युरेनः[2] ।
सीता प्रमीतेति[3] न सम्भवीति
दृढा मतिस्तत्र कपेर्बभूव ।। 14 ।।

मृतं शरीरं जनकात्मजाया
अन्यस्त्रिया वाऽसुरसम्भवायाः ।
एतत्परीक्षार्थमकालहीनं
चितां स सम्प्रज्वलयाम्बभूव ।। 15 ।।

1. पतिः समास एव (1.4.8.) इत्येनन घिसञ्ज्ञायां गुणः । 2. एनः = पापम् । 3. प्रमीता = मृता

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

चिक्षेप चास्यां स मृतं शरीरं
तस्यास्तरस्वी पवनस्य पुत्रः ।
क्रोशन्त्यतस्तत्क्षणमेव रक्षः-
कन्या विरूपा वियदुत्पपात ।। 16 ।।

तामुत्पतन्तीं बलवद् बलिष्ठो
धृत्वा स केशैर्भुवमाचकर्ष ।
आकृष्य तां तत्र समार्पिपच्च
श्रीरामचन्द्राय विदां वराय ।। 17 ।।

अत्रान्तरे तावदुपस्थितोऽभूद्
विभीषणोऽन्वेषणचेतसाऽत्र ।
निरीक्ष्य तां राक्षसकन्यकां च
प्रोचे स वाचं वदतां वरेण्यः ।। 18 ।।

ममाधमस्यास्ति सुतेयमार्य!
क्रूराकृतिर्बेञ्जकयीति नाम्नी ।
धृत्वा यया रूपमनिन्द्यरूपं
प्रवञ्चितस्त्वं जनकात्मजायाः ।। 19 ।।

नृशंसमस्या अतिनिन्दनीयं
कर्मेति तावद्धृदि सम्प्रधार्य ।
त्वां वच्म्यहं मित्रमिति प्रपन्नः
सुता ममेयं वधमर्हतीति ।। 20 ।।

एवं सखे! नैव भवेत्कदाचिद्
हन्यां कथं मित्रवरस्य कन्याम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

यथा तवेयं हि तथा ममापि
क्षम्यो मयाऽस्याः प्रथमापराधः ।। 21 ।।

उक्त्वैतदूर्जस्वि वचोऽभिरामं
श्रीरामभद्रो हनुमन्तमूचे ।
सम्प्रापयैनां बहुमानपूर्वं
लङ्कां, निवर्तस्व ततश्च शीघ्रम् ।। 22 ।।

ओमित्युवाच प्रभुवाचमाच-
म्यासौ कपिप्राग्रहरो मनीषी ।
विनिर्ययौ तत्क्षणमेव रक्षः-
कन्यासहायश्च ययौ विहायः ।। 23 ।।

(तोटकवृत्तम्)

अथ रामवचो हृदये निदधत्
कपिराशु स बेञ्जकयीमनयत् ।
पथि यानपरश्च बभूव दृढं
कुसुमेषुशरैरसमैः प्रहृतः ।। 24 ।।

तरुणी कनकं कमलं कमला
नहि कस्य हरन्ति मनोहरिणम् ।
न विवेकिजनोऽपि निवर्तयितुं
प्रभवेदिममित्यमृषोद्यवचः ।। 25 ।।

कुसुमायुधशक्तिरहो! अमिता
हनुमानपि यद्वशमाप कृती ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

असुरीमपि स प्रणयं प्रबलः
समयाचत तत्सहितो रहसि ।। 26 ।।

अथ साऽपि शशाक विधातुमिमं
बलिनं प्रविलोक्य विलोक्यतमम् ।
स्वमनो न मनोजवशात्स्ववशे
मुदिता समरंस्त च तेन समम् ।। 27 ।।

यदि याति लता स्वयमेव तरुं
यदि याति नदी च तथा जलधिम् ।
नहि तत्र विचित्रमिति प्रकटं
प्रकृतिः पुरुषं स्वयमेति यतः ।। 28 ।।

प्रकृतेः पुरुषस्य च सङ्गमना-
दिह सृष्टिरुदेति यतो जगति ।
असुरीकपिसङ्गमतोऽपि ततो
नवसृष्टिरभूत्प्रकटा विकटा ।। 29 ।।

(मालिनीवृत्तम्)

असुरफदसमाख्यं दानवी पुत्रमेकं
कपिरमणवशेनासोष्ट कालेन वीरम् ।
पवनसुतसुतोऽसौ दानवैः सार्धमन्यै-
र्दशवदनपुरे स्वं शैशवं संनिनाय ।। 30 ।।

अथ पवनतनूजः प्राप्तलङ्कापुरीको
दनुजवरतनूजासङ्गसम्प्राप्तसौख्यः ।
दशवदनपुरे तां सादरं रामवाक्याद्
व्यसृजदभिमतां द्राक् संनिवृत्तस्ततश्च ।। 31 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

(उपजातिवृत्तम्)

विसृज्य तां बेञ्जकयीं प्रवीरो
वियोगदुःखाद्विमनायितोऽपि ।
प्रभोः स्मरंस्तच्चरणानुरक्त-
स्तमेव तावत्तरसा प्रपेदे ।। 32 ।।

प्रयत्नजाते विफले प्रजाते
विनाऽऽहवं दाशरथिं विजेतुम् ।
तस्मात्परावर्तयितुं तथा वा
संश्रित्य युक्तीरपि नैकरूपाः ।। 33 ।।

युद्धाय तावत्समनह्यतैव
दशाननो राक्षसवंशनाथः ।
रामोऽपि वीरैः कपिभिः समेतो
युद्धाय घोराय समुद्यतोऽभूत् ।। 34 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

एकादशः सर्गः

(नीलहनुमद्विग्रहोपाख्यानम्)

(भुजङ्गप्रयातवृत्तम्)

समुद्रस्य मध्ये स्थिता रावणस्य
पुरी नाम लङ्का बभौ राजधानी ।
समृद्धेः परं पारमाप्ता सुगुप्ता
त्रिलोक्यां प्रसिद्धिं परामाससाद ।। 1 ।।

न तां सम्प्रपत्तुं सुशक्यं बभूव
यतोऽम्भोनिधिर्विस्तृतस्तां ररक्ष ।
कथं तत्र गन्तव्यमित्याकुलः सन्
क्षणं नापि रामः क्षणं प्राप वीरः ।। 2 ।।

समुद्रे क्रियेताथ सेतुः कथञ्चित्
तदा पारमेतुं चमूः शक्नुयान्मे ।
विचिन्त्यैवमादिष्टवान् वायुपुत्रं
तथा नीलफन्नामधेयं कपिं सः ।। 3 ।।

युवाभ्यामुभाभ्यां निबद्धव्य आशु
चमूनां कृते सेतुरस्मिन् समुद्रे ।
पटू अत्र कर्मण्युभौ स्थो युवां त-
न्नियुञ्जेऽत्र कर्मण्युभौ वामहं भोः ।। 4 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रवीणोऽपि वायोः सुतो भूरियत्नो
नितान्तं च तान्तान्तरङ्गो बभूव ।। 10 ।।

न भूयानपेक्ष्यो भवेत्क्षेपणाय
शिलानां समुद्रे गुरूणां हि कालः ।
निवेशे तु तासां यथास्थानमद्धा
व्यपेक्षाऽभवत्तस्य भूयस्तरस्य ।। 11 ।।

यदा काल एवं व्यतीयाय कश्चि-
न्नियोगोऽनयोः सम्परीवर्तितोऽभूत् ।
कपेराञ्जनेयस्य नीलस्य[1] चापि
तथाऽऽदेश आसीत्प्रभो राघवस्य ।। 12 ।।

पुरा यत्कपिर्नीलनामा व्यधत्त
तदेवाञ्जनेयेन कर्तव्यमासीत् ।
यदेवापि तेनाभवत्कार्यमत्र
तदेवाभवन्नीलनाम्ना विधेयम् ।। 13 ।।

स्वकर्मव्यतीहार एवं प्रवृत्ते
ऽपमानाग्निना दह्यमानो हनूमान् ।
प्रतीकारवेलामिमां स्वोपयुक्तां
विचिन्त्याश्रयद्युक्तिमत्राभियुक्तः ।। 14 ।।

स एकैकशो रोमसु स्वेषु युक्त्या
न्यबध्नाच्छिलाखण्डमेकैकशो द्राक् ।
भृशं चापि रुष्टः प्रतीकारमीप्सु-
र्निचिक्षेप तं सन्ततं तान्तचित्तः ।। 15 ।।

1. नीलफद् इत्यस्य स्थाने संक्षेपार्थं नीलशब्द एवेतः परं प्रयुक्तः।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

न नीलः शशाकातियत्नादपीमान्
शिलाखण्डकान् सन्निवेष्टुं यथावत् ।
भृशं लज्जितोऽवाङ्मुखश्चापि तस्थौ
न सह्या भवेन्मानहानिः कथञ्चित् ।। 16 ।।

स एवं विलोक्यातिदुःख्यन् रघूणां
पतिर्न प्रवृत्तिं तयोरक्षमिष्ट ।
व्यधाच्चापि दण्डव्यवस्थां द्वयोः स
विवादस्तयोरस्य नो सह्य आसीत् ।। 17 ।।

(उपजातिवृत्तम्)

नीलस्य वायोस्तनयस्य चापि
मिथो विवादो जनयेद्विवादम् ।
अन्येषु सैन्येष्विति चिन्तितोऽभूत्
सुसूक्ष्मदृग् दाशरथिर्महात्मा ।। 18 ।।

सैन्याधिपावेव परस्परेण
यदा विवादे कुरुतो मनः स्वम् ।
तदाऽन्यसैन्यानि न किं प्रकुर्यु-
'र्महाजनो येन गतः स पन्थाः' ।। 19 ।।

नाभ्यामभूत्प्रस्तुत आत्मसैन्य-
सङ्घार्थमादर्श इति प्रधार्य ।
दण्ड्याविमावित्यवधार्य चापि
समादिशद् दण्डमिमं महात्मा ।। 20 ।।

दाने च यस्मात्

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

(अनुष्टुब्वृत्तम्)

किष्किन्धानगरीं तावद् व्रजेन्नीलो महामनाः ।
सुग्रीवात्प्रति[1] तत्रास्तु शास्तु चैनां च शास्त्रतः ।। 21 ।।

यद्यदावश्यकं वस्तु सेनाया हि कृते भवेत् ।
तस्य तस्य व्यवस्थां स विदधातु प्रयत्नतः ।। 22 ।।

हनूमांश्चापि दिवसैः केवलं सप्तभिर्बुधः ।
बध्नातु सेतुं येनेयं यायाल्लङ्कां चमूर्मम ।। 23 ।।

(उपजातिवृत्तम्)

आदेशमेतं प्रभुणा विसृष्टं
निशम्य नीलः प्रययौ पुरं स्वम् ।
व्यापारयामास च वायुपुत्रः
सर्वात्मना सेतुनिबन्धने स्वम् ।। 24 ।।

1. प्रतिनिध्यर्थे प्रतिशब्दस्य प्रतिः प्रतिनिधिप्रतिदानयोः (1.4.92) इत्यनेन कर्मप्रवचनीयसञ्ज्ञायां प्रतिनिधिप्रतिदाने च यस्मात् (2.3.11) इत्यनेन पञ्चमी।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वादशः सर्गः

(सुवर्णमत्स्योपाख्यानम्)

(अनुष्टुब्वृत्तम्)

कपिसैन्यसहायोऽसौ शतशः प्राक्षिपच्छिलाः ।
प्रस्तरांश्चापि येनासौ पूरितोऽम्भोनिधिर्भवेत् ।।1।।

दिनमेकं स बलवान् शतशः कपिभिः सह ।
अनारतं शिला अब्धौ प्रक्षिपन् व्यापृतोऽभवत् ।।2।।

अपरस्मिन् दिने प्रातः स्वकार्यार्थमुपस्थितः ।
अदर्शनं गतास्तत्र समवालोकयच्छिलाः ।।3।।

केयं मायेति सुतरां विस्मितः कपिपुङ्गवः ।
विनष्टा रात्रिमात्रेण शिलाः कुत्र गता इति ।।4।।

बहु चिन्त्तयमानोऽपि नैवाबुध्यत किञ्चन ।
प्रक्रान्त्तव्यं पुनः कार्यमिति चैवाश्रयन्मतिम् ।।5।।

स स्वयं कपयश्चापि तदादिष्टाः समन्ततः ।
शिलौघान् प्राक्षिपन् वार्धौ स्वस्य कर्मण्यतन्द्रिताः ।।6।।

(इन्द्रवज्रावृत्तम् उपजातिवृत्तञ्च)



CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रातर्यदाऽऽगाद्धनुमान् परेद्युः
समुद्रतीरे कपिभिः समेतः ।
नालोकयन् क्षिप्तचरं समुद्रे
विसिष्मिये पूर्वदिने शिलौघम् ।।7।।

शिला इतः कोऽपनयत्यकस्मात्
कस्मादिति ज्ञातुमशक्नुवानः ।
कपिर्हनूमान् व्यचिचिन्तदित्थं
स्थेयं मयाऽऽराज्जलधेर्निशायाम् ।।8।।

शिलाः समुद्रे दिवसे क्षिपामो
लोपं तु ता यान्ति कथं निशायाम् ।
कस्ताः किमर्थं च नयत्ययं मे
विवेचनीयो विषयोऽस्ति सूक्ष्मम् ।।9।।

परिश्रमोऽस्माकमनर्थकत्वं
दिवा कृतो याति निशासु हन्त ।
एवं स्थिते सेतुनिबन्धनं स्या-
दशक्यमेवेति महाननर्थः ।।10।।

स्थास्यामि रात्रावतिसावधानो
विहाय निद्रां समया समुद्रम् ।
द्रक्ष्यामि किं वा कुरुतेऽथ को वा
भवेदनेनैव रहस्यभेदः ।।11।।

आस्थाय सङ्कल्पमिमं हनूमान्
समुद्रतीरे स्थितिमान् बभूव ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रान्तोऽपि भूयो न ययौ स निद्रां
धीराः स्वकार्यैकपरा भवन्ति ।। 12 ।।

प्रलोभिता भूरि सुखैषणाभिः
कष्टैरनिष्टैः परिवेष्टिता वा ।
अङ्गीकृतान्नैव कथञ्चनापि
धीराः स्वकार्याद्विरता भवन्ति ।। 13 ।।

गोधूलिवेलापगमे निशायां
समागतायां कपिरस्ततन्द्रः ।
दिङ्मण्डले चन्द्रमरीचिधौते
निस्तब्धतायां परितः स्थितायाम् ।। 14 ।।

तीरे समुद्रस्य गतो हनूमा-
नब्ध्यन्तरालस्थितिबोधकामः ।
अवप्लुतः संस्तरसा तदन्त-
र्विचित्रदृश्यं समवालुलोके ।। 15 ।।

अभूतपूर्वाश्रुतपूर्वमेव
यद्विस्मयं तस्य भृशं ततान ।
अकल्पनीयं सुतरां बभूव
यत्तेन साक्षात्परिदृष्टमास्त ।। 16 ।।

मत्स्यांश्च मत्सीश्च सहस्रशोऽसौ
युक्तान् शिलानां व्यपरोपणाय ।
ददर्श राज्ञीमपि तत्र तेषा-
मासन्निमे यद्वचनात् प्रवृत्ताः ।। 17 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुवर्णमत्स्येत्यभिधानिका सा
दशाननस्यास्त सुता सुबुद्धा ।
अर्धं शरीरेण बभूव मत्सी
बभूव सार्धेन मनुष्ययोनिः ।। 18 ।।

कपिर्हनूमानुपसेदिवांस्तां
पप्रच्छ कस्माद्धरणं शिलानाम् ।
तन्वन्ति मत्स्याः किमु तत्र हेतुः
प्रयोजनं वा किमु तत्र तेषाम् ।। 19 ।।

एते मदादेशवशात्प्रवृत्ताः
पितुर्ममादेशवशादहं च ।
कुर्वे तथाऽहं स यथाऽऽदिशन्माम्
'आज्ञा गुरूणां ह्यविचारणीया' ।। 20 ।।

बद्धो भवेत्सेतुरपांनिधौ चेच्-
चमूरुपेयाद् भवतां नु लङ्काम् ।
मा भूदिदं, तत्परिहारहेतो-
स्तातोऽत्र मां कर्मणि संन्ययुङ्क्त ।। 21 ।।

परस्सहस्रैर्निजमत्स्यसैन्यैः
क्षिप्ताः शिला यत्नवशेन वार्धौ ।
उद्धारमुद्धारमपाकरोमि
यत्नं च वोऽहं विफलीकरोमि ।। 22 ।।

सांराविणं क्षिप्तशिलौघजातं
पपात तातश्रुतिशष्कुलीषु ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

यदा तदानीं बुबुधे विपश्चि-
न्निबध्यमानं जलधौ स सेतुम् ।। 23 ।।

कालेन तस्य प्रतिकारकार्ये
न्ययुङ्क्त मां योजनकर्मदक्षः ।
असावगादीच्च सुते! प्रयाहि
शत्रोश्च यत्नं विफलं विधेहि ।। 24 ।।

तदेव तावद्विदधामि भद्र!
रक्षात्मनो नो भृशमेषणीया ।
स्वरक्षणान्नास्ति परो हि धर्मः
स एव तावत् परिपाल्यतेऽत्र ।। 25 ।।

इत्येतदुक्त्वा खलु मत्स्यकन्या
तूष्णीं बभूवाथ कपिर्हनूमान् ।
तद्वाक्यविन्यासचमत्कृतोऽपि
तामुत्तरं तावदिदं प्रपेदे ।। 26 ।।

अर्थ्यं च हृद्यं च वचस्तवेदं
सुवर्णमत्स्ये! स्फुटवर्णशोभि ।
त्वद्वाक्यविन्यासचमत्कृतोऽपि
ब्रुवे वचस्त्वद्विपरीतमत्र ।। 27 ।।

'सम्बन्धमाभाषणपूर्वमाहु-
र्वृत्तः स नावत्र समुद्रमध्ये' ।
ब्रवीमि यत्त्वां हितकाम्ययाऽहं
सम्बन्धिनो मे श्रृणु देवि! तत्त्वम् ।। 28 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

विचारशक्तिः प्रकृतिप्रदत्ता
हेया जगत्यां न जनैः कदाचित् ।
नृणां पशूनां च कथञ्चिदेव
तदन्यथात्वे न भवेद्विवेकः ।। 29 ।।

सत्यं वचस्तद् भवती यदाह
मान्याः सदा नो गुरवो जगत्याम् ।
तथाऽप्यनौचित्यकृतं कदापि
कर्मादसीयं न समर्थनीयम् ।। 30 ।।

श्रीरामपत्नीमहरत् पिता ते
छलेन साध्वीं धृतसाधुवेषः ।
अधर्म्यमाचारविवर्जितं च
कार्यं कृतं तेन जघन्यमेतत् ।। 31 ।।

अकीर्तिरितेन जगत्त्रयेऽस्य
च्छलेन दारान् हरतोऽपरस्य ।
वेदार्थविज्ञोऽप्यपवित्र एष
'आचारहीनं न पुनन्ति वेदाः' ।। 32 ।।

पिताऽपि यद्युत्पथमाश्रयेत
वर्ज्यो भवेदेव कदन्नवत्सः ।
साहाय्यमस्य प्रविधेहि न त्वं
विवेकिनामग्रसरा मताऽसि ।। 33 ।।

श्रुत्वैतदूर्जस्वि वचः कपेः सा
ऽभवत्क्षणं गूढविचारमग्ना ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

आन्दोलिताऽथो विपरीतभावै-
वर्तिरिता नौरिव निम्नगायाम् ।। 34 ।।

दीर्घं विनिःश्वस्य विचिन्त्य किञ्चित्
सुवर्णमत्स्या कपिमाबभाषे ।
तत्सत्यमेवास्ति यदात्थ सौम्य!
त्वत्तो न मे विप्रतिपत्तिरस्ति ।। 35 ।।

नार्यस्मि नारीहरणं बलेन
च्छलेन वा नैव समर्थयेय ।
कष्टाय तस्यै प्रियविप्रयोगः
पतिर्हि नार्यै परमेश्वरोऽस्ति ।। 36 ।।

मूढा पितुर्मोहवशं गताऽहं
साहाय्यमस्याचरितुं प्रवृत्ता ।
मोहोऽस्ति नष्टो वचनैः स मेऽद्य
श्लक्ष्णैस्त्वदीयैः सुविचारवद्भिः ।। 37 ।।

सज्जाऽस्मि कर्तुं वचनं त्वदीयं
सर्वेऽनुगा मे विरता भवन्तु ।
स्थाने स्थिताः सन्तु शिलास्तवैताः
सिद्धोऽस्तु ते भद्र! मनीषितोऽर्थः ।। 38 ।।

इत्येतदुक्त्वा विरराम धीरा
प्रीतिं कपेश्चेतसि कुर्वती सा ।
अन्योन्यमालोकयतां तदा तौ
सुवर्णमत्स्या च कपिश्च वीरः ।। 39 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवं तदाऽऽलोकयमानयोस्तु
मिथोऽनुरागोऽङ्कुरितो बभूव ।
बभूवतुस्तद्वशगावुभौ च
साधारणः प्राणिषु भाव एषः ।। 40 ।।

(वसन्ततिलकावृत्तम्)

वज्राङ्ग एष तरुणः शुभदर्शनश्च
धीरः पराक्रम इवाश्रिततत्स्वरूपः ।
सुश्लक्ष्णवाक् परहिते निरतो वदान्यो
लोकातिगैर्गुणगणैः परिभूषितश्च ।। 41 ।।

दृष्ट्वैनमत्र मनसः सुतरामनीशा
जाने न किं खलु मया करणीयमत्र ।
पर्याकुलेव लुलितेव सुविह्वलेव
वल्लीव पौरुषतरुं श्रयितुं लषामि ।। 42 ।।

किं नाम चेतसि भवेच्छुभदर्शनस्य
भावः स एव हृदयं मम यो धुनोति ।
एषोऽपि किं कुसुमचापशरौघविद्धो
गाढं भवेदहमिवेति सुवर्णमत्स्या ।। 43 ।।

चिन्तापरा विविधचारुविचारवीचि-
प्रेङ्खोलिता न वचनं किमपि प्रपेदे ।
वायोः सुतोऽपि कमनीयतमाङ्गयष्टिः
पश्यन्न तां स्वमनसः प्रबभूव वीरः ।। 44 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सौन्दर्यमद्भुतमनिन्द्यतमं जगत्यां
वर्णः सुवर्णमिव कोकिलवत्स्वरश्च ।
भृङ्गावलीव ननु कुन्तलराजिरस्याः
कं वा नहि प्रमदयेत् प्रमदोत्तमैषा ।। 45 ।।

धीरं विलोकयति विस्फुटमन्दहासा
वाचं न मिश्रयति वानरवीरवाचा ।
आविष्करोति दृढभूमिमुपेयिवांसं
निःश्वासवायुमिषतः स्मरदाहमेषा ।। 46 ।।

अन्योन्यमेवमवितृप्ततयोपपन्नौ
गाढोपगूहनसुखाकुलितान्तरङ्गौ ।
वायोः सुतश्च रमणी च सुवर्णमत्स्या
गाढं बभूवतुरुभौ मदनेषुविद्धौ ।। 47 ।।

आनन्दमापतुरुभौ च गिरामगम्यं
संमीलिताक्षियुगलौ परिलुप्तधैर्यौ ।
रागाङ्कुरस्फुरणताम्रकपोलयुग्मौ
वक्षोनिपीडमधरामृतपानमग्नौ ।। 48 ।।

रोमोद्गमप्रकटरागविशेषवृत्ती
विद्धौ समं मनसिजासमपुङ्खपत्रैः ।
आबद्धबाहुयुगलौ परिनिःश्वसन्तौ
स्वेदाम्बुजालजटितालकजालकाली ।। 49 ।।

अन्योन्यचुम्बनपरौ रतिकर्मसक्तौ
सम्प्रापितौ मनसिजेन दशां विचित्राम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

आनन्दसागरतरङ्गपरम्परासु
प्रेङ्खोलितौ सममुभौ रजनीं व्यनैष्टाम् ।। 50 ।।

(अनुष्टुब्वृत्तम्)

व्यतियाप्य निशामेवं कपिः प्रमुदितस्तदा ।
वारांनिधेः समुत्प्लुत्य स्वस्थानं पुनरागतः ।। 51 ।।

विनिर्गता समुद्राच्च मत्स्यकन्याऽपि सुन्दरी ।
लङ्कां प्रत्याजगामाथ परां निर्वृतिमीयुषी ।। 52 ।।

लङ्काप्रत्यागमात्पूर्वं पुत्रं साऽजनयच्छुभम् ।
मच्छानुरितिनामानं हनूमत्पितृकं शुभा ।। 53 ।।

रुष्येत्कदाचिन्मे तात इति भीतिवशं गता ।
विससर्ज सुतं तीरे समुद्रस्यैव सुन्दरी ।। 54 ।।

मच्छानुरितिनामाऽयं कालेन ववृधे सुतः ।
पितृवच्चैव बलवान् वीरश्च समजायत ।। 55 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्रयोदशः सर्गः

(मैयराबोपाख्यानम्)

(इन्द्रवज्रावृत्तम् उपजातिवृत्तञ्च)

सुवर्णमत्स्याविहितेऽन्तराये
हनूमता युक्तिवशान् निरस्ते ।
सेतुः समुद्रे समयेन बद्धः
श्रीरामसैन्यैर्हनुमत्पुरोगैः ।।1।।

सैन्यानि चैनेन सुखं गतानि
कालेन लङ्कापुरमाप्तवन्ति ।
समन्ततस्तां रुरुधुर्दशास्य-
चिन्ताचितावह्निविवर्धकानि ।।2।।

युद्धं विना मे विजयो यदि स्यात्
फलेग्रहिस्तर्हि मनोरथः स्यात् ।
वधेन रामस्य जयो ध्रुवं मे
तत्रैव मे सर्वविधोऽस्तु यत्नः ।।3।।

सङ्कल्पमारुह्य दृढं स एतं
जनं तमन्वेष्टुमना बभूव ।

 CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादने योऽस्य भवेत्समर्थो
विवेद तं च प्रियमैयराबे ।।4।।

पातालदेशं किल मैयराब-
नामा नृपो नाम पुरा शशास ।
हस्तापचेयामितविक्रमोऽसा-
वजेय इत्येव सुविश्रुतोऽभूत् ।।5।।

अभिन्नमित्रं स दशाननस्य
तस्य प्रमाणीकुरुते स्म वाक्यम् ।
कल्याणकृत् स स्वसखस्य तस्य
निरन्तरं तद्धितवृत्तिरासीत् ।।6।।

सम्प्राह तं वीरवरं दशास्यो
रामं जहि त्वं परिपन्थिनं मे ।
सखाऽनुजो वाऽपि मतो मम त्वं
त्वामेव कार्येऽत्र ततो नियुञ्जे ।।7।।

तदभ्युपागात् किल मैयराबः
प्रमाणयन् मित्रवचो गरीयः ।
आगाच्च तत्राशु बभूव यत्र
सत्रा भटैः स्वै रघुवंशवीरः ।।8।।

रामस्य तावच्छिबिरं प्रपन्नः
पातालराजो विससर्ज तादृक् ।
चूर्णं स्थिता येन जनाः समेऽपि
निद्रावशं तत्र गता अकस्मात् ।।9।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्वेषु सुप्तेषु तदा प्रसुप्तं
श्रीरामभद्रं स ततोऽपनिन्ये ।
पातालभूमिं वधकाम्यया तं
सम्प्रापयामास च हेलयैव ।। 10 ।।

पातालभूमिं समुपेयिवांश्च
प्रक्षेप्तुमुष्णोदक एनमैच्छत् ।
श्रीरामभद्रः प्रविलुप्तसंज्ञो
मृत्योर्मुखं यास्यति बन्धुहीनः ।। 11 ।।

यावत्स सङ्कल्पमिमं तनोति
तावत्सहाया रघुनन्दनस्य ।
चूर्णप्रभावे क्षयमीयुषि द्राग्
विहाय निद्रां परितो न्यशाम्यन् ।। 12 ।।

रामं यदा ते ददृशुर्न तत्र
तदा बभूवुर्हतचेतसस्ते ।
गतः क्व धीमानिति नाविदुस्ते
विचारयन्तोऽपि बहु स्वबुद्ध्या ।। 13 ।।

कुतो ह्यकस्माच्छयितेषु तेषु
श्रीरामसूर्योऽस्तमुपागतोऽस्ति ।
को वा नयेत्तं क्व नु वेति तेषां
नात्र स्वबुद्धिप्रसरो बभूव ।। 14 ।।

विभीषणः केवलमास्त तेषु
निजेन दिव्यस्फटिकेन योऽवेत् ।

1. याव

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

न श्रव्यमासीन्न च वाऽपि दृश्य-
मन्यैर्जनैर्यज्जगतीतलेऽस्मिन् ॥15॥

तेनैव दिव्यस्फटिकेन दिव्य-
शक्तिर्दशास्यावरजो व्यजानात् ।
कुत्रास्ति रामोऽपहृतश्च केन
कस्माच्च हेतोः किमवस्थकश्च ॥16॥

श्रीरामसैन्येषु परस्परेण
दीर्घं विमर्शं समुपेतवत्सु ।
विभीषणो भीषणशोकमेषां
हर्तुं गिरं तावदिमां प्रपेदे ॥17॥

जानामि केनापहृतो मनस्वी
मायामुपाश्रित्य रघुप्रवीरः ।
प्रापय्य निद्रावशमेष नीतो
जाग्रत्पुनर्नो मनसाऽपि धृष्यः ॥18॥

पातालदेशाधिपतिः सहायो
दशाननस्यास्ति हि मैयराबः ।
तेनैव मायावशतोऽपनीतः
श्रीरामभद्रः सुतरां विनीतः ॥19॥

नीतश्च देशं स्वकमेष तेन
प्रस्वाप्य सर्वानिह संस्थितान्नः ।
प्राप्तव्य एवास्ति स देश आशु
यावत्स तं हन्ति[1] रघुप्रवीरम् ॥20॥

1. यावत्पुरानिपातयोर्लट् (3. 3. 4.) इत्यनेन लटि रूपम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

गच्छन् क्रमात्तेन ददर्श चापि
सरोऽन्यदेकं स कपिप्रवीरः ।। 26 ।।

सरस्तदासीत्परिरक्षितं तत्-
पुत्रेण मच्छान्वभिधेन दिव्यम् ।
सुवर्णमत्स्याभिधया प्रसूतो
योऽभूत्पुरा सङ्गवशान्निजस्य ।। 27 ।।

प्रसूतमात्रं किल सा तनूजं
दशास्यरोषं परिहर्तुकामा ।
समुद्रतीरे विससर्ज वामा
प्रीताऽपि पुत्राऽऽप्तिवशेन भीता ।। 28 ।।

समुद्रतीरे विलसन्तमेनं
स्वप्ने कदाचित्परिदृष्टपूर्वम् ।
पातालराजोऽक्षिगतं चकारा-
ऽऽदाय स्वदेशं च समानिनाय ।। 29 ।।

पुत्रीचकारापि च तं प्रहृष्टः
सम्पोषयामास सुखेन चापि ।
कालेन तावद्ववृधे कुमारः
कुमारवच्छक्तियुतो बभौ च ।। 30 ।।

तारुण्यलावण्यविभूषिताङ्गो
नाभूत्स दृष्टो जनकेन पूर्वम् ।
हेतोरतो नह्यभवत्तदात्वे
ऽभिज्ञा तनूजस्य पितुश्च काऽपि ।। 31 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

विकस्वराम्भोजविलोभनीयान्
मच्छानुराराात्सरसः स्थितः सन् ।
सविस्मयोऽदृष्टचरीं कदापि
विचित्ररूपाकृतिमालुलोके ॥32॥

कोऽयं भवेद्धेतुरिहात्र को वा
समागमेऽस्येति बहु प्रतर्कम् ।
आरूढवानप्यतिसूक्ष्मदृष्ट्या
न निश्चयं गन्तुमयं शशाक ॥33॥

अज्ञात एषोऽत्र जनः कुतश्चित्
समागतो मे प्रतिरोधमर्हः ।
मच्छानुरेवं प्रविचिन्त्य साक्षात्
कपेः प्रतीरोध इव स्थितोऽभूत् ॥34॥

तृणाय मत्वा हनुमान् यदा तं
प्रक्रान्तुमग्रे समभूत् प्रवृत्तः ।
पदाहताशीविषतुल्यरूपो
मच्छानुरेनं न्यरुणत्तदानीम् ॥35॥

रुद्धे कपौ वीरवरेण तेन
भयङ्करं युद्धमभूत्प्रवृत्तम् ।
शौर्यं च वीर्यं च पराक्रमश्च
यत्रोभयोश्चित्रमिवाविरासन् ॥36॥

पिता च पुत्रश्च तदा नियुद्धे
परस्परेण व्यतिजघ्नतुस्तौ[1] ।

1. न गतिहिंसार्थेभ्यः (1.3.15) इत्यनेनात्मनेपदनिषेधः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तलौ विनिष्पीड्य क्रुधा परीता-
वुरोनिपीडं परिसङ्गतौ च ।।37।।

चिरं नियुध्यापि यदा न कञ्चि-
दपश्यतां तौ परिहीयमानम् ।
तदा परं विस्मयमभ्युपेतौ
क्षणं नियुद्धाद्विरतौ प्रवीरौ ।।38।।

अन्योन्यमालोकयतां तदा तौ
साम्यं मिथस्तौ समपश्यतां च
भूयोऽप्यतो विस्मयमीयिवांसौ
सम्भाषणे प्रावृततां ततश्च ।।39।।

संरक्षकं पद्मसरोवरस्य
पप्रच्छ तावद्धनुमान् युवानम् ।
को वा भवान् कस्य सुतः कथं च
पराक्रमोऽदृष्टचरो जगत्याम् ।।40।।

नैवाद्य यावत्कठिनाः प्रहाराः
केनापि सोढा इह मे जगत्याम् ।
वायोरिवासह्यतमाऽस्ति शक्ति-
र्ममेति लोकेषु गता प्रसिद्धिः ।।41।।

त्वमेव तावत्प्रथमोऽसि येन
मम प्रहाराः कठिना विसोढाः ।
न केवलं तावदिदं त्वया तु
मय्येव गाढं प्रहृतं प्रवीर ! ।।42।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

निशम्य वाचोऽस्य तदा प्रवाचो
मच्छानुरेनं प्रहसन्निवोचे ।
कामं भवान्वीर्यवतां वरेण्यो
भवेन्न मेऽग्रे भवतोऽस्ति वीर्यम् ।। 43 ।।

वायोस्तनूजस्य सुतोऽस्म्यहं भो !
हनूमतो लोकसुविश्रुतस्य ।
पुत्र्यां दशास्यस्य पुरा सुवर्ण-
मत्स्याभिधायामभिसंप्रजातः ।। 44 ।।

न मे पुरः स्थातुमिहात्र शक्तः
शक्तोऽपि लोके क्व भवान् पुनस्तु ।
वायोर्दशास्यस्य च भीषणे द्वे
शक्ती स्थिरे स्तो मयि विद्धि तावत् ।। 45 ।।

श्रुत्वैतदूर्जस्वि वचः सुतस्य
संहृष्टरोमा हनुमांस्तदानीम् ।
अवाप्तसर्वस्व इवातितृप्तो
मच्छानुमूचे वचनं प्रहृष्टः ।। 46 ।।

त्वं मे सुतो वीर ! पिता तवाहं
लोके हनूमानहमेव पुत्र ।
त्वद्दर्शनेनैव सुतृप्तमेहि
मह्यं परिष्वङ्गसुखं प्रदेहि ।। 47 ।।

सत्पुत्रिणां धन्यतमोऽस्मि पुत्र !
यत्त्वादृशो मेऽस्ति गुणी सुपुत्रः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

उत्थाप्य तं वानरवीरमुख्यः
शिरस्युपाघ्राय च वीरवर्यम् ।
वात्सल्यभाराकुलितान्तरङ्गः
पुनः पुनः सस्पृहमालिलिङ्ग ।। 54 ।।

व्रीडावनम्रः स च तं विनम्र-
भावेन भूयो विनिबद्धभावः ।
अतर्कितावाप्ततदीयसङ्गः
समालिलिङ्ग प्रणनाम चापि ।। 55 ।।

एवं क्षणौघे कतिचिद् व्यतीते
पितुश्च पुत्रस्य च सङ्गमेन ।
भावस्य चावेग उपेत ईष-
च्छान्तिं सुतः स्वं जनकं बभाषे ।। 56 ।।

प्रयोजनं मेऽत्र समागमस्य
सम्प्रोच्यतां तात ! सुदूरदेशे ।
को वाऽत्र हेतुः किमु वाऽपि साध्यं
क्रिया अपार्था न भवादृशां स्युः ।। 57 ।।

श्रुत्वा वचस्तस्य कपिर्हनूमान्
वृत्तं यथावृत्तममुं जगाद ।
श्रीराममन्वेष्टुमहं प्रवृत्तः
पातालदेशं प्रति सम्प्रयामि ।। 58 ।।

पन्थानमेतस्य कृते वद त्वं
येनाहमेनेन तमभ्युपेयाम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

भवेदनर्थः सति मे विलम्बे
ऽलम्भूष्णुरेतं नहि सोढुमस्मि ।। 59 ।।

मच्छानुराकर्ण्य वचोऽदसीयं
चिन्तां मनस्वी महतीं प्रपेदे ।
कृत्येऽप्यकृत्येऽपि च मूढभावः
सद्यो न निश्चेतुमसौ शशाक ।। 60 ।।

आख्यामि चेन्मार्गमिमं भवेत्स
न्याय्यो न मार्गः प्रति मैयराबम् ।
सम्पोषितोऽहं सुतनिर्विशेषं
येनास्मि बाल्यात्करुणापरेण ।। 61 ।।

नो मार्गमाख्यामि भवेत्तदप्य-
न्याय्यं मदीये जनके प्रियेऽस्मिन् ।
यस्यात्मजोऽहं मम जन्महेतु-
र्यः, सम्भवो यस्य वशान्ममाभूत् ।। 62 ।।

एवं स्थिते किं करवाणि किं वा
ब्रवाणि किं वा खलु चिन्तयानि ।
धर्मस्य लोपो न भवेद्यथा मे
प्रवर्तितव्यं मयका तथाऽत्र ।। 63 ।।

एवंविधां धर्मविरोधशून्यां
बुद्धिं समाधाय समाहितात्मा ।
स्ववाग्मितायाः परमं प्रमाणं
मितं च सारं च वचोऽभ्युवाच ।। 64 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्राप्तो भवान्येन पथाऽत्र तावत्
किं तेन शक्यं न पुनः प्रयातुम् ?।
परेङ्गितज्ञानफलाढ्यबुद्ध्या
तदाशयं द्राग्बुबुधे हनूमान् ।। 65 ।।

(अनुष्टुब्वृत्तम्)

उद्धृत्य कमलं सद्यस्तन्नाले स्वमवेशयत् ।
पातयन् स्नेहलुलितां दृष्टिं स्वतनये कपिः ।। 6 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

चतुर्दशः सर्गः

(मैयराबोपाख्यानं पूर्वानुवृत्तम्)

(इन्द्रवज्रावृत्तम् उपजातिवृत्तञ्च)

तदा प्रवृत्तो गमने हनूमान्
यथाऽध्वनोंऽशं क्रमते तथैव ।
तन्मार्गरोधार्थमुपस्थितोऽभू-
ज्ज्वालावलीढो भयदोऽद्रिरेकः ।।1।।

दृष्ट्वैवमेनं समुपस्थितं स
घोरं मनागप्यविकम्पितः सन् ।
सविग्रहोऽन्योऽद्रिरिवावतस्थे
तृणाय तं वीरवरश्च मेने ।।2।।

शत्रोः प्रयोगोऽयमिति प्रपन्नो
हसन्निवैनं प्रविलङ्घ्य वीरः ।
कार्यैकतानो विगताभिमानो
भूयोऽपि गन्तुं हनुमान् प्रवृत्तः ।।3।।

अध्वानमेष क्रमते पुराऽसौ
यदा तदाऽभूत्प्रकटोऽत्र कश्चित् ।
घनाभ्रवृन्दप्रतिमो विशालो
दुर्दान्त एको द्विरदः कुतश्चित् ।।4।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रहर्तुमेनं स यदोद्यतोऽभूत्
तदैव तस्मिन् प्रजहार तीव्रम्।
वायोः सुतो वायुजवेन चैनं
सम्प्रापयामास यमस्य लोकम्॥5॥

निहत्य तं यावदभूद्धनूमान्
भूयोऽपि वीरो गमने प्रवृत्तः।
तावत्कुतश्चिन्मशकावली तं
सम्प्रावृणोत्कृष्णघनावलीव ॥6॥

वात्येव घोरा रजनी तमिस्रा
भयङ्करेवापदिवापतत्सा ।
तया समन्तात् क्षतविक्षतोऽपि
धैर्यं स नो धैर्यधनो मुमोच॥7॥

कपिप्रवीरो घनया तयाऽभूत्
क्लान्तः शरीरेण न चेतसा तु।
कांश्चित्क्षणांश्चापि बभूव दृष्टि-
स्तस्यावरुद्धा खलसेवयेव॥8॥

द्रष्टुं समर्थोऽपि न किञ्चिदेष
घनान्धकारेष्विव दीपहीनः।
आलोडयामास भुजद्वयेन
जलप्रपूर्णामिव तां स्रवन्तीम्॥9॥

शतं सहस्रं मशकावलेर्द्राक्
पाणौ गृहीत्वा स विनिष्पिपेष।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अल्पेन कालेन च वातवत्सो
घनावलीं वात इवाच्छिनत्ताम् ।। 10 ।।

छित्त्वा च तां सूर्य इवोद्गतः सन्
भूयोऽपि मार्गं समभिप्रपेदे ।
कालेन चाल्पेन च वीर्यवान् स
पातालदेशं समुपाजगाम ।। 11 ।।

सम्प्राप्तमात्रश्च ददर्श तत्र
पातालदेशे रुदतीं स्त्रियं सः ।
यस्या विलापावलिवाक्प्रपञ्चः
सर्वं हि कारुण्यमयं ततान ।। 12 ।।

अभूत्तदा तद्रुदितानुसारी
कपिर्हनूमान् करुणार्द्रचेताः ।
पप्रच्छ चैनां किमिति त्वमेवं
सगद्गदं भामिनि ! रोदिषीह ।। 13 ।।

त्वत्क्रन्दनाकृष्टमना उपेत-
स्त्वामत्र भद्रे ! वद तत्र हेतुम् ।
मदीयसाध्यं यदि किञ्चन स्याद्
ध्रुवं तदर्थं प्रयतिष्य एव ।। 14 ।।

सौम्यां कपेराकृतिमाकलय्य
विश्वासमस्मिन् समुपेयुषी सा ।
असंस्तुताऽप्याह वचस्तमेवं
सौम्याकृतिः प्रत्ययमादधाति ।। 15 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वसाऽस्मि पातालनृपस्य तावद्
वीरक्वनाख्या विलपाम्यहं भोः ।
कृते तनूजस्य, सुविह्वलाऽहं
सुतः प्रियः सर्वजनस्य नूनम् ।। 16 ।।

प्राणा यदा संशयमापतेयुः
सुतस्य का नाम तदास्ति माता ।
दीर्येत यस्या हृदयं न भद्र !
पुत्रस्य शोको ह्यविषह्य एव ।। 17 ।।

पुत्रोऽस्ति मे वैयविगाख्य एको
यं हन्तुमिच्छत्यथ मैयराबः ।
भ्राताऽपि सन्मे सुतरां कुबुद्धि-
रन्याय्यमस्मिन् प्रविवृत्सतीह ।। 18 ।।

उष्णोदकापूर्णमिदं विधातुं
कुण्डं पुरस्तान्निहितं विशालम् ।
चाण्डालवच्चण्डहृदा प्रदिष्टा
भ्रात्रैव मे सम्प्रति मन्ददिष्टा ।। 19 ।।

कुल्येव दीर्घाकृति कुण्डमत्र
दन्दह्यमानं ज्वलितेन्धनेन
बाष्पावलिं मद्गतबाष्पतुल्या-
मुन्मुञ्चति क्रूरहृदः प्रतीकम् ।। 20 ।।

रामं तथा मत्तनयं च भद्र !
प्रक्षिप्य हा ! तत्र च सम्पचय्य ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

घोरेण तावद्विधिना नृशंसो
जिघांसति द्वौ सममेव पापः ।।21।।

श्रुत्वा गिरं श्रोत्रयुगस्य शूलं
स्वकार्यसिद्धौ त्वरितो मनस्वी ।
कपिर्हनूमान् समुवाच वाचं
वीरक्वनां तां वदतां वरेण्यः ।।22।।

वशं शुचस्त्वं नहि याहि भद्रे !
नैवं कदाचिद् भवितेत्यवेहि ।
तदन्तकोऽहं समुपस्थितस्तं
मृत्योर्वशं शीघ्रमहं नयामि ।।23।।

त्वं ब्रूहि तावत् क्व नु मैयराबो
मां प्रापय त्वं समया च तं द्राक् ।
दुर्दान्तमेनं निकषाऽन्तकं स्व-
शक्त्या ऽऽपयिष्याम्यचिरेण भद्रे! ।।24।।

श्रुत्वाऽदसीयं वचनं बभाषे
वीरक्वना नो सुकरं तदस्ति ।
गम्यं भवेत्तत्र तु तोरणेन
संरक्षितं दानववीरमुख्यैः ।।25।।

संस्थापिता किञ्च तुलास्ति तत्र
यस्यां समारोप्य कठोररूपाः ।
प्राग् रक्षकास्तोरणतः प्रवेशात्
मां तोलयेयुर्विधिरत्र तादृक् ।।26।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मनागपीमे च यदि प्रपन्ना
भारातिरेकं मम ते तदानीम्।
न केवलं मां नहि वञ्चयेयु-
स्तत्र प्रवेशादपि तु प्रहण्युः ।।27।।

न मेऽस्ति चिन्ता निजजीवितस्य
त्वदर्थमेवास्मि विचिन्तिताऽहम्।
मया समं भोस्त्वमपि प्रणाशं
यातासि चिन्तेति मनो दुनोति ।।28।।

प्रोचे कपिस्तामयि मा चिचिन्तो
भवेदनिष्टं न च मे न ते च।
मां प्रापय त्वं स्थलमाशु तत्ते
यत्राग्रजस्तिष्ठति मैयराबः ।।29।।

श्रुत्वाऽदसीयं वचनं विषण्णो-
पायान्तरं नैव च वीक्षमाणा।
वातेरिता नौरिव साऽवशा स्व-
स्योवाच भद्रोमिति तं कपीन्द्रम् ।।30।।

कार्येऽभ्युपेते प्रमना हनूमान्
अम्भोजतन्तुप्रतिरूपकोऽभूत्।
भारो न वर्धेत तुलाधिरोपे
वीरक्वनाया इति बद्धबुद्धिः ।।31।।

एवं परीवृत्तनिजस्वरूपं
कपिं समादाय मनस्विनी सा।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्यन्तगुप्तं दनुजाग्रयोधैः
सीमन्तिनी तोरणमाजगाम ।। 32 ।।

उवाच योधान् उपसत्तुमिच्छा
कार्येण केनापि ममाग्रजं भोः ।
अतोऽनुजानन्तु मम प्रवेशं
द्राक् तोरणादत्र विशालरूपात् ।। 33 ।।

त ऊचुरेनां विदितस्तवास्ति
विधिः प्रवेशस्य तमेव भद्रे ! ।
राज्ञा कृतं त्वं परिपालयस्व
तुलाधिरोहं प्रथमं तनु त्वम् ।। 34 ।।

भवत्विदं तावदिति प्रपन्ना
स्मृत्वा प्रपन्नार्तिहरं हरं सा ।
सीतेव वह्निं परिदीप्यमानं
वीरक्वना तत्र तुलां रुरोह ।। 35 ।।

आरूढवत्यां तु तुलातिभारा-
त्पस्पर्श भूमिं दनुजास्ततस्ते ।
शङ्कापरीताः सुतरां च भीता
नैवान्वजानन् गमनं रमण्याः ।। 36 ।।

ततोऽन्वसावुत्कुरुते[1] स्म तत्र
भटान् अहो ! मूढधियो भवन्तः ।
जीर्णा तुलेयं भवतामिहास्ति
विश्वासपात्रं नहि चाहमस्मि ।। 37 ।।

1. उत्कुरुते स्म अभर्त्सयदित्यर्थः। गन्धनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञ (1.3.32) इत्यनेनावक्षेपणार्थ आत्मनेपदम्। अवक्षेपणं भर्त्सनम्।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

दोषोऽत्र यद्यस्ति भवेत्तुलाया
एवेति सर्वैरवधारणीयम् ।
न मेऽत्र दोषोऽस्ति तथाऽपि शङ्का
यद्यस्ति तर्ह्यस्मि परीक्षणीया ।। 38 ।।

एवं भवत्वित्यभिधाय तस्याः
सम्यक् परीक्षां खलु ते प्रचक्रुः ।
न वस्तु चास्यां विविदुस्तु किञ्चिद्
यद् भारमस्याः परिवर्धयेत ।। 39 ।।

परीक्षणे दृष्टिपथं प्रयात-
श्रासीदमीषां कमलस्य तन्तुः ।
अपार्थकं वस्त्विदमित्यमीषां
बुद्धिस्तदा तद्विषये प्रवृत्ता ।। 40 ।।

अपास्य तद्विस्मयपारवश्यं
गता अलब्ध्वा नहि वस्तु तादृक् ।
भारस्य येनातिविवर्धनं स्यात्
तामन्वजानन् गमनाय योधाः ।। 41 ।।

अम्भोजसूत्राकलितस्वरूप-
स्तामन्वयासीद्धनुमान् कपिश्च ।
प्राप्तश्च तत्रैव सह स्त्रिया स
यत्र स्थितोऽभूत्खलु मैयराबः ।। 42 ।।

मृत्योर्मुखान्मुक्तममुं कपिं सा
ऽऽनन्दस्य कोटिं परमां प्रयाता ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्राऽनयद्यत्र विशालरूपं
तालद्रुमैरन्तरितं समन्तात् ।। 43 ।।

विनिर्मितश्चायसशृङ्खलाभिः
सुरक्षितं पञ्जरमेकमास्त ।
यस्मिन्नतिष्ठित् खलु मैयराब-
स्यात्मा शरीरात्पृथगेव तस्य ।। 44 ।।

प्रभञ्जनापत्यवरो हनूमान्
वेगेन तत्पञ्जरमाबभञ्ज ।
विनिष्पिपेषाथ च मुष्टिभिस्तम्
आत्मानमात्मप्रतिपन्नरूपः ।। 45 ।।

अतीव तद्दुष्करमेष कार्यं
संसाध्य वीरो ननु हेलयैव ।
उपस्थितस्तत्र बभूव यत्र
सन्दानितो दाशरथिर्बभूव ।। 46 ।।

आलोक्य तं साश्रुरभूत्कपीन्द्र-
स्तुषारवर्षीव सहस्यमेघः ।
कार्यातिपातं परिहर्तुकामः
क्षणेन वीरः समयंस्त च स्वम् ।। 47 ।।

ततो महानद्रिरिव प्रमाथी
पातालराजस्य पुरः स्थितोऽभूत् ।
कपिः प्रभू रुद्र इवान्तकाले
तद्रूपमापन्न इवान्तको वा ।। 48 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कपिर्नियुद्धे हत इत्ययं मे
'मा भूत्परीवादनवावतारः' ।।54।।

अपेहि तत्त्वं प्रददामि तेऽहं
भिक्षामसूनां नहि मे प्रियास्ते ।
पात्रं दयाया असि नैव तिर्यग्-
योनिं गता मे प्रतिरोधमर्हाः ।।55।।

श्रुत्वाऽदसीयं वचनं विहस्य
कपिर्बभाषे किल मैयराबम् ।
विकत्थसे त्वं बहु मैयराब!
विकत्थना नैव भवन्ति शूराः ।।56।।

जातोऽस्म्यहं दैववशेन तिर्यग्-
योनौ ममात्रास्ति वशो न मूढ ।
जन्मादि दैवेऽधि न पौरुषं तु
तन्मय्यधीत्येव गृहाण तावत् ।।57।।

प्रभञ्जनस्यास्मि सुतः प्रसिद्धो
लोकेषु वज्राङ्गबली हनूमान् ।
भङ्क्ष्यामि ते संहननं विशालं
मृणालदण्डं द्विरदो यथैव ।।58।।

सञ्जातमात्रोऽपि सहस्ररश्मे-
रास्वादनायोत्प्लुत आसमंद्धा ।
फलाभिसन्धिं प्रविधाय तस्मिन्
शौर्यस्य गाथां विवृणोति मे तत् ।।59।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri


एवं निहत्य तं दैत्यं रामं मुक्तं विधाय च ।
अपनिन्ये स तं स्थानात्तस्मात्प्रीतः कपीश्वरः ।। 75 ।।

(अनुष्टुब्वृत्तम्)

खं च तेन सममुत्प्लवमान-
स्तं निनाय शिबिरं स्वमथैषः ।
हर्षवर्षमतुलं परिवर्षन्
विह्वलाकुलितबन्धुजनेषु ।। 76 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri



CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पञ्चदशः सर्गः

(कुम्भकर्णवधोपाख्यानम्)

(अनुष्टुब्वृत्तम्)

अजेयो मैयराबोऽपि केनाप्यन्येन हन्यते ।
अकल्पनीयं तदभूद्दशकण्ठस्य सर्वथा ।।1।।

प्रेतलोकं गते तस्मिन् कुम्भकर्णं गताऽभवत् ।
अजेयविक्रमं वीरं मतिस्तस्य दुरात्मनः ।।2।।

अवश्यं स महावीरो रामवात्यां निवारयेत् ।
रक्षेल्लङ्कां स्ववंशं चेत्यास्त तस्य दृढा मतिः ।।3।।

यद्यपि कुम्भकर्णोऽभूज्जन्मना राक्षसो ध्रुवम् ।
तथापि कर्मणा नासीत्तादृशः स कथञ्चन ।।4।।

प्रकृत्या धर्मभीरुः स सीताया हरणं नहि ।
अमन्यतोचितं धीरः कुत्स्यं तदिति धारयन् ।।5।।

तद्बुद्धिभेदं जनयन् दशकण्ठस्तुतोद तम् ।
अतीव निशितैर्वाक्यैस्तं भीरुरिति कीर्तयन् ।।6।।

ओतोर्दर्शनमात्रेण यथाऽऽखुं भयमाविशेत् ।
तथैव समवस्था ते वृथा वीर्याभिमानिनः ।।7।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्याघ्रस्य गन्धमात्रेण यथा हरिणको भवेत् ।
आकुञ्चितसमस्ताङ्गस्तदवस्थाऽस्ति ते स्थितिः ।।8।।

काकस्य दूरतो दृष्टिं धनुष्यापतितेऽथवा ।
यादृशी स्यात्स्थितिर्भीरो ! तादृश्यस्ति तव स्थितिः ।।9।।

तुन्न एवंविधैर्वाक्यैः कुम्भकर्णोऽतिवीर्यवान् ।
सम्मानं रक्षितुं भ्रातुर्युद्धाय समनह्यत ।।10।।

शक्तिं गृह्णन् करेणासौ शत्रूणां भयवर्द्धिनीम् ।
सैन्येन महता युक्तो रामं योद्धुं विनिर्ययौ ।।11।।

तं ददर्श समायान्तं महत्या सेनया युतम् ।
साक्षाद्रुद्रमिव क्रुद्धं दूराद् भ्राता विभीषणः ।।12।।

अनिवार्यं स मत्वा तं यथा गिरिणदीजलम् ।
सौम्यैरभूद् वचोभिस्तं निवर्तयितुमुद्यतः ।।13।।

अचिचिन्तत् स मनसि सदा धर्मपरायणः ।
धर्ममेवाश्रयेदेष न चाधर्मं कथञ्चन ।।14।।

रावणे यद्यपि स्नेहश्चेतस्यस्यास्ति सुस्थिरः ।
नैषोऽभिभूतस्तेन स्याद्वातेनेव महाद्रुमः ।।15।।

इति सञ्चिन्त्य स प्राह प्राञ्जलिस्तमुपद्रुतः ।
अकालहीनं कार्यार्थी कुम्भकर्णं विभीषणः ।।16।।

तं दृष्ट्वा कुम्भकर्णस्य सहसा ज्वलितोऽभवत् ।
शत्रुपक्षात्समायातं कोपोऽग्निः समिधा यथा ।।17।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

यद्यप्यासीत्कुम्भकर्णो भृशं धर्मपरायणः ।
तथापि स्वे नृपे तस्य स्नेहोऽभूद् बलवत्तरः ।। 18 ।।

तं विहाय विनिर्यातं मातृभूमिं निजां तथा ।
कारणाद् येन केनापि नैवासौ बह्वमन्यत ।। 19 ।।

भर्त्सयामास निशितैर्वचनैः परुषाक्षरैः ।
परपक्षाश्रितं तं स ज्ञातिद्रोहापराधिनम् ।। 20 ।।

ज्ञातिद्रोहात्परतरं देशद्रोहात्तथा च न ।
कुत्स्यं कर्माभवत्तस्य धार्मिकस्यापि धीमतः ।। 21 ।।

किञ्चिद्विलक्षो वचनैस्तं सम्प्राह विभीषणः ।
देशज्ञातिपरित्यागे हेतुरस्ति विशेषतः ।। 22 ।।

न पृथग्जनवद्रामो द्रष्टव्यो येन केनचित् ।
भूलोकमवतीर्णोऽयं साक्षान्नारायणः प्रभुः ।। 23 ।।

शुश्रूषा तस्य सर्वेषां कर्म पुण्यतमं मतम् ।
इत्येव धियमाश्रित्य तमहं समुपस्थितः ।। 24 ।।

उपहस्य वचस्तस्य कुम्भकर्णस्तमूचिवान् ।
मिथ्या वचस्ते दुर्बुद्धे ! रामो नारायणो नहि ।। 25 ।।

यद्येवं मन्यसे तत्त्वं तस्य पक्षं समाश्रितः ।
प्रश्नानां मे समाधानं तस्मादाप्नुहि सत्वरम् ।। 26 ।।

यद्यसौ मे समादध्यात्प्रश्नांस्तर्हि वचस्यहम् ।
तव प्रत्ययमेतास्मि तमुपैतास्मि च ध्रुवम् ।। 27 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पिपृच्छिषामि यान् प्रश्नान् शृणु त्वं तान् विभीषण ।
उत्तराणि च विद्धि त्वं रामान्नारायणात्तव ।। 28 ।।

को नामास्ति यतिर्मूढो दन्ती ऋजुरदस्तथा ।
का चास्तिच्छलिनी योषा को न्वस्ति च शठः पुमान् ।। 29 ।।

प्रश्नानेतान्समादाय राघवं समुपस्थितः ।
रावणावरजो धीमान् समाधानसमुत्सुकः ।। 30 ।।

राघवश्च कपीन्द्राश्च चिरं चिन्तनमास्थिताः ।
एषां प्रश्नविशेषाणां समाधानं न लेभिरे ।। 31 ।।

तदाऽङ्गदोऽतिचतुरः कुम्भकर्णमुपागतः ।
तमूचे भोः समाधानं प्रभुर्नो वेद तत्त्वतः ।। 32 ।।

यथाऽस्य चिन्तनं तत्र तथा तेऽपि भवेत् किमु ।
इति ज्ञानार्थमेवाहं त्वामत्र समुपस्थितः ।। 33 ।।

तद् ब्रूहि त्वं समाधानं प्रथमं येन सत्वरम् ।
सत्यापयेन्निजं तावद्दर्शनं मत्प्रभुः प्रियः ।। 34 ।।

बालोचितं वचस्तस्य निशम्योच्चैर्जहास सः ।
अशक्तिं राघवस्यात्रोपहासपदमापयन् ।। 35 ।।

ततः प्रववृते दैत्यः समाधातुं स्वयं निजान् ।
प्रश्नान्येऽत्यन्तजटिला राघवायाभवन् पुरा ।। 36 ।।

मूर्खो यती राम एव यो भार्यामजहात्प्रियाम् ।
एकाकिनीमरण्येऽपि हैमं मृगमभिद्रुतः ।। 37 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऋजुदन्तः कुञ्जरो हि लङ्काधीशोऽस्ति रावणः ।
परस्य भार्यां योऽकाङ्क्षदसन्तुष्टः स्वभार्यया ।। 38 ।।

शूर्पणखाऽस्तिच्छलिनी योषा या रामलक्ष्मणौ ।
अवशा स्वस्य कामान्धा प्रपेदे पुंश्चली यथा ।। 39 ।।

शठः पुमांश्च नो वंश्यो विभीषण इतीरितः ।
येन कृतौ राजद्रोहो देशद्रोहश्च गर्हितौ ।। 40 ।।

इति वाक्यं प्रवर्त्यात्र कुम्भकर्णोऽतिवीर्यवान् ।
रामसैन्यं प्रति तदा प्रययौ तज्जिघांसया ।। 41 ।।

तमापतन्तं सहसा कल्पान्ताभ्रावलिप्रभम् ।
न्यरुणद् बलिनां श्रेष्ठः सुग्रीवः कपियूथपः ।। 42 ।।

प्रबलोऽयमिति प्रेक्ष्य तच्छक्तेर्ह्रासमिच्छुकः ।
युक्तिमेकां कुम्भकर्णस्तदर्थं समशिश्रियत् ।। 43 ।।

हीनोऽसि शक्त्या मत्तस्त्वं नालं योद्धुं मया सह ।
इति तं प्राह दैत्योऽसावात्मश्लाघामुपाश्रितः ।। 44 ।।

मन्यसे यदि शक्तिस्ते मत्तोऽस्ति प्रबला तदा ।
गच्छ सुग्रीव ! शीघ्रं त्वं हिमवन्तं नगाधिपम् ।। 45 ।।

गत्वा त्वं तत्र रङ्गाख्यं महाद्रुममुपानय ।
युध्यस्व तेन घोरेण मया सह च वानर ! ।। 46 ।।

यावदेव गिरस्तस्य निस्सरन्ति मुखादिमाः ।
उत्पुप्लुवे तावदेव हिमवन्तं गिरिं कपिः ।। 47 ।।

CC-0. Prof. Satya Vrat Shastri Collection

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मोक्षशक्तिं निधायासौ सम्मुखे स्वस्य निश्चलः ।
सम्मीलिताक्षियुगलः सुप्तमीन इव ह्रदः ।। 58 ।।

दैवतान्यर्चयामास स्थिरेण मनसा दिशः ।
चन्दनागुरुकर्पूरपुष्पगन्धैः प्रपूरयन् ।। 59 ।।

तदैव पूतिर्गन्धोऽस्यास्पृशन्नासापुटद्वयम् ।
व्याकुलः सुतरां येन चिन्तितश्च बभूव सः ।। 60 ।।

दुर्गन्धोऽसहनीयोऽयं पुण्यकर्मण्युपस्थितः ।
कुत इति परिज्ञातुं नेत्रे स उदमीलयत् ।। 61 ।।

उन्मीलिताभ्यां नेत्राभ्यां प्रवहन्तं नदीजले ।
दुर्दर्शनं ददर्शासौ पूतिगन्धिं शुनः शवम् ।। 62 ।।

चञ्चुप्रहारं कुर्वन्तं काकं तत्र ददर्श च ।
येनास्य व्याकुलीभावः सुतरां पर्यवर्धत ।। 63 ।।

व्याकुलीभावतः पूजामपूर्णामेव दानवः ।
प्रातिष्ठत परित्यज्य सुतरां विमनायितः ।। 64 ।।

हनूमता युक्तिरियं पूजाविघ्नार्थमाश्रिता ।
शुनः शवस्य रूपं स एव नद्यामुपाश्रयत् ।। 65 ।।

काकरूपमङ्गदेन समाश्रितमभूत्तदा ।
एवं पूजाविधौ विघ्नस्ताभ्यां सम्पादितोऽभवत् ।। 66 ।।

अथ विघ्नितपूजोऽपि शक्तिमादाय दानवः ।
मोक्षाभिधानां रामस्य सम्प्रातिष्ठत वाहिनीम् ।। 67 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

(इन्द्रवज्रावृत्तम् उपजातिवृत्तञ्च)

स तत्र पूर्वं किल सङ्गतोऽभूत्
सौमित्रिणा वीरवरेण साकम् ।
येनाभवत्तस्य दशाननस्य
भ्रात्रा चिरं युद्धमतीव घोरम् ।। 68 ।।

युद्धे प्रवृत्ते विजयाभिलाषी
शक्तिं स तस्मै विससर्ज मत्तः ।
सा चाप्यनास्वादितपूर्वरक्त-
मार्यस्य कस्यापि पपौ तृषार्त्ता ।। 69 ।।

पूजाविघातेन न यद्यपि प्राग्
प्रबोधिता शक्तिरभूदमुष्याः ।
तथापि तस्या नहि शक्तिरासी-
दल्पा निहन्तुं रिपुमोक्षमीप्सुः । ।। 70 ।।

तया स शक्त्या प्रहतः प्रगाढं
सौमित्रिरासीत्पतितो विसञ्ज्ञः ।
शुचा परीतान् विदधत्स्वबन्धून्
नैराश्यमेषां जनयंश्च तीव्रम् ।। 71 ।।

एवं स्थिते तत्र विभीषणस्तान्
सम्प्राह भोः ! सर्वयपर्वताद् द्राक् ।
दिव्यौषधिं यूयमिहानयध्वं
तां सेवयध्वं च विसञ्ज्ञमेनम् ।। 72 ।।

प्रागेव सूर्योदयतः परेद्यु-
रेषौषधिस्तावदनेन सेव्या ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ततः परस्तान्नहि कश्चिदस्य
स्याल्लाभ ओषध्यनुसेवनेन ।। 73 ।।

श्रुत्वादसीयं वचनं गरीयः
कालस्य हानिं परिहर्तुकामः ।
उत्पुप्लुवे द्यां पवनस्य पुत्रो
गिरिं प्रतस्थे च स सर्वयाख्यम् ।। 74 ।।

मध्येपथं यावदसौ प्रयाति
सूर्यप्रभास्तं स्नपयन्ति तावत् ।
बभूव तेनातिविचिन्तितः स
भीतश्च सूर्योदयकल्पनायाः ।। 75 ।।

सूर्योदये नाम समा न आशा
आकाशपुष्पप्रकरस्वरूपाः ।
भवेयुरित्येष धियं दधानः
सूर्यं पथश्च्यावयितुं प्रवृत्तः ।। 76 ।।

रथं स सूर्यस्य दृढं गृहीत्वा
निवर्तनाय स्वमनो न्ययुङ्क्त ।
एवं च कुर्वन् किरणैरमुष्य
संप्लुष्टसर्वावयवो बभूव ।। 77 ।।

ततोऽनु सूर्यः समवेक्ष्य वीरं
श्रीरामकार्यैकपरायणं तम् ।
अहो मया किङ्कृतमित्यनन्ता-
नुतापदाहेन बभूव दग्धः ।। 78 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri



CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सञ्जीवयामास ततः स एनं
निष्टप्तहेमद्युतिकञ्च चक्रे ।
भूत्वा पयोदान्तरितो दिवाऽपि
रात्र्यन्धकारानुभवं च तेने ।। 79 ।।

तेन प्रसन्नो हनुमान् स्वयात्रां
प्रवर्तयामास पुनः प्रवीरः ।
अल्पेन कालेन च सर्वयाख्यं
शैलाधिराजं समवाप चापि ।। 80 ।।

आकारयामास च तत्र वीरः
स ओषधिं साऽपि च तं बभाषे ।
अत्रास्मि नीचैरिति तां ययौ स
नालोकयामास च तां स तत्र ।। 81 ।।

ततः स शुश्राव गिरं तदीया-
मत्रास्मि वीरोच्चतरे प्रदेशे ।
ततः स उच्चैर्गतवान् न चापि
ददर्श तां वीरवरोऽतिखिन्नः ।। 82 ।।

गतागताभ्यामथ नैकवारं
श्रान्तश्च खिन्नश्च कपिप्रवीरः ।
स्वां बुद्धिमास्थाय विचक्षणोऽलं
तदोषधेः स ग्रहणे बभूव ।। 83 ।।

अभ्युक्षणं पञ्चनदीजलैः स्या-
द्यद्योषधेस्तर्हि विचित्ररूपा ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri



CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सेव्या भवेत्सेति विधानमेतत्
तदर्थमासीद् विहितं विधिज्ञैः ।।84।।

आसन्पुनः पञ्चनदीजलानि
पुण्यानि दूरे भरताधिकारे ।
स्थितान्ययोध्यानगरे विशाले
प्राप्तिर्न येषां सुकरा बभूव ।।85।।

असम्भवं नैव बभूव किञ्चि-
द्धनूमतस्तत्सपदि प्रपेदे ।
पुरीमयोध्यां पवनस्य पुत्र-
श्चकार सम्प्रोक्षणमोषधेश्च ।।86।।

सम्प्रोक्षितां पञ्चनदीजलैः स
दिव्यौषधिं राघवमानिनाय ।
तत्सेवनेन प्रतिलब्धसञ्ज्ञः
वीरः स सुप्तोत्थितवद् बभासे ।।87।।

आलोक्य रामावरजं तदानीं
श्रीलक्ष्मणं मृत्युमुखाद्विमुक्तम् ।
रामस्य सैन्ये तुमुलः समस्ते
हर्षध्वनिः श्रोत्रभिदाविरासीत् ।।88।।

विवेश सोऽयं दनुजस्य कुम्भ-
कर्णस्य कर्णौ भयमादधानः ।
श्रीलक्ष्मणोऽभूत्प्रतिलब्धसञ्ज्ञ-
स्तेनेत्यसौ निश्चयमाततान ।।89।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

R PIPE
อร์ไปพ์

ราวบันไดทองเหลืองหล่อ

ผลงานของเรา
เป็นความภูมิใจของท่าน



แตนเลส



ราวระเบียงบันไดทองเหลือง

บริษัท เดคคอร์แมท จำกัด

2092/8 ซอยทวีวัฒนา ถ.จันทน์ กรุงเทพฯ 10120 โทร. 2867695, 2867704, 2865610

โชว์รูม ชั้น 4 ห้างเซ็นทรัลลาดพร้าว

TELEX : 21962 D GROUP TH FAX: (662) 287-2018

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

भूयोऽपि तस्य प्रतिकारमीप्सुः
स बृंहयामास निजं शरीरम् ।
समावृणोच्चापि नदीं स तेन
रामस्य सैन्यं रहयञ्जलेन ।।90।।

अहानि सप्तैवमवस्थितोऽभूत्
स निम्नगायां प्रतिरोधकामः ।
येनाभवंस्तद्रहितानि राम-
सैन्यानि सर्वाणि तृषाकुलानि ।।91।।

दैत्याधमो यत्र बभूव देशं
तं पुष्पकन्यागण एव वेद ।
अतो हनूमान् धृततत्स्वरूप-
स्तत्स्थानमापत् सह ताभिरेव ।।92।।

सम्प्राप्तमात्रश्च स तं प्रदेशं
निजं स्वरूपं प्रतिपद्य घोरम् ।
पादप्रहारं प्रददावमुष्मै
यस्मात्सपद्येव स उत्थितोऽभूत् ।।93।।


समुत्थितेऽस्मिन् प्रतिरोधमाप्ता
आपः प्रवृत्ता वहनाय भूयः ।
उदन्यितानि प्रसभं यतो द्राक्
सैन्यान्युदन्यां शमयाम्बभूवुः ।।94।।

कपिप्रहारश्लथसर्वकायः
स्वयत्नवैफल्यविलक्षचेताः ।

CC-0. Prof. Satya Vrat Shastri Collection.

ECOR PIPE

ราวบันไดทองเหลืองหล่อ



Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्थानादमुष्मान्नयवित्सपद्य-
पचक्रमे वीरवरब्रुवः सः ।।95।।

ततः परेद्युः पुनरप्यसौ स्व-
शक्त्यायुधेन प्रजहार शक्त्या ।
स्वया महत्या कपिवीरसैन्यं
तस्मिन्समन्ताद् भयमादधानः ।।96।।

कालान्तकप्रख्यमिमं निरोद्धुं
रामः स्वयं वीर उपस्थितोऽभूत् ।
ब्रह्मास्त्रमस्मिन् मुमुचे स येन
व्यसुर्दनूजो निपपात भूमौ ।।97।।

प्राग् दानवो मृत्युमुखप्रवेशा-
न्नारायणं स्वस्य पुरो ददर्श ।
सशङ्खचक्रं सगदात्रिशूलं
स्वर्गस्य पन्थानममुं दिशन्तम् ।।98।।

(स्वागतावृत्तम्)

तेन हर्षममितं प्रतिपन्नो
राघवस्य चरणावुपसन्नः ।
चेतसा स दनुजो न विषण्णः
स्वर्गलोकमभवत् प्रतिपन्नः ।।99।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

षोडशः सर्गः

(मलिवगगब्रह्मोपाख्यानम्)

(अनुष्टुब्वृत्तम्)

स्वर्गते दनुजे कुम्भकर्णे दुःख्यन्मना अपि ।
रावणो नहि रामस्य विजये मुमुचे हठम् ।।1।।

इन्द्रजिन्नामधेयं स प्रियं पुत्रं महारथम् ।
इन्द्रस्यापि विजेतारं सैन्याध्यक्ष्ये न्ययोजयत् ।।2।।

नागपाशे निबद्धाऽभूत्तेन रामस्य वाहिनी ।
सलक्ष्मणा दृश्यते स्म चित्रालिखितवत्तदा ।।3।।

ब्लैवदाख्याच्छराद्राममुक्तात्तत्र समापतत् ।
गरुडो येन सर्वेऽपि नागा याता यथागतम् ।।4।।

शौर्यं बहुविधं युद्धे सम्प्रदर्श्येन्द्रजित्तदा ।
रावणस्य प्रियः पुत्रो लोकान् वीरोचितान् गतः ।।5।।

एकैकशो निपतिता एवं वीरवरा युधि ।
दशास्याशास्तम्भभूता रामवात्याप्रताडिताः ।।6।।

(इन्द्रवज्रावृत्तम् उपजातिवृत्तञ्च)

CC-0. Prof. Satya Vrat Shastri Collection.

เป็นความภูมิใจของท่าน

ราวบันไดทองเหลืองหล่อ



CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्प्रार्थनं कर्णगतं विधाय
लोकात्स्वकीयाद् विबुधैः समेतः ।
सद्यो विधाताऽवततार पृथ्वीं
चयस्त्विषामित्यवभासमानः ।। 18 ।।

न वादिनो वा प्रतिवादिनो वा
सेनासमूहेऽवततार धाता ।
निष्पक्षतामात्मनि बिभ्रदेष
माध्यस्थ्यमत्रापि समाललम्बे ।। 19 ।।

एकत्र सेना दशकन्धरस्या-
ऽपरत्र चासीद्रघुनन्दनस्य ।
सेनाद्वयस्यैव स मध्यभागे
विविक्तभूमौ समुपस्थितोऽभूत् ।। 20 ।।

रामस्य दण्डं दशकन्धरेण
सम्प्रार्थितोऽसौ समुवाच वाचम् ।
यावन्न शृण्वे रघुनन्दनस्य
वाक्यं तथा वा जनकात्मजायाः ।। 21 ।।

यावच्च देवौघ उपस्थितोऽत्र
जायेत नैतद्व्यवहारसाक्षी ।
न्यायार्थमत्रागतवानहं भो !
न निर्णयं तावदहं प्रवक्ष्ये ।। 22 ।।

आदेशतो ब्रह्मण एवमाशु
सीता समानाय्यत तत्समक्षम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कपिप्रवीरैः पिशिताशनैश्च
वृत्तं यथावृत्तमभिप्रवक्तुम् ।। 23 ।।

विदेहजाया वचनं तथा च
रामस्य सर्वे विबुधा अशृण्वन् ।
तेषां प्रमाणेन मलीवराजः
कृतागसं रावणमभ्युपागात् ।। 24 ।।

शापं स तस्मै व्यसृजत्समन्युः
श्रीराघवेन्द्रास्त्रवधाभिसन्धिम् ।
विसृज्य शापं च सुरैः समेतो
यथागतं स प्रययौ स्वधाम ।। 25 ।।

व्रीडावनम्रो दशकन्धरोऽपि
स्वचिन्तितार्थप्रतिकूलभावात् ।
विच्छायवक्त्रोऽर्क इवोपरक्त-
श्चिन्ताचिताध्वस्त इवाबभासे ।। 26 ।।

(अनुष्टुब्वृत्तम्)

सर्वथाऽनिष्टचिन्तानां परदारापहारिणाम् ।
अभिप्राया न सिध्यन्ति तेनेदं वर्तते जगत् ।। 27 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सत्यपीत्थमभवत्क्षतिरस्य
नैव, नैव च बभूव कथञ्चित् ।
अङ्गभङ्ग इति चित्रमिवासीत्
कारणस्य न च बोध इहासीत् ।।5।।

प्रस्रवद्गिरिणदीजलधारा-
वद् ववर्ष बलवच्छरधाराः ।
रावणे दशरथात्मजचापो
विव्यथे नहि च राक्षसराजः ।।6।।

कृत्तमङ्गमभवत् पुनरस्य
युक्तमित्यतिविचित्रमिवासीत् ।
तत्समीक्ष्य सकलस्थितिविद्वान्
रावणानुज उवाच सुविद्वान् ।।7।।

स्थापितोऽस्ति खलु पञ्जर आत्मा
रावणस्य दनुजप्रवरस्य ।
पञ्जरं लसति चास्य गुरोर्गो-
पुत्रसंज्ञकऋषेर्निलये भोः ।।8।।

यावदेष नहि हन्यत आर्य !
तावदस्य हननं सुशकं नो ।
आत्मनो यदि भवेद्धननं प्राग्
निश्चितं भवति तद्धननं भोः ।।9।।

तां निशम्य तु विभीषणवाच-
मुद्यतः कपिरभूद्धनुमान् द्राक् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

न कृतघ्नसविधे वसतिर्मे
रोचतेऽति सरलो मनसाऽस्मि ।
यो निजाश्रितजने नहि साधु-
स्त्याग एव खलु तस्य तु साधुः ।। 16 ।।

रावणं मनसि सेवितुमिच्छा
प्रोद्यता मम ततोऽहमुपेतः ।
अङ्गदेन सह तन्नय मां तं
साधु स व्यवहरेन्मयि साधुः ।। 17 ।।

आश्रितं स सुतरां गुणगृह्यो
मामवश्यमवितेति मतिर्मे ।
पादपङ्कजरजोऽस्य मम स्या-
दङ्गराग इति मे हृदि रागः ।। 18 ।।

तं भवान् सपदि पूरयतामि-
त्यर्थना मम भवत्यृषिवर्ये ।
अर्थिनं खलु विदध्युरुदार-
बुद्धयो जगति नैव निराशम् ।। 19 ।।

तद् भवान्नयतु मामतिशीघ्रं
रावणं भवतु येन शुभं मे ।
तादृशस्य गुणगृह्यजनस्य
सेवया सुकृतिनोऽद्य कृती स्याम् ।। 20 ।।

पुण्यवानसि कपे हनुमंस्त्वं
यस्य तावदुदिता शुभबुद्धिः ।

CC-0. Prof. Satya Vrat Shastri Collection.

132

Digitized by Arya Samaj Foundation Chennai and eGangotri



CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सेवया दनुजराजवरस्य
जीवितं सफलमातनु वीर ! ।। 21 ।।

चीवरावृततनुर्वनवासी
राज्यतो विरहितः क्व नु रामः ।
वैभवावृततनुः क्व च रे ! दिक्-
चक्रवालविजयी दशकण्ठः ।। 22 ।।

नाममात्रमपि यस्य रिपूणां
मानसं वितनुते भयकम्प्रम् ।
सोऽखिलस्य भुवनस्य विजेता
रावणोऽस्ति यशसां भुवि चेता ।। 23 ।।

कर्मणा च मनसाऽथ च वाचा
रावणं परिचरेर्नियमेन ।
त्वं यदि त्वयि भवेद्धनुमन् ! सो-
ऽवश्यमेव हृदयेन कृपालुः ।। 24 ।।

सेवितोद्यप्रभृति[1] त्वयकाऽसौ
यौवनेऽपि मुनिवेषधरो रे ।
रामचन्द्र इति कीर्तितनामा
ऽकिञ्चनो जगति किञ्चनबुद्धिः ।। 25 ।।

रावणं परिचर त्वमनन्त-
वीर्यमन्तरमवेहि च तात ।
रत्नराशिपरिपूर्णमवश्यं
त्वां विधास्यति स लोकसुरत्नम् ।। 26 ।।

1. 'हे प्रे वा' इत्याश्रित्य प्रयोगः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

माननामयमवैति विधातु-
मात्मनीननिजभक्तजनस्य ।
रामतस्त्वधिगतो ह्यवमानः
साम्प्रतं भवतु ते बहुमानः ।। 27 ।।

गच्छ तावदधुना हनुमंस्त्वं
रावणं च समुपेहि शरण्यम् ।
सत्यमेव स्वपदाम्बुजयुग्म-
सेवया सफलयिष्यति स त्वाम् ।। 28 ।।

एवमुक्तवति वाचमुदारां
रावणस्य दनुजस्य गुरौ सः ।
वाचमेवमनिलस्य तनूजो
वक्तुमेनमुपचक्रम आशु ।। 29 ।।

यत्त्वमात्थ ऋषिवर्य तथैव
कामये तु दशकण्ठमुपैतुम् ।
आगतोऽयमरिपक्षत एवं
यद्ययं तु विपरीतमतिः स्यात् ।। 30 ।।

नाभ्युपैष्यति कदाचिदपि प्राक्-
स्वाहिताचरणवृत्तिमयं माम् ।
दृष्टिरेव मम मन्युवशं तं
संनयेदिति भयं मम तात ।। 31 ।।

नैव दर्शनमपि प्रसहेत
क्रोधवह्निविदहद्धृदयेन ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri



CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

यावदेष विनिवेद्यत एव
तावदेव स तु मां प्रणिहन्यात् ।। 32 ।।

अङ्गदं च सकृदेव स खड्ग-
पातनेन मम पुत्रसमानम् ।
वज्रपात इव खड्गनिपातः
खण्डशः प्रविदधीत ऋषे ! तम् ।। 33 ।।

बुद्धिमानपि विवेकयुतोऽपि
शास्त्रशीलनपरोऽपि बुधोऽपि ।
क्रोधमार्गमभितः प्रतिपन्नो
नो विचिन्तयति कार्यमकार्यम् ।। 34 ।।


एवमेव यदि तात ! घटेत
यादृशी भवति मे हृदि शङ्का ।
तन्महान्तमनुतापमनर्थं
विप्लवं च तनुयादनभीष्टम् ।। 35 ।।

तस्य वारणमभीष्टतमं न-
स्तत्र नो हितमथो निहितं नः ।
तत् सहैव भवता गमनं मे
रोचते भवदभीष्टमिदं चेत् ।। 36 ।।

एवमस्त्विति ऋषौ निजवाचं
प्रोक्तवत्यथ कपिः सह तेन ।
अङ्गदेन च सहोद्युयुजे द्राग्
रावणोपगमनाय हितेन ।। 37 ।।


CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

















CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

आह चापि गमनात्प्रथमं गो-
पुत्रसंज्ञकमृषिं कपिवीरः ।
पञ्जरं नय ऋषे! सममेव
मा स्म चूचुरदिदं रघुवंश्यः ।।38।।

पञ्जरेऽत्र निहितोऽस्ति पुलस्त्य-
नन्दनस्य भुवि नन्दित आत्मा ।
रक्षणेऽस्य सुतरां प्रविधेयो
यत्न इत्यवहितः शृणु मां त्वम् ।।39।।

आश्रमादपगतं तपआढ्यं
त्वां विलोक्य कपटी रघुवंश्यः ।
हारयेत्स्वयमिदं तु हरेद् वा
वेद कः कपटिनां खलु वृत्तम् ।।40।।


तत्सहैव नय पञ्जरमेतन्
मा स्म शत्रुकर एतदुपागात् ।
अन्यथा महदनिष्टमृषे! नः
सम्भवेदिति वचो मम विद्धि ।।41।।

शुद्धहृच्च सरलश्च प्रकृत्या
ऽबुद्ध नो कपिहृदि ह्यभवद्यत् ।
अभ्युपेत्य च वचः खलु तस्य
पञ्जरं समनयत्स सहैव ।।42।।


यावदेष पवनस्य सुतेन
चाङ्गदेन च सहाप तु लङ्काम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri











CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तावदापतितवत्यतिघोरा
ऽचिन्तिता च विषमा च समस्या ।। 43 ।।

क्राम्यते ऋषिवरेण तु सीमा
रावणस्य नगरस्य यदि द्राक् ।
पञ्जराद्बहिरुपेत्य तदात्मा
तं द्रवेत तमनुप्रविशेच्च ।। 44 ।।

तेन चास्य हननं सुशकं स्या
न्नाभवच्च समभीष्टमृषेस्तत् ।
किं नु कार्यमधुनेति स चिन्तां
मानसार्तिकरणीं प्रतिपेदे ।। 45 ।।

चिन्तयन् बहु च तत्र स तूष्णीं
तस्थिवान् नहि ततो ययिवांश्च ।
तादृशं समवलोक्य कपिस्तं
सादरं गिरमिमां प्रतिपेदे ।। 46 ।।

केयमस्ति ऋषिवर्य ! तवार्तिः
सेवकौ तव समीप इहावाम् ।
ब्रूहि तन्मनसि या तव चिन्ता
मा स्म भो ! व्यथितमानस आस्व ।। 47 ।।

तावृषिः सकलमाह तदास्त
मानसे विकलताजनकं यत् ।
तन्निशम्य पवनात्मज एन-
मूर्जितं वच उवाच विपश्चित् ।। 48 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

नैव किञ्चिदिव चिन्त्यमिहास्ति
मा स्म चिन्तनकृते स्वमनो दाः ।
अङ्गदोऽत्र खलु तिष्ठतु सीम्नि
त्वत्समं गमनमस्तु ममैव ।। 49 ।।

अङ्गदस्य यदि तिष्ठति हस्ते
पञ्जरं नहि समुत्प्लवनं स्यात् ।
आत्मनस्तदिह तिष्ठतु सोऽत्र
द्वावुभावपि दशास्यमुपेवः ।। 50 ।।

एवमस्त्विति ऋषावुपपन्ने
पञ्जरं व्यलसदङ्गदहस्ते ।
द्वावृषिश्च हनुमांश् च तदानीं
जग्मतुर्दशमुखस्य पुरीं तौ ।। 51 ।।

(अनुष्टुब्वृत्तम्)

यावदध्वाऽभवत्कश्चिदतिक्रान्तस्तदाऽवदत् ।
ऋषिं गोपुत्रनामानं रावणस्य गुरुं कपिः ।। 52 ।।

किञ्चिदावश्यकमृषे ! सन्देष्टव्योऽङ्गदो मया ।
क्षणमात्रं भवानत्र तिष्ठत्वायामि शीघ्रतः ।। 53 ।।

ओमित्युक्तेऽथ ऋषिणा वायुवेगेन निर्ययौ ।
वायोः सुतः क्षणेनैव चाङ्गदं प्राप चाह च ।। 54 ।।

देहि मे पञ्जरं तात ! तत्करिष्येऽत्र येन नः ।
सेत्स्यन्ति सकला एव चिन्तितार्था असंशयम् ।। 55 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पञ्जरं तत आदाय रावणात्मानमेव च ।
तत्स्थाने नूतनं कृत्वा तत्र स्थापितवान् कपिः ।। 56 ।।

अङ्गदो मूलमात्मानं हनूमत्सम्प्रचोदितः ।
समुद्रतीरे न्यखनद्येन नाविर्भवेदयम् ।। 57 ।।

अङ्गदेन दृढं तावन्निखाते रावणात्मनि ।
असम्भवत्वे तद्योगे रावणेन कथञ्चन ।। 58 ।।

रावणो वध्यकोटित्वं जगाम परमास्त्रवित् ।
अहन्यत च तीक्ष्णाग्रैः शरै रामाभिवर्षितैः ।। 59 ।।

दशग्रीववधे तावद्धनूमान् युक्तिमास्थितः ।
श्रीरामस्य परो भक्तो निमित्तत्वं समाययौ ।। 60 ।।

स्वामिनो हितसिध्द्यर्थं तदेकाग्रेण चेतसा ।
प्राणानपि प्रियान् सत्यं पणीकुर्वन्ति सेवकाः ।। 61 ।।

'न विश्वसेदविश्वस्तं विश्वस्तेऽपि न विश्वसेत्' ।
थाइरामायणीयेदं सत्यापयति सत्कथा ।। 62 ।।


प्रकृत्या सरलोऽत्यन्तं विश्वासं समुपेयिवान् ।
गोपुत्रो वायुतनये तेनाभूदतिसंहितः ।। 63 ।।


निमित्तं च बभूवासौ विनाशेऽतिप्रतापिनः ।
प्रियस्य स्वस्य शिष्यस्य शत्रौ प्रत्ययमीयिवान् ।। 64 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri







CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अष्टादशः सर्गः

(महीपालदेवासुरोपाख्यानम्)

(भुजङ्गप्रयातवृत्तम्)

दशास्ये गते राक्षसे मृत्युलोकं
सहायैः सह स्वां निवृत्ते च रामे ।
पुरीं, सर्ववृत्तानभिज्ञः समागा-
न्महीपालदेवः पुरीं नाम लङ्काम् ।।1।।

सखाऽभूद्दशास्यस्य सोऽतिप्रतापी
प्रशास्ता भुवश्चक्रवालाभिधायाः ।
चिरायास्ति दृष्टो मया नो सुहृत्तन्
मया सोऽभ्युपेतव्य एवेति बुद्धिम् ।।2।।

समास्थाय सोऽभ्यागमत्तत्र लङ्कां
समागम्य यावच्च वृत्तं विषण्णः ।
विवेदाखिलेनाभवत्तावदेव
स्फुरत्कोपवह्निप्रदग्धान्तरङ्गः ।।3।।

हतो मे सखा राघवेणानुजस्य
दशास्यस्य साह्येन लोकाधिपोऽपि ।
अतस्तस्य मृत्योः प्रतीशोधमद्य
विधास्याम्यहं तस्य बन्धुः प्रियोऽहम् ।।4।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुहृत्त्वं निहत्यानुजं तस्य लोके
स्वकं ख्यापयिष्याम्यहं दुष्टबुद्धिम् ।
निजभ्रातृराज्यं स्वकीयं वितन्व-
न्नसौ स्वार्थकामो वधार्हो मतो मे ।।5।।

विचिन्त्यैवमेषोऽरुणत्क्रूरकर्मा
सुगुप्तां सुवीरैः पुरीं नाम लङ्काम् ।
दशास्यानुजः शासकोऽस्या विपन्न-
स्तदानीन्तनो घोरचिन्तां प्रपन्नः ।।6।।

दशग्रीवपूर्वं तदा राज्यकाले
नवं नाम तस्यांशपश्चाद् बभूव[1] ।
नृपाः स्वाभिषेकस्य काले नवीना-
मभिख्यां दधुः सैव रीतिस्तदाऽभूत् ।।7।।

न शक्तिश्च नो तस्य सामर्थ्यमास्तां
यथा रावणस्येति तस्यान्तरङ्गे ।
महान् व्याकुलीभाव आविर्बभूव
विचारप्रवाहस्तथा सन्ततश्च ।।8।।








क्रियेताधुना किं मयाऽत्रेति चिन्ता-
परोऽसौ क्षणान् यापयामास नैकान् ।
अकस्मात्स्मृतिस्तस्य चित्तेऽतिविग्ने
जजागार वाक्यस्य रामोदितस्य ।।9।।

विजित्याभवत्संनिवृत्सुः स लङ्कां
यदा राघवेन्द्रस्तदा सोऽभ्युवाच ।

1. दशग्रीवांश इति ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

รสสตรอเบอร์รี่ รสเลมอน รสส้ม รสเมลอน รสสับปะรด รสแพชชั่นฟรุต

อร่อยลุ้นได้ทุกรส

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

दशास्यानुजं तस्य सामर्थ्यमूनं
विभाव्यापदो रक्षितुं तं सहायम् ।। 10 ।।

सुहृद्वर्य यद्यापतेरापदस्त्वं
वशे तत्प्रवृत्तिं त्वया सूचनीयः ।
अहं तेन तादृग्व्यवस्थां करिष्ये
यथा स्याद्विमोक्षस्तवापद्गतस्य ।। 11 ।

अहःसप्तके सप्तके ऽद्य प्रभृत्य-
तितीव्रं प्रहेतास्म्यहं बाणमेकम् ।
यदि त्वं भवेरापदा ग्रस्त आशु
तदा लेखमेनेन सम्प्रेषयस्व ।। 12 ।।

गिरो रामभद्रोदितायाः पुराऽसौ
स्मरन् भ्रातृवर्यो दशास्यस्य भीतः ।
शरे लेखमेकं निबध्यासृजत्तं
स शीघ्रं रघूणां पतिं चाससाद ।। 13 ।।

विपद्वारिराशौ निमग्नं विदित्वा
सहायं पुराणं स्वकीयं सुदुःख्यन् ।
हनूमत्समाख्यं निजानन्यभक्तं
स भक्तानुरक्तः प्रभुः सन्दिदेश ।। 14 ।।

हनूमन् ! स पूर्वः सहायः प्रियो नो
निमग्नोऽस्ति घोरापदायामकस्मात् ।
दशास्यस्य मित्रेण तद्राजधानी
निरुद्धा महीपालदेवासुरेण ।। 15 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ตรา อิมพีเรียล

โยเกิต

พร้อมดื่ม

6 รส 6 อร่อย

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अपेह्याशिवतो नैव वाञ्छामि युद्धं
त्वया दर्शितं हन्त ! कापेयमत्र ।।21।।

अहं चक्रवालाधिपो भूमिपालो
दिशां चक्रवाले प्रसिद्धिं गतश्च ।
त्वया वानरेणास्तु मे चेन्नियुद्धं
परीहासपात्रत्वमेष्यामि सत्यम् ।।22।।

नियुद्धं समेनैव तावत् समस्य
प्रशस्यं भवेन्नेतरेण प्रमादिन् ।
नृपस्यासुरस्यैकतश्चापरत्र
नियुद्धं कपेर्ब्रूहि किं शोभनं स्यात् ? ।।23।।

दयाया वशात्त्वां विमुञ्चामि शाखा-
मृग त्वं पलायस्व रक्षापि च स्वम् ।
मदीयेन हस्तेन निष्पीडिताङ्गो
दशां भाग्यदिष्टां प्रयातासि नो चेत् ।।24।।

समाकर्ण्य तस्यासुरस्योग्ररूपां
गिरं स प्रवीरोऽशनिध्वानवाचा ।
कपिः प्राह तं नैव जात्याऽस्ति कश्चिद्
बली वाऽबली वेति बाढं गृहाण ।।25।।

कपित्वान्न मे वीर्यहानिर्भवेद्वा
ऽसुरत्वादथो तेऽस्तु भो ! वीर्यवृद्धिः ।
परीक्षा नियुद्धे भवेदावयोर्द्राक्
न कस्यापि वीर्यं परीक्ष्यं गिरैव ।।26।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri



CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

इमां वाचमाचम्य तां वानरस्य
निजस्यावशः संप्रजह्ने तमाशु ।
कपिश्चापि तं निष्पिपेष प्रहारै-
र्नियुद्धं प्रवृत्तं तदाऽपूर्वमासीत् ।। 27 ।।

उरःपेषमेतौ नियुद्धे प्रवृत्तौ
तलाभ्यां भुजाभ्यां कराभ्यां च वीरौ ।
मिथः सम्प्रहारैः क्षताङ्गौ प्रवर्ष-
ज्जले गैरिकाद्रेरभिख्यां दधाते ।। 28 ।।

स्वकार्यत्वरावांस्तदा वायुपुत्रः
समुत्थाप्य तं दानवं वायुवेगात् ।
समुद्भ्रामयामास खे चापि चक्रे
द्विधा तं मुधावीर्यमत्यन्तधैर्यः ।। 29 ।।

क्षणेनैव भूयः स युक्तोऽजनिष्ट
कपेस्तत् परं विस्मयं सन्ततान ।
वधोऽस्यासुरस्यास्तु युक्त्या कयेति
स चिन्तापरोऽभून्न लेभे च युक्तिम् ।। 30 ।।

(उपजातिवृत्तम्)

विभीषणः प्राह कपिं ततस्तं
यावन्न वक्षः प्रविदीर्यतेऽस्य ।
तावन्न रक्षोऽधम एष शक्यः
केनापि हन्तुं जगतीतलेऽत्र ।। 31 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

चिन्तां विहायात्र विदारय त्वं
वक्षो विचित्रस्य कुराक्षसस्य ।
श्रुत्वाऽदसीयं वचनं हनूमान्
'उरोविदारं प्रतिचस्करे तम्' ।।32।।

विदीर्णमात्रे तदुरस्यपासुः
पपात भूमौ दशकण्ठमित्रम् ।
साध्ये च सिद्धिं समवाप्य वीरः
स्वधाम धीरो हनुमाञ्जगाम ।।33।।

(अनुष्टुब्वृत्तम्)

एवं समुद्धृतः पूर्वं रामवाक्याद् विभीषणः ।
सङ्कटाद् भीषणात्सद्य उत्थिताच्च हनूमता ।।34।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

एकोनविंशः सर्गः

(लङ्कोपद्रवोपाख्यानम्)

(इन्द्रवज्रावृत्तम् उपजातिवृत्तञ्च)

दशानने मृत्युवशं प्रयाते
विभीषणे शासति चापि लङ्काम् ।
दशास्यपूर्वाग्रमहिष्यनन्या
मन्दोदरी नाम तदा बभूव ।।1।।

स्वभ्रातृपत्नीमधुना नृपालो
विभीषणस्तामकरोत् स्वपत्नीम् ।
तेजो दशास्याहितमादधाना
कालेन साऽसोष्ट तनूजमेकम् ।।2।।

क्रमेण वैणासुरवंशनामा
पुत्रोऽसकौ यौवनमाससाद ।
तस्याभवत्सेवक एक एनं
यः पर्यचारीद् वरणीसुराख्यः ।।3।।

असाविमं नित्यमबोधयिष्ट
यद्यत्पिताऽस्याऽन्वभवद्दशास्यः ।
यद्वा कृतं तत्र विभीषणेन
पक्षं रिपूणां समुपाश्रितेन ।।4।।

CC-0. Prof. Satya Vrat Shastri Collection.

อันแสดงให้เห็นว่าเธอเป็นผู้ที่มีความสามารถไม่จำกัด เธอเป็นคนที่มีพรสวรรค์ทางด้านศิลปะ เธอสามารถจับเอาอารมณ์ความรู้สึกของบุคคลที่แวดล้อมเธอมาแสดงเป็นงานศิลปะ ซึ่งเรียกว่าเป็นศิลปะในแนวอิมเพรสชั่นนิสม์ (IMPRESSIONISM) จากการที่จับเอาอารมณ์และความรู้สึกที่ประทับใจมานั้นจึงไม่เน้นความถูกต้องตามธรรมชาติของสรีระร่างกาย (ANATOMY) เพราะหากว่าทำให้ถูกต้องตามสรีระแล้วอาจจะไม่ได้อารมณ์ตามที่ต้องการ อย่างประติมากรรม "วิปโยค" นั้นเป็นตัวอย่าง ผู้หญิงคนนี้เธอนั่งพับเพียบ โน้มตัวลงใบหน้านาบกับธรณี คออันยืด

■ "ทอยกอง" ประติมากรรมที่เกิดจากการคลุกคลีกับหลานๆ ของเธอ แล้วจับเอาความประทับใจออกมา



Digitized by Arya Samaj Foundation Chennai and eGangotri
CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अमुष्य तच्छूलमिवातुदत्तन्
न्यक्षेण वृत्तं विदितं पुराणम् ।
अन्याय्यमासीज्जनके कृतं यत्
तस्याभवत्तत्प्रतिशोधने धीः ।।5।।

जातोऽपि वंशे बत रक्षसां मे
पितृव्यपाशो रिपुपक्षपाती ।
अघातयत्तं प्रबलप्रतापं
स्वानां विरोधः किमु नैव कुर्यात् ।।6।।

यद्यस्मि पुत्रो दशकन्धरस्या-
न्यायो मयासौ परिमार्जनीयः ।
स एव पुत्रो महितः पृथिव्यां
यश्शास्ति ताताहितकारिलोकम् ।।7।।

इत्थं विचिन्त्य प्रययौ कुमारः
स्वतातमित्रं मलिवन्नरेशम् ।
श्रीचक्रवर्तीत्यभिधानभाजं
तं प्राह चित्ते यदभून्निजे च ।।8।।

तं रावणस्यात्मजमेष राजा
मित्रस्य पुत्रं निजपुत्रमेव ।
अमन्यत प्रत्यवदच्च पुत्र !
यथाऽभिलाषस्तव तत्करोमि ।।9।।

आसीद्दशास्यो मम बन्धुरूपो
दिशां विजेता प्रबलप्रतापः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

อันแสดงให้เห็นว่าเธอเป็นผู้ที่
มีความสามารถไม่จำกัด เธอ
เป็นคนที่มีพรสวรรค์ทางด้าน



CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

रामेण तावद्वनचारिणाऽभूद्
धतो न रामस्य विशिष्टताऽत्र ।। 10 ।।

स्वज्ञातिरेवात्र विभीषणः स्व-
ज्ञातेर्विरोधी समभून्निमित्तम् ।
छिद्राणि येनापरपक्षपातात्
स्वानां परेभ्यः प्रकटीकृतानि ।। 11 ।।

यद्यस्ति दण्ड्यः क्वचनाऽत्र लोके
स एव दण्ड्यः स्वजनापकारी ।
तदेहि लङ्कामभिषेणयाव
मृत्योः पदं चाशिवममापयाव ।। 12 ।।

स एवमुक्त्वा मलिवन्नरेशो
सहैव वैणासुरवंशनाम्ना ।
दशास्यपुत्रेण वृतश्चमूभिः
लङ्कापुरीं सम्प्रति सम्प्रतस्थे ।। 13 ।।

आसीत्तदा बेञ्जकयीति नाम्न्यां
हनूमतो राक्षसकन्यकायाम् ।
पुत्रोऽतिवीरोऽसुरफत्समाख्यो
विभीषणं यः समया न्यवात्सीत् ।। 14 ।।

लङ्कानिरोधे मलिवन्नृपेण
ततोऽपयातः स यथा कथञ्चित् ।
विचिन्तितः सूचयितुं महात्मा
दुर्वृत्तमेतज्जनकं स्वमैच्छत् ।। 15 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

กรรมร่วมสมัยรัชกาลที่ 5"
ณ ห้องนิทรรศการชั้น 4 ศูนย์
รรพสินค้าริเวอร์ซิตี้ ผ่านไป
มื่อเร็ว ๆ นี้ เพื่อเป็นการเฉลิม
ระเกียรติแด่พระบาทสมเด็จ-
ระจุลจอมเกล้าเจ้าอยู่หัว และ
อส่งเสริมการเผยแพร่ศิลปวัตถุ
มีค่าให้คนรุ่นหลังได้มีโอกาส
ษาไปในตัวด้วย

ผูกพันอยู่กับการประดับหรือใช้สอยสิ่งของดังกล่าวด้วย ดั่งเช่น เครื่องเงินเครื่องทองชุดต่าง ๆ เครื่องแก้วเจียระไน เชี่ยน-หมาก ชุดน้ำชา ตะเกียง นาฬิกา เหรียญตราสารพัน เป็นต้น จนราวกับว่าการเที่ยวชมสิ่งของสะสมเหล่านั้นเป็นการเดินทางย้อนยุคไปสู่บรรยากาศสมัยรัชกาลที่ 5 กระนั้นแล





ะสวน

Digitized by Arya Samaj Foundation Chennai and eGangotri
CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

दुर्दान्तशत्रोः प्रतिरोधनेऽस्य
सहायताऽपेक्ष्यत इत्यधीरः ।
तस्य प्रवृत्तौ दनुजप्रवीरः
प्रयत्नमातिष्ठत सद्य एव ।। 16 ।।

कुत्रापि शैले जनकस्तदीय-
स्तपस्यतीत्येष विवेद विद्वान् ।
शैलात्स शैलं समभूत्प्रवृत्तो
गन्तुं समन्वेषणकाम्यया तम् ।। 17 ।।

एकत्र शैले स ददर्श कञ्चि-
ज्जनं प्रवीरस्तप आचरन्तम् ।
नायं कपिर्नैष भवेद्धनूमा-
नित्यस्य शङ्का मनसि प्रजाता ।। 18 ।।


वने भ्रमन्नेकदिने हनूमान्
रसालवृक्षे सरसै रसालैः ।
कस्मिंश्चिदाकृष्यत तानि भोक्तुं
प्रवृत्तिमांश्चैव बभूव सद्यः ।। 19 ।।

पृथक्कृतानां निजवृन्तजाता-
त्क्षीरेण सम्प्रस्रवता मुखेभ्यः ।
संलिप्तसर्वावयवो बभूव
कपिस्तुषारस्नुतिधौतवर्णः ।। 20 ।।

द्वाभ्यां कराभ्यां स इदं प्रमार्ष्टुं
कपिस्वभावात्समभूत्प्रवृत्तः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri







CC-0. Prof. Satya Vrat S

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवं च कुर्वन् परिहासपात्रं
भार्याजनस्याभवदुन्मुखस्य ।।21।।

स व्रीडितस्तेन बभूव भूयः
कृतावमानो वनिताजनेन ।
सम्मार्ष्टुमेतामवमाननां च
तप्तुं तपो बुद्धिमधात्स्वकीयाम् ।।22।।

दिष्फैल्समाख्यं समुपेतवांश्च
ऋषिं तदर्थं स कपिप्रवीरः ।
कपिः कथं तप्तुमलं तपः स्या-
दित्यास्त चिन्ता महती ऋषेस्तु ।।23।।

विचिन्तयन्नेष ऋषिस्तदानीं
कपेर्मनुष्यीकरणादृतेऽन्यम् ।
नैवाभ्युपायं कमपि प्रजानन्
मनुष्यरूपं प्रददावमुष्मै ।।24।।

मनुष्यरूपेण स शैलशृङ्गे
समाधिमास्थाय तपश्चचार ।
तदैव पुत्रोऽसुरफत्समाख्यो
ऽन्विष्यन्प्रयत्नेन तमभ्युपेतः ।।25।।

पप्रच्छ चैनं ननु भद्र ! दृष्ट-
स्त्वया चरन् क्वापि तपो हनूमान् ? ।
सौम्याहमेवास्मि स इत्युवाच
किमर्थमन्विष्यसि तं त्वमत्र ? ।।26।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रुत्वा वचस्तस्य रुषा परीत-
स्तमुग्रवाचाऽसुरफद् बभाषे ।
एवं मृषा त्वं वचनं ब्रुवाणो
न लज्जसे किं न च वा बिभेषि ? ।।27।।

पिता हनूमान् मम वानरोऽस्ति
त्वं तापसम्मन्य ! तु मानुषोऽसि ।
अहं हनूमानिति यद् ब्रवीषि
तन्मानुषत्वेन कथं घटेत ? ।।28।।

किञ्चापि रे तापसचेल ! वेत्सि
लोकोत्तरां मे जनकस्य शक्तिम् ? ।
नक्षत्रताराशशिनो निगीर्णा
मत्वा पुरा येन फलानि तावत् ।।29।।

श्रुत्वा स्तुतिं स्वस्य सुतात्प्रतीतः
पुनर्हनूमानिममाह वाचम् ।
नक्षत्रताराशशिनो मयैव
पूर्वं निगीर्णा इति सत्यमेतत् ।।30।।

तप्तुं तपो मानुषरूपधारी
जातोऽहमद्येति गृहाण पुत्र ।
नो प्रत्ययश्चेद्वचने मदीये
तत्तिष्ठ ते प्रत्ययमादधामि ।।31।।

उक्त्वा स एतन्निजमूलरूपं
प्रपेदिवांश्चापि निगीर्णवांश्च ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

नक्षत्रताराशशिनः समेतान्
पुत्रेण साश्चर्यमवेक्ष्यमाणः ।। 32 ।।

पुत्रस्तदीयः प्रणिपातपूर्वं
जग्राह पादौ जनकस्य भीतः
क्षमापयामास ततश्च स स्व- ।
मागस्कृतं सम्प्रति मन्यमानः ।। 33 ।।

उत्थाप्य दोर्भ्यां हनुमांस्तनूजं
गाढं परिष्वज्य च साश्रुनेत्रः ।
पुत्रस्य लाभात्परमप्रतीतो
ऽकस्मादमुं वाचमिमामुवाच ।। 34 ।।

दृष्टो मयाऽऽसीर्न पुरा सुत ! त्वं
नाहं त्वया चाप्यभवं प्रदृष्टः ।
अदृष्टयोर्नौ कथमेव तावद्
भवेदभिज्ञा सुततातयोर्नु ? ।। 35 ।।


अतर्कितं रत्नमिवास्ति पुत्र-
रत्नं मया लब्धमिहाद्रिशृङ्गे ।
सद्यःफलं मे तप इत्यनेन
हर्षप्रकर्षो हृदि मे न माति ।। 36 ।।

वचोऽतिहृष्टोऽसुरफद् बभाषे
श्रुत्वा वचस्तज्जनकस्य हन्त ! ।
तृप्तं चिरायाद्य मदीयनेत्र-
युगं समालोकयतस्स्वतातम् ।। 37 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri





CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

"अद्य क्रियाः कामदुघाः क्रतूनां
सत्याशिषः सम्प्रति भूमिदेवाः" ।
चिराय यद्दर्शनमीप्सितं मे
स एव साक्षात् पुरतो ममास्ति ।। 38 ।।

ममेष्टदेवोऽसि पिता मम त्वं
'मनोरथानामतटप्रपातः' ।
त्वद्दर्शनेनैव कृती तथापि
गुर्वत्र कार्यं प्रतिपादयामि ।। 39 ।।

उक्त्वैतदेनं स उवाच वृत्तं
लङ्कापुरीपूर्वगतं समस्तम् ।
श्रुत्वाऽभवद्यत्सुतरामशान्त-
स्तान्तान्तरङ्गश्च कपिप्रवीरः ।। 40 ।।

तपो विहायाथ सुतेन साकं
खिद्किन्[1] पुरीमाशु स सम्प्रतस्थे
सैन्यं च सङ्गृह्य ततः स तेन
पुरीमयोध्यां सह सम्प्रतस्थे ।। 41 ।।

ततः समेतो भरतेन चापि
शत्रुघ्ननाम्ना च रघूद्वहेन ।
लङ्कापुरीमोचनबद्धबुद्धि-
रकालहीनं प्रति तां प्रतस्थे ।। 42 ।।

दीर्घीकृतो नीलकलेवरोऽत्र
चकार वारांनिधिसेतुकार्यम् ।

1. थाईरामायणे किष्किन्धापुर्येतन्नाम्ना ऽभिहिता ।

53

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri


มูลค่า 500,000 บาท


รางวัลที่ 2
...เพชร 1 กะรัต 2 รางวัล
...00 บาท รวมมูลค่า 300,000 บาท


รางวัลที่ 3
แหวนเพชร 0.50 กะรัต 5 รางวัล
รางวัลละ 50,000 บาท รวมมูลค่า 250,000 บาท


รางวัลที่ 4
แหวนเพชร 0.20 กะรัต 10 รางวัล
รางวัลละ 10,000 บาท รวมมูลค่า 100,000 บาท


รางวัลที่ ...
...มี รุ่นตั้งโต๊ะ 1,500 รางวัล
...าท รวมมูลค่า 1,125,000 บาท


รางวัลที่ 6
กระเป๋าเดินทางตราหมี รุ่นพิเศษ เท่ทันสมัย 2,000 รางวัล
รางวัลละ 600 บาท รวมมูลค่า 1,200,000 บาท


รางวัลที่ 7
เป้ตราหมีสำหรับคุณหนู 3,000 รางวัล
รางวัลละ 510 บาท รวมมูลค่า 1,530,000 บาท

ชิงโชคล้ำค่ากติกาง่าย ๆ

เขียนชื่อ พร้อมที่อยู่ให้ชัดเจนลงบนกระดาษห่อ หรือฉลากข้างกระป๋องนมสดสเตอริไลส์ตราหมี นมข้นหวานตราหมี หรือบนฉลากนมข้นไม่หวานตราหมี ส่งมาที่ตู้ ปณ. 637 กรุงเทพฯ 10000 หรือใส่กล่องรับชิ้นส่วนตามร้านค้า แล้วเตรียมรับรางวัลครั้งใหญ่ 6,518 รางวัล จากตราหมี

กำหนดจับรางวัล วันที่ 22 ธันวาคม 2532 ณ โรงงานเนสท์เล่ จ.สมุทรปราการ
ประกาศรายชื่อผู้โชคดีทาง นสพ.บ้านเมือง ฉบับวันที่ 20 มกราคม 2533

ผู้โชคดีมีสิทธิ์ได้รับรางวัลมูลค่าสูงสุดเพียง 1 รางวัล พนักงานของบริษัท เนสท์เล่ โปรดักท์ส (ไทยแลนด์) อินค์. และพนักงานของ บริษัท ประกิต แอนด์ เอฟซีบี จำกัด พร้อมครอบครัว ไม่มีสิทธิ์เข้าร่วมการชิงโชค ผู้โชคดีได้รับรางวัลมูลค่าเกิน 500 บาท ขึ้นไป ต้องชำระภาษีหัก ณ ที่จ่าย 5%

B

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सैन्यानि येन प्रययुः सुखेन
पारेसमुद्रं प्रयतानि तानि ।। 43 ।।

पूर्वं निविष्टानि बभूवुरेता-
न्यद्रौ विशाले समयैव लङ्काम् ।
सन्ध्यादिवार्ताऽक्रियतेत एव
सैन्याधिपैर्वानरवीरमुख्यैः ।। 44 ।।

वार्तादिके निष्फलतां प्रयाते
युद्धं समारभ्यत नाशकारि ।
सैन्यानि यत्रोभयपक्षगानि
प्रदर्शयामासुरपारशौर्यम् ।। 45 ।।

भयङ्करायोधनसङ्गतानि
स्वनायकादेशवशंवदानि ।
खड्गैः शिलाभिस्तरुभिश्च तानि
शरैश्च हस्तैश्च मिथः प्रजह्रुः ।। 46 ।।

हतोऽत्र वैणासुरवंशनामा
मुक्तोऽत्र युद्धे च विभीषणोऽभूत् ।
सेना विजेत्री च ततः प्रतस्थे
प्रति प्रदेशं मलिवन्नृपस्य ।। 47 ।।

तत्रापि युद्धं ववृतेऽतिघोरं
जयं न लेभे मलिवन्नृपश्च ।
दशाननस्येव दशा बभूव
तस्यापि तन्मित्रवरस्य तावत् ।। 48 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

एकैकशस्तस्य सुतास्त्रयोऽपि
वीराः प्रयाताः सदनं यमस्य ।
वेतालनामापि च तत्सहायो
नीलेन युद्धे निहतो बभूव ।।49।।

अन्ते च वीरो भरतो जघान
स्वकष्टजातान्तमिव प्रसन्नः ।
प्रचण्डयोधं मलिवन्नरेशं
ब्रह्मास्त्रयोगेन विदां वरेण्यः ।।50।।

(वसन्ततिलकावृत्तम्)

स्थानेऽभ्यषिञ्चदथ तस्य हनूमतोऽयं
मच्छानुसञ्ज्ञकमपत्यवरं प्रतापी ।
रामानुजो भरत, आह च तं प्रवीरं
धर्मेण शाधि नयविन्मलिवत्प्रदेशम् ।।51।।

पुत्री प्रिया च नृपतेरथ चक्रवर्ती-
त्याख्यस्य रत्नमिव सम्प्रति रत्नमाली ।
पत्नी तवाग्रमहिषी भवतु प्रबुद्धा
सिंहासनं सह तया परिभूषयस्व ।।52।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अयं मोदस्त्वस्या नहि चिरमवातिष्ठत गति-
विधेरेषा चित्रा ऽखिल जगति नैषास्त्यविदिता ।
जनानामेतस्याः प्रबलतरवेगेन भवति
सुखं वा दुःखं वा भवति किमिवान्यज्जगति वा ।।5।।

ममान्तः कष्टानामुपगत इदानीमथ शुचां
मया तीर्णो भीमो जलनिधिरिदानीं च भयदः ।
अहो ! मे सौभाग्यं रघुकुलमणिर्मे पतिरिह
मदीये गर्भेऽथो विलसति तदीयाङ्कुर इति ।।6।।

प्रमोदाब्धौ यावत्तरति सरलैषा नृपवधूः
स्वकीये सौभाग्येऽनुभवति च गर्वौघमतुलम् ।
तदैवास्यां वात्याभ्रमिरिव भयोद्वेगजनिकृद्
अतीवोग्रो वज्रो हतविधिविलासान्निपतितः ।।7।।

अगच्छच्छ्रीरामः कतिपयदिनार्थं वनमतो
वियोगस्तेनाऽऽसीज्जनकतनयायायसहनः ।
वियोगस्योष्माणं प्रशमयितुमेषा कथमपि
तटिन्याः कस्याश्चित्तटमुपगता स्नातुमभवत् ।।8।।

अभूच्छूर्पेत्येवं प्रथमपदयुक्तं नखपदं
दधाना रक्षःस्त्री विकृतकृतरूपा शठतमा ।
सुमित्रापुत्रेण प्रकुपिततरा येन भवनं
जगामासौ भ्रातुर्दशवदनसंज्ञस्य रुदती ।।9।।

प्रतीकर्तुं तस्या अभवदवमानं दृढमति-
र्दशास्यः क्रूरास्योऽहरदथ च सीतां शठमतिः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ततो जाते युद्धे दशरथसुतेन प्रणिहतो
विनाशं प्रायासीद्विभवपरिपूर्णा ऽस्य च पुरी ।। 10 ।।

अभूत्पुत्री तस्या असुरवनिताया अतुलिता
ऽतुलेत्याख्यां बिभ्रत्यतिविकटकार्येषु कुशला ।
परं क्रोधं स्वाम्बां प्रति कृतचरीं दुर्व्यवहृतिं
विचिन्त्यावापन्न क्षणमपि कथञ्चित्क्षणमसौ ।। 11 ।।

प्रतीशोधस्तस्याः कथमिव मया साध्यत इति
मतिः प्रादुर्भूता मनसि कलुषेऽस्या हतधियः ।
स्वकार्ये सिद्धिः स्याद्यदि जनकपुत्रीरघुवरौ
मिथो भिद्येतामित्यवधृतमतिर्दुष्टयुवतिः ।। 12 ।।

अपेक्षाञ्चक्रे सोचितमवसरं पापहृदया
समासीदच्चैनं दशरथसुतारण्यगमने ।
तथा सीतादेव्यास्तटिनितटसम्प्राप्तिसमये
विधाता दुष्टानामपि जगति साहाय्यकृतिभाक् ।। 13 ।।

दधे मायारूपं जनकतनयाकिङ्करिसमं
तथारूपा तस्थे जनकतनयायाश्च सविधे ।
न चैतत्साऽज्ञासीत्सरलहृदया नैकदिवसान्
दिवारात्रं चासौ परिचरणमस्या व्यतनुत ।। 14 ।।

अमुष्यां किङ्कर्यामपि जनकपुत्र्याः समभवत्
सखीस्नेहो नित्यं परिचरणकार्यात्समुदितः ।
मनस्यन्यद्येषां भवति खलु ते किङ्करगणा
भवन्त्येवावश्यं परिचरणकार्येऽतितिनिपुणाः ।। 15 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

PURE CARE
PIAS

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रपतेदथ मत्पतेरिहा-
सुरपाशाकृतिचित्रणेऽप्रिये ।
नहि दृष्टिरथो च नो भवे-
त्कथमप्यस्य मनो विशङ्कितम् ।।21।।

इति चिन्तयमानमानसा
तनुगात्री जनकात्मजा तदा ।
विनिमार्ष्टुमदः स्वचित्रितं
समियेषाहितभूरियत्नका ।।22।।

अथ यावदमुष्य मार्जनं
विदधे तावददः स्फुटं बभौ ।
अगमत्परमावशा ततो
महतीं व्याकुलतां विदेहजा ।।23।।

किमिदं, नहि मृज्यते मया
कथमेतादृशवक्त्रचित्रणम् ।
कथमेव च मृज्यमानता-
वशतोऽति स्फुटताऽस्य जायते ।।24।।

इति चित्रमिवाभवत्तदा
न रहस्यं बुबुधे च जानकी ।
नहि कश्चन दानवीं गतिं
प्रभवेद् वेदितुमित्यसंशयम् ।।25।।

अतुला गमनाद्विदेहजा-
नयनाभ्यां किल दूरतः परम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रविवेश निजीयमायया
ऽसुरचित्रे तदभूच्च तद्वशे ।। 26 ।।

नहि मार्ष्टुमिदं यदाऽशकद्
दनुजाकारविलेखनं तदा ।
अपहर्तुमिदं स्वभर्तृतः
शयनान्तर्निदधे विदेहजा ।। 27 ।।

तदनन्तरमेव राघवः
शयनं विश्रमकाम्यया ययौ ।
समुपागतमात्र एव च
महदुष्णत्वमिहान्वभूदसौ ।। 28 ।।

सुतरां समभूच्च विक्लवः
परिशान्तोऽपि जितेन्द्रियोऽपि च ।
स तु धैर्यधनोऽपि सन्नभूच्
च्युतधैर्यो रघुनन्दनस्तदा ।। 29 ।।

नहि वेद स कारणं कथं
निजदेहे ज्वलिताऽनलावली ।
नहि पूर्वमियं कदाचना-
ऽप्यनुभूता भृशकष्टदा क्वचित् ।। 30 ।।

समुवाच स लक्ष्मणं तदा
नचिरान्मार्गय कारणं प्रिय ।
मयि केयमनल्पतोष्णता
किमिवैषा दहतीव मामिह ।। 31 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रवणाद्वचसो गुरोरनु
समभूत् तत्क्षणमेव लक्ष्मणः ।
गुरुवाक्यवशंवदो गुरो-
रसुखे हेतुविमार्गणाऽऽतुरः ।। 32 ।।

बहुमार्गणतत्परोऽपि सन्
न यदा किञ्चिदसाववैक्षत ।
स तदा खलु पर्यवर्तय-
च्छयनं भ्रातृवशे स्थितः सदा ।। 33 ।।

परिवर्तनकाल एव तद्
दशकण्ठाकृतिचित्रमापतत् ।
सममेव विदेहजाहृदा
ननु वैकल्यभृतेन सत्वरम् ।। 34 ।।

प्रविलोक्य बभूव तत्क्षणा-
दतिविच्छायमुखो रघूद्वहः ।
उपरक्त इव क्षपाकरो
हिमविध्वस्त इव द्रुमोऽथवा ।। 35 ।।

किमिदं, कृतवांश्च को न्विद-
मिति पृच्छन्तमुवाच राघवम् ।
कृतमस्ति मयेति जानकी
मम चेटीवचनानुसारतः ।। 36 ।।

वचनं श्रुतमात्रमेव तद्
अकरोत्तं ध्रुवमर्द्धमूर्च्छितम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

किमियं दनुजानुरागिणी
मम भार्या, कठिनाः खलु स्त्रियः ।। 37 ।।

उषिता सुचिरं विधेर्वशाद्
दशवक्त्रालय एषका ननु ।
प्रणयोद्गमसम्भवो भवेत्
ननु तेनेति न सम्भवी नहि ।। 38 ।।

प्रमदा जगति प्रमादिनी-
रवलोक्यैव बुधा न्यरूपयन् ।
नहि[1] प्रत्ययमासु कर्हिचित्
तनुयात् कोऽपि पुमान् विवेकवान् ।। 39 ।।

अथ यत्कृत एव सन्ततं
गतवान् कष्टपरम्परामहम् ।
ननु सैव जनेऽपरे रता
किमु मे दुःखमतः परं भवेत् ।। 40 ।।

अधुना नहि वस्तुमालये
क्षणमप्यर्हति मामकेऽधमा ।
वधमर्हति चाशिवति क्रुधा
समुवाचावरजं स लक्ष्मणम् ।। 41 ।।

अपनेष्व ममाप्रियामथो
वनमेनां च नय त्वमाश्वितः ।
जहि चापि न जीविता चिरं
स्थितिभाक् स्यात् प्रमदा प्रमादिनी ।। 42 ।।

1. 'ह्वे प्रे वा' इत्याश्रत्य प्रयोगः ।

CC-0. Prof. Satya Vrat Shastri Collection.

63

Digitized by Arya Samaj Foundation Chennai and eGangotri

रघुवंश्यमुखाद्विनिःसृताः
प्रलयाभ्राशनिसंनिभा इमाः ।
गहनां रुजमावहन् गिरो
विमले हन्त ! विदेहजाहृदि ।। 43 ।।

अनुनेतुमिमं विदेहजा
कुपितं यत्नमवातनोद् बहु ।
कलयाऽपि शशाक तत्र ना-
नुनयाच्छाम्यति कोपभाग् जनः ।। 44 ।।

नहि मे रतिरस्ति राक्षसे
कथमेनेन सहास्तु सा प्रभो ! ।
क्व च दुर्मतिरास्त राक्षसः
क्व च सर्वस्वमिवास्ति मे भवान् ।। 45 ।।

चरणौ शरणं तव प्रभो !
सततं ध्यानपरा ययोरहम् ।
उदितस्तव मानसे भ्रमः
स विवेकात्त्वयकाऽपनीयताम् ।। 46 ।।

नहि [1]प्रत्ययमादधात् प्रभू
रघुवंश्यो जनकात्मजागिरि ।
वधमेव समादिदेश च
सुतरां कोपवशं समागतः ।। 47 ।।

विनिहत्य विदेहजां द्रुतं
हृदयं तच्छवतः पृथक् कुरु ।

1. 'हे प्रे वा' इत्याश्रित्य प्रयोगः ।

CC-0. Prof. Satya Vrat Shastri Collection.

16

Digitized by Arya Samaj Foundation Chennai and eGangotri

उपनेष्व च मामिदं यतः
कृतकार्ये त्वयि विश्वसिम्यहम् ।। 48 ।।

इति वाचमुदीरितामुभौ
विनिशम्याशु विनिर्गतौ वनम् ।
तदुपेत्य च कस्यचित्त्विमौ
तरुमूलं विपुलं समाश्रितौ ।। 49 ।।

समुवाच तदा विदेहजा
वचनं लक्ष्मणमाधिपीडिता ।
ननु पालय वत्स ! सत्वरं
गुरुणा ऽऽदिष्टमिहास्ति यत्तव ।। 50 ।।

मनसाऽपि ऋते न चिन्तितः
स्वपतेरन्यजनो मया क्वचित् ।
अपराधमृतेऽपि मत्प्रभु-
र्मयि दण्डं सृजतीति किंन्विदम् ? ।। 51 ।।

जगतां पतिरस्ति मे पति-
र्ऋषिवर्यो जनकोऽस्ति मे पिता ।
कुलवृद्धिकरः कुमारको
मम गर्भेऽस्ति तथाऽपि यामि भोः ।। 52 ।।

परलोकमहं विधेर्वशान्
मम तावद् गतिरीदृशी बत ।
विधिना गमिताऽस्मि दारुणा-
महमेतां करुणां दशामिह ।। 53 ।।

165

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

उपनेष्व च मामिदं यतः
कृतकार्ये त्वयि विश्वसिम्यहम् ।। 48 ।।

इति वाचमुदीरितामुभौ
विनिशम्याशु विनिर्गतौ वनम् ।
तदुपेत्य च कस्यचित्त्विमौ
तरुमूलं विपुलं समाश्रितौ ।। 49 ।।

समुवाच तदा विदेहजा
वचनं लक्ष्मणमाधिपीडिता ।
ननु पालय वत्स ! सत्वरं
गुरुणा ऽऽदिष्टमिहास्ति यत्तव ।। 50 ।।

मनसाऽपि ऋते न चिन्तितः
स्वपतेरन्यजनो मया क्वचित् ।
अपराधमृतेऽपि मत्प्रभु-
र्मयि दण्डं सृजतीति किंन्विदम् ? ।। 51 ।।

जगतां पतिरस्ति मे पति-
र्ऋषिवर्यो जनकोऽस्ति मे पिता ।
कुलवृद्धिकरः कुमारको
मम गर्भेऽस्ति तथाऽपि यामि भोः ।। 52 ।।

परलोकमहं विधेर्वशान्
मम तावद् गतिरीदृशी बत ।
विधिना गमिताऽस्मि दारुणा-
महमेतां करुणां दशामिह ।। 53 ।।

165

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ननु लक्ष्मण! दृष्टवानसि
स्वसृभावेन सदैव मामिह।
मम मृत्युरतीव सौख्यद-
स्तव हस्तादयमाप्यते यदि ।।54।।

प्रहराशु ततस्तथा मयि
यमलोकं समुपैमि मे प्रियम्।
परिपालय वत्स! ते गुरो-
र्वचनं मा चिरमस्तु ते प्रिय! ।।55।।

इति धीरमुदीर्य जानकी
वचनं मौनमुपाश्रयद् बुधा।
क्रकचेन विदारितो यथा
गहनं कष्टमवाप लक्ष्मणः ।।56।।

स्वसृतुल्यविदेहजां कथं
पशुमारं ननु मारयान्यहम्।
अतिदारुणकर्मनिष्ठुरो
विनिहन्तुं प्रभुरस्मि नो इमाम् ।।57।।

समवेक्ष्य तु चिन्तनाकुलं
रघुवंश्यं जनकात्मजा तदा।
नहि साहसमस्ति मे वधे
कठिनोऽस्यायमिति प्रपद्य सा ।।58।।

परिदीपनकाम्ययैव तम्
अधिचिक्षेप पदैरनर्गलैः।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्रुध एव वशं गतो न्वयं
मम कच्चिद् विदधातु हिंसनम् ।। 59 ।।

किमु लक्ष्मण ! हंसि मां नहि
किमु चित्ते तव वर्ततेऽधुना ।
अबलां समवेक्ष्य मानसं
यमिनामप्यबलं प्रजायते ।। 60 ।।

उदितोऽनुचितोऽस्ति दूषिते
ह्यभिसन्धिस्तव मानसे यदि ।
त्यज तावदिमं बलाच्छठ !
तव हस्ते पतितास्म्यहं नहि ।। 61 ।।

इति वाचमिमां निशम्य स
भृशमुद्वेगकरीं क्रुधा श्वसन् ।
अचिचिन्तदसौ रघूद्वहो
कथमात्मेह मया प्रवर्त्यताम् ।। 62 ।।

मयकैव समं समागता
विपिनेऽस्मिञ्जनकात्मजेत्यतः ।
यदि हन्मि न तामहं तदा
परिवादोऽवतरेन्नवो मम ।। 63 ।।

हनने त्वहमस्यका गुरु-
गुरुवाक्यं परिपालयञ्जनैः ।
नहि दोषदृशा कथञ्चन
परिदृश्येय विचिन्तयन्निति ।। 64 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्वरितं विनिहन्तुमुद्यतो
द्रढयित्वा स्वमनोऽतिकोमलम् ।
ददृशे पुरतो विदेहजां
प्रयतामात्मविसर्जनोत्सुकाम् ।।65।।

असिमुद्धृतवानयं बला-
दबलायां विनिपातनाय हा ।
कथमप्यथ तां स नास्पृशत्
पतितोऽभूद्विफलश्च भूतले ।।66।।

पुनरेष समुद्दधार तं
द्रढयंस्तां प्रति मानसं स्वकम् ।
पतितो न च लक्ष्य इत्यतो
नितरां विस्मयमाततान सः ।।67।।

किमिदं, न मयेदृशं क्वचि-
दनुभूतं न च वा विलोकितम् ।
इति कारणमार्गणाकुलो
बहुमार्गां स्वमतिं व्यधादयम् ।।68।।

असिपातनतत्परस्य मे
नयने यत् पततोऽस्यकां ततः ।
करुणाऽङ्कुरणैव चेतसि
मम लक्ष्यच्युतिकारणं भवेत् ।।69।।

इति कारणचिन्तनोत्तरं
दृढमेष स्वदृशौ न्यमीलयत् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुनरेव च वेगवत्तम-
मसिमस्यां प्रजहार लक्ष्मणः ।। 70 ।।

बलवद् पतितोऽपि स ह्यसिः
क्षतिमस्या विदधे न काञ्चन ।
निपपात कृतापराधको
गतसंज्ञो भुवि लक्ष्मणस्तु हा ! ।। 71 ।।

अवधीन्न निरागसं क्वचि-
ददसीयोऽसिरिति प्रमाणितम् ।
बलवत्पतितेन तेन नो
हतभाग्यां जनकात्मजां घ्नता ।। 72 ।।

अथवा जनकात्मजाकृते
दृढचर्माऽऽस्त सतीत्वमेव हि ।
यदरक्षदमूं प्रहारतो
ऽक्षतरूपामभितः ससर्ज च ।। 73 ।।

व्यथिता प्रविलोक्य जानकी
गतसञ्ज्ञं भुवि लक्ष्मणं तदा ।
'विललाप सबाष्पगद्गदं
सहजामप्यपहाय धीरताम्' ।। 74 ।।

अयि वत्स ! कुतो ऽकुतोभयो
भुवि निद्रासि पृथग्जनो यथा ।
हतभाङ् न मृता ऽस्म्यहं पुन-
र्लुठसि त्वं भुवि तात ! किं वद ।। 75 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

बहुयत्नमुपाश्रयन्त्यसौ
प्रकृतिस्थं पुनरेनमातनोत् ।
प्रकृतिं गतवान् स नाददे
वचनं ग्लानमना मनागपि ।। 76 ।।

समयं गमयन्नधोमुखः
प्रविशन्नात्मनि च ह्रिया सुधीः ।
तमसा मलिनो गिरिर्यथा
मलिनाभां बिभराम्बभूव सः ।। 77 ।।

अथ किञ्चिदपि ब्रुवन्नहि
न्यवृतन्मन्दतरैः पदक्रमैः ।
कृतदुष्कृतदुःखभावना-
व्यथितः स्वं पुरमेव लक्ष्मणः ।। 78 ।।

पथि यांश्च मृतं ददर्श स
मृगमेकं तत उज्जहार च ।
हृदयं समुपानयच्च तत्
प्रभुरामार्थमुपायनं कृती ।। 79 ।।

(उपजातिवृत्तम्)

सीता प्रमीता नहि साम्प्रतं सा
मया हता जीवति जीवलोके ।
प्रमाणमस्या हृदयं प्रपश्य
मयोपनीतं तव दर्शनार्थम् ।। 80 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्येतदुक्त्वा परिदर्शयां स
बभूव तद् भ्रातरमाह चामुम् ।
कृतं मया त्वद्वचनं कृतात्मन्
यथा नियुक्तोऽकरवं तथैव ।। 81 ।।

दृष्ट्वाऽनुजानीतमसौ मनस्वी
विदेहजाया हृदयं घृणायाः ।
वशं गतः सन् समुवाच रामः
पशोरिवास्या हृदयं जघन्यम् ।। 82 ।।

इत्येतदुक्त्वा स बभूव तूष्णीं
राज्यस्य कार्ये च मनो न्यधात्स्वम् ।
न तस्य भावः परिशुद्धिमागात्
सीतां प्रतीत्येतदभूद्विचित्रम् ।। 83 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

एकविंशः सर्गः

(लवजन्मोपाख्यानम्)

(इन्द्रवज्रावृत्तम् उपजातिवृत्तञ्च)

विदेहजां शून्यवने विहाया-
ऽयोध्यां सुमित्रातनये निवृत्ते ।
एकाकिनी दुःखभरार्दिता च
चक्रन्द सीता कुररीव भीता ।।1।।

तस्यास्तदा दुःखभरो बभूव
बहिर्गतो ह्यश्रुभरच्छलेन ।
शून्या दिशः सम्प्रविलोकयन्ती
'स्वमेव सा दुष्कृतिनं निनिन्द' ।।2।।

नूनं मया पूर्वतनेषु जन्म-
स्वतीव घोरं कृतमस्ति पापम् ।
यत्तस्य साक्षात्परिणामरूपं
समश्नुवे कष्टमिदं कठोरम् ।।3।।

कठोरगर्भाऽप्यहिवद् वनेऽस्मिन्
त्यक्ताऽस्मि शङ्कालुहृदा स्वभर्त्रा ।
बाढं निरागा अपि सर्वथाऽह-
मकिञ्चना दैवगतिर्विचित्रा ।।4।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

चिरं दशास्यस्य गृहेऽधिवासे
न चिन्तितोऽभून्मनसाऽपि योऽसौ ।
रक्षोऽधमे मे मनसोऽनुरक्ति-
स्तत्रेत्यधिक्षेपवशं गताऽस्मि ।।5।।

त्यागो न भर्त्रा तुदते तथा मां
मिथ्या यथा लाञ्छनमेतदस्मात् ।
न जीवनस्यास्ति ममाभिलाष-
स्त्यागस्तु तस्याभिमतो मतो मे ।।6।।

त्यागाय यद्यप्यहमुत्सुकाऽस्मि
निरर्थकस्यास्य तिरस्कृताऽहम् ।
प्रजानिषेको मयि वर्तमानो
भर्तुर्भवत्यत्र ममान्तरायः ।।7।।

शून्या दिशो मे सकला विभान्ति
शून्ये वने कोऽपि न मे सहायः ।
किं वा करोम्यत्र क्व वा च यामि
कं वाऽऽह्वयाम्यत्र च मेऽस्ति नायः[1] ।।8।।

वधू रघूणां भुवि विश्रुतानां
ब्रह्मज्ञराजर्षिविदेहपुत्री ।
दैवस्य तावद्विपरीतभावाद्
दशामहं भोः ! करुणां गताऽस्मि ।।9।।

इत्थं सबाष्पं विललाप सीता
तस्मिन् वने श्वापदसङ्कुले सा ।

1. न अयः । अयः शुभावहो विधिः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

विदारयेद् दीर्घतरं यदद्रिं
विलापयेद् यत्सुतरामयोऽपि ।। 10 ।।

आकर्ण्य तत्क्रन्दनमाजगाम
धृत्वा महेन्द्रो महिषस्य रूपम् ।
तत्रैव यत्रास्त विदेहपुत्री
वृक्षस्य कस्यापि तले निषण्णा ।। 11 ।।

नेत्रद्वये तस्य बभूव तादृक्
किञ्चित्समाकृष्यत येन सीता ।
तन्मार्गगा चापि बभूव सद्य-
स्तमेव दीनानुससार चापि ।। 12 ।।

स्वैरं व्रजन्नेष वनस्य मध्ये
विदेहपुत्र्यानुगतः समीपे ।
स्थितोऽभवद् वज्मृगनामकस्या-
श्रमस्य कारुण्यनिधेर्महर्षेः ।। 13 ।।

ऋषिस्तदा तद्रुदितानुसारी
विदेहपुत्रीं समवालुलोके ।
विद्धेन बाणेन खगेऽस्य यादृक्
चित्तद्रवोऽभूदधुनाऽपि तादृक् ।। 14 ।।

मा त्वं शुचं पुत्रि गमः कथञ्चित्
त्यक्ताऽपि भर्त्रा सुतरां निरागाः ।
त्वमाश्रमे मे वस यावदिच्छं
न तेऽत्र कष्टं भविता कथञ्चित् ।। 15 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्येवमुक्त्वा समनाययत्तां
स्वमाश्रमं सर्वजनानुकम्पी ।
तपोनिधिर्वज्मृगनामकोऽसौ
सीतां कुटीरं च विनिर्दिदेश ।। 16 ।।

तस्मिन् कुटीरे समयं नयन्ती
प्राचीव कालेन सहस्त्ररश्मिम् ।
साऽसोष्ट पुत्रं रघुवंशरत्नं
योऽस्या अभूत्सान्त्वनमेकमात्रम् ।। 17 ।।

प्रसूतिकालेऽस्य महेन्द्रपत्नी
धात्रीक्रियाजातमवोढ साक्षात् ।
का वा नु तस्यां विपिने स्थिताया-
मन्या क्रियां कर्तुमिमामलं स्यात् ।। 18 ।।

पुत्रस्य जातस्य च जातकर्मा-
दिकं महर्षिः स्वयमेव चक्रे ।
तस्मै ददौ नाम च मङ्कुटेति
संवर्धयामास तमाशिषा च ।। 19 ।।

इत्थं प्रजातो रघुनन्दनस्य
श्रीरामभद्रस्य सुतः शुभोऽसौ ।
प्रवर्धितोऽभूदुपलालितश्चा-
श्रमे ऋषेर्वज्मृगनामकस्य ।। 20 ।।

स एव तावज्जनकात्मजाया
आलम्बनं नाम बभूव तत्र ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ระหว่างคุณกับคุณ
ระหว่างการเคลื่อนที่ของพลัง
กับแรงดึงดูดของหัวใจ

CC-0. Prof. Satya Vrat Sha... ec...

Digitized by Arya Samaj Foundation Chennai and eGangotri

यदीयवक्त्राम्बुजदर्शनेन
कालं स्वकं सा क्षपयाम्बभूव ।। 21 ।।

निभालयामास मुखे तदीये
पत्युर्निजस्य प्रतिबिम्बमेषा ।
तद्दुःखमस्या विरहेण जात-
मरुन्तुदं नैकगुणं ततान ।। 22 ।।

हन्तू रिपूणां जगतां नियन्तुः
समस्तपृथ्वीपरिपालकस्य ।
श्रीरामभद्रस्य सुतः प्रजातो
वने, विचित्रो नियतेः क्रमोऽयम् ।। 23 ।।

न तत्र तातः समुपस्थितोऽभू-
दिमं शिशुं लालयितुं निजाङ्के ।
धात्री न वा धापयितुं प्रियं तं
न चाभवन् मङ्गलवाद्यघोषाः ।। 24 ।।

न चैव गीतानि पिकस्वनीभि-
र्गीतानि नारीभिरमन्दहर्षात् ।
न चैव नृत्यानि मनोहराणि
नृत्याङ्गनाभिर्विततानि तत्र ।। 25 ।।

तत्राश्रमे केवलमास्त मन्त्र-
घोषोऽथवा पक्षिगणारवो वा ।
वातप्रकम्पद्रुमविच्युतानां
स्वनः फलानामथवा दलानाम् ।। 26 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

भावी नियन्तोत्तरकोसलाना-
मुन्मीलयामास निजाक्षियुग्मम् ।
अकिञ्चनाया नियतेर्विधानात्
स्वमातुरङ्के प्रथमं पृथिव्याम् ।। 27 ।।

संस्तभ्य दीना जनकात्मजा स्वं
दीर्घं विनिःश्वस्य यथा कथञ्चित् ।
विलोकयन्ती सुतवक्त्रपद्म-
मपाहरत्स्वाङ्गुलितोऽङ्गुलीयम् ।। 28 ।।

निभालयन्ती चिरमेतदेषा
दीना विवर्णाऽश्रुमुखी च तत्र ।
निवेशयामास सुताङ्गुलौ तत्
तस्यां तदेवाभरणं तदाऽऽसीत् ।। 29 ।।

ततो नु सम्प्रास्थित सा महर्षेः
कुटीरकं वज्मृगनामकस्य ।
ददर्श तं ध्याननिमीलिताक्षं
प्रसुप्तमीनह्रदतुल्यरूपम् ।। 30 ।।

तत्सन्निधौ सा तनयं निधाय
पयस्विनीं स्नातुमना जगाम ।
मार्गे प्रयान्ती च ददर्श नैकाः
सन्धारयन्तीः स्वमपत्यजातम् ।। 31 ।।

वक्षःस्थले वानरयोषितः स्वे
प्रकूर्दमानास्तरुतस्तरून् सा ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

दृष्ट्वा च ताः प्राकृतिकार्द्रभावाद्
दयामयी वाचमिमामुवाच ।। 32 ।।

कथं नु भो! यूयमितस्ततः स्वे-
नापत्यजातेन समुत्प्लवध्वे ।
किं वा न यूयं प्रविचारयध्वे
पतेद्यदीदं प्रसभं पृथिव्याम् ।। 33 ।।

विहस्य ता ऊचुरिमां वयं तु
त्वत्तोऽधिकं स्मः खलु सावधानाः ।
अपत्यजातं हृदये निदध्म-
स्त्वद्वत्समाधिस्थ ऋषेर्न पार्श्वे ।। 34 ।।

ध्यानं गतोऽसौ विनिमीलिताक्षो
बुध्येत ते पुत्रगतं न किञ्चित् ।
तद्युक्तियुक्तं वचनं निशम्य
व्रीडावनम्रा जनकात्मजाऽभूत् ।। 35 ।।

अहो यदेता प्लवगस्त्रियोऽपि
जानन्ति तद् बुद्धिगतं न मेऽभूत् ।
अहो! नु मौग्ध्यं मम येन तावद्
आसामुपालम्भवशं गताऽस्मि ।। 36 ।।

नैवं मयाऽऽसीत् करणीयमत्र
वनानि सत्यं बहुदोषवन्ति ।
विचिन्त्य सीतेत्थमकालहीनम्
ऋषेः कुटीरं पुनराजगाम ।। 37 ।।

178

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पाषाणखण्डे निकटस्थ एष
शिश्वाकृतिं प्राग् विलिलेख विज्ञः ।। 43 ।।

विचिन्तयामास ततश्च विद्वान्
प्राणप्रतिष्ठाविधिमस्य यावत् ।
तावन्निवृत्तां सह जातकेन
निभालयामास विदेहजां सः ।। 44 ।।

त्वया मयि स्थापित एष बाल-
स्त्वय्यस्ति सीते! अधुना कथं नु? ।
श्रुत्वादसीयां गिरमाशु सीता
प्रचक्रमे वाचमिमां प्रवक्तुम् ।। 45 ।।

सत्यं मया स्थापित एष पूर्वं
त्वत्सन्निधावास्त परं ततोऽनु ।
पथि प्रयान्ती प्लवगीजनस्य
ऋषे! उपालम्भवशं गताऽहम् ।। 46 ।।

यथोक्तमाभिर्जनकात्मजा तद्
यथायथं प्रोक्तवती महर्षिम् ।
सम्प्रोच्य चैतत् समुवाच सा तं
मयाऽपनीतोऽर्भक एष एवम् ।। 47 ।।

अस्त्वेतदेषाऽऽकृतिरस्ति कस्य
किं वा चिकीर्षत्यनया भवान्नु? ।
सम्पृष्ट एवं समुवाच दीर्घ-
तपा महर्षिर्जनकात्मजां सः ।। 48 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri



CC-0. Prof. Sat... ...ollection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वसन्निधौ ते तनयं न पश्यं-
स्तत्कारणं ज्ञातुमशक्नुवंश्च
नूत्लो मयाऽसौ करणीय एवे-
त्यचिन्तयं त्वद्धितमीक्षमाणः ।।49।।

भर्त्रा वियुक्ताऽसि ततोऽपि ते स्यात्
सुतेन वत्से! यदि विप्रयोगः ।
भवेदकस्मादतितीव्र एष
क्षते तव क्षार इव प्रहारः ।।50।।

एवं विचिन्त्याकृतिमत्र पुत्रि!
पाषाणखण्डेऽहमलेखिषं भोः ।
इमां लिखित्वा च विचिन्तयामि
प्राणप्रतिष्ठाविधिमेव यावत् ।।51।।

पश्याम्यहं त्वां तनयेन तावत्
समागतामत्र सह प्रियेण ।
प्राणप्रतिष्ठामधुना विचिन्त्या-
नपेक्षितामस्मि ततो विरक्तः ।।52।।

नैवं भवांश्चिन्तयतां कथञ्चित्
प्राणप्रतिष्ठां विदधातु चास्याम् ।
बालोऽपरो येन भवेत्सहायः
सङ्क्रीडने मत्तनयस्य तावत् ।।53।।

श्रुत्वा गिरो ऽस्या लिखिताकृतौ स
प्राणप्रतिष्ठां विधिना चकार ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पन्नमात्रे च विधौ कुमारः
समुत्थितोऽभूत् सुकुमार एकः ।। 54 ।।

सृष्टं हि तस्मै स्वतपोबलेन
लवेतिसञ्ज्ञां प्रददौ महर्षिः ।
आदाय तं च प्रययौ प्रतीता
सीता ऋषेः पादयुगं प्रणम्य ।। 55 ।।

(अनुष्टुब्वृत्तम्)

उभावप्यर्भकौ सैषा लालयामास यत्नतः ।
पोषयामास तौ चापि महर्ष्याश्रमवर्तिनी ।। 56 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri



CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वाविंशः सर्गः

(लवमङ्कुटरामसमागमोपाख्यानम्)

(अनुष्टुब्वृत्तम्)

सुखेन वसतोस्तत्र बालयोरुभयोरपि ।
दश वर्षाण्यतीतानि वज्मृगस्याश्रमे ऋषेः ॥1॥

बालावपि च तौ सन्तौ स्वसत्त्वेनात्यरिच्यताम् ।
वीरातिवीरांस्तरुणान्दृढसंहनननानपि ॥2॥

तावम्बामेकदाऽऽमन्त्र्य वने दूरं विनिर्गतौ ।
अपश्यतां च तत्रैकं द्यामारोहद् द्रुमोत्तमम् ॥3॥

सकलेऽपि वने तत्र नासीत्प्रांशुस्तथा द्रुमः ।
यथा सोऽदृश्यत स्प्रष्टुं द्यामिवासीत्समुद्यतः ॥4॥

परीक्षितुमनाः स्वस्य विशिखस्य गतिं तदा ।
महाद्रुममुं तावन्मङ्कुटो लक्ष्यमादधे ॥5॥

प्रजहार स वेगेन विशिखं लक्ष्यवेधिनम् ।
द्रुमः प्रहृतमात्रोऽसौ द्विधा येन व्यभज्यत ॥6॥

तादृशे तु महावृक्षे द्विधा भग्ने विलक्षणे ।
सांराविणमभूद्येन सर्वा पृथ्वी व्यकम्पत ॥7॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri



CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

भयार्ताः प्राणिनश्चापि सर्वे चेरुरितस्ततः ।
शिश्रियुस्तेषु केचिच्च गहनाः कन्दरा गिरेः ।।8।।

द्रुमभञ्जननिर्घोषो घोषः प्रलयवातवत् ।
सर्वैरपि जनैस्त्रस्तैः शुश्रुवे पृथिवीगतैः ।।9।।

रामस्यापि स निर्घोषोऽयोध्यायां श्रोत्रशष्कुली ।
पस्पर्श येन सुतरामुद्विग्नात्मा बभूव सः ।।10।।

कोऽयमेतादृशं घोषं मयि नारायणे स्थिते ।
मर्त्यलोके जनयति मार्गणीयोऽस्ति स ध्रुवम् ।।11।।

इति बुद्ध्या सोऽश्वमेधमाहर्तुं यज्ञमुत्तमम् ।
विनिश्चिकाय येनासावन्वेष्टुं शक्नुयाज्जनम् ।।12।।

घोषोऽतिभीमो जनितो येन सृष्टिविदारणः ।
गिरिर्ज्वालामुख इव सहसा दीर्णतां गतः ।।13।।

एवं सङ्कल्प्य स कृती जात्यश्वं मुमुचे शुभम् ।
हिमवत्सर्वशुभ्राङ्गं पादवृन्देन चारुणम् ।।14।।

अन्धं तमोवत्कृष्णास्यं जवे वातसमं तथा ।
स्वेनैव लोके सदृशमश्वमेधाय पार्थिवः ।।15।।

आदिदेश हनूमन्तमनुगन्तुं स वाजिनम् ।
भरतेन समं चाथ शत्रुघ्नेन नृपोत्तमः ।।16।।

योऽस्य मार्गं निरुन्ध्याद् वाऽऽरोहेद्वैनं च यो जनः ।
दण्डभाक् स भवेत् सत्यं राजद्रोहीति घोषितः ।।17।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri



CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति लेखं लेखयित्वा ग्रीवायां विनिबध्य च ।
चरणाय यथाकामं तमश्वं व्यसृजत्प्रभुः ॥18॥

क्रममाणः क्रमेणासावश्वोत्तम उपागतः ।
तमेव काननोद्देशं यत्रावर्तत मङ्कुटः ॥19॥

सङ्क्रीडमानः स्वभ्रात्रा लवेन परया मुदा ।
विचरन्तं दिव्यमश्वमक्षिलक्षीचकार सः ॥20॥

तद्रूपेण समाकृष्टः समया तं समाययौ ।
आयातमात्रो ग्रीवायां लम्बमानं ददर्श सः ॥21॥

लेखमस्य, यमालोक्य कस्यायमिति वीर्यवान् ।
नैवाबुद्ध तथाऽप्यत्र कर्तव्यं प्रत्यपद्यत ॥22॥

अहो! दृप्ताक्षरवचोविन्यासो यस्य कस्यचित् ।
शान्तं कोपानलं तावद् भूयो ज्वलयतीव मे ॥23॥

ऋषयो राक्षसीमाहुर्वाचमुन्मत्तदृप्तयोः ।
दृप्तस्येयं मया नैव वाक्सोढव्या कदाचन ॥24॥


नहि निःक्षत्रिया पृथ्वी गीरिवं यत्समादृता ।
यो वा को वा भवेदेष दर्शयिष्यामि पौरुषम् ॥25॥

इति निश्चित्य बालोऽसावतिसाहसिको हसन् ।
सत्रा लवेन स्वभ्रात्रा रुरोहाश्वं मुदा युतः ॥26॥

अवाहयच्च वेगेन वनमध्ये स वेगवान् ।
अक्षमिष्ट हनूमांस्तु तत्कृत्यं नो कथञ्चन ॥27॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri



CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनौचित्यकृता बाललीलाऽपि न भवेत्सताम् ।
क्षम्या, तत्प्रतिकूलत्वे त्वनिष्टं सम्भवेद् बहु ।।28।।

अहो धृष्ट ! कथं नाम रामभद्रतुरङ्गमम् ।
मातृक्रोडमिवारूढो वाहयस्येव वेगतः ।।29।।

अवतरास्मात्त्वरितं यदि प्राणाः प्रियास्तव ।
दुश्चेष्टां बालकस्यापि न क्षमन्ते महाजनाः ।।30।।

दृष्ट्वेमं प्रतिरोधार्थमुद्यतं मङ्कुटः कपिम् ।
ससर्ज बाणं निशितं निःसञ्ज्ञं यश्चकार तम् ।।31।।

सञ्ज्ञां लब्ध्वा कपी रूपं बालवत्स्वं चकार सः ।
अभ्यधावच्च वेगेन जिघांसुर्भ्रातरावुभौ ।।32।।

पुनरप्यभवत्तस्य पूर्ववद् दुर्गतिः कपेः ।
मङ्कुटेन स वीरेण हतप्रायत्वमापितः ।।33।।

तदैव दृष्टिः पतिता लवस्यास्मिन् विलक्षणे ।
कपौ स दृष्टवांश्चैनं वसानं वाससी शुभे ।।34।।

वसानं वाससी दृष्ट्वा तं स विस्मयमाययौ ।
तथैव मङ्कुटश्चापि विस्मयं परमागतः ।।35।।

कपिरेष न हन्तव्य इति बुद्धिं समाश्रितौ ।
सन्दानितं विदधतुस्तं तौ शूरशिरोमणी ।।36।।

स्वस्वामिनमृते नैनं शक्तो मोचयितुं जनः ।
इति तौ चक्रतुस्तत्र व्यवस्थां सुदृढां कपेः ।।37।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथवा शरणं यामि राममेव प्रभुं द्रुतम् ।
शरणं स शरण्यानां स एव परमा गतिः ॥48॥

परं कथमहं यायां दशामेतादृशीं गतः ।
सञ्चरेय पथा केन विधिर्निष्करुणो मयि ॥49॥

यदि व्योमपथेनाहं सञ्चरेय तदा ध्रुवम् ।
देवा उपहसिष्यन्ति दृष्ट्वैतादृग्दशं नु माम् ॥50॥

अयोध्यां न व्रजाम्येव तर्हि नैवास्ति मे गतिः ।
रज्जुसन्दानितेनैव मया कष्टश्रितेन च ॥51॥

कृत्स्नमायुर्भवेद् याप्यमहो ! याप्या मम स्थितिः ।
गच्छामि वा नवेत्यत्र निर्णयः कठिनोऽधुना ॥52॥

इति सञ्चिन्त्य सञ्चिन्त्य नोपायं समवेक्ष्य च ।
अयोध्यागमने तावत्स्वां मतिं विदधे कपिः ॥53॥

गच्छन् विहायसा चापि क्षणैः कतिपयैः प्रभुम् ।
उपेयिवान् यथावृत्तं सर्वं प्रणिजगाद च ॥54॥

श्रुत्वा दृष्ट्वा च तत्सर्वं प्रभुश्चुक्रोध भूरिशः ।
भक्तावमाननां नैव सहन्ते भक्तवत्सलाः ॥55॥

अन्यत्सर्वं विहायासौ कपिना सह वीर्यवान् ।
तत्क्षणं निर्ययौ तावद्वनोद्देशं रघूद्वहः ॥56॥

अकालहीनं च प्राप तद्वनं यत्र बालकौ ।
सङ्क्रीडमानावन्योन्यमासातां परया मुदा ॥57॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वेन साम्यं च तस्यासीत् प्रकटं सूक्ष्मदर्शने ।
तच्च भूयो मुदं तस्याजनयद्रोमहर्षिणीम् ॥ 78 ॥

शिरस्यजिघ्रदेनं स हर्षाश्रुभरितेक्षणः ।
सविग्रहं स्थितं पार्श्वे मनोरथमिवात्मनः ॥ 79 ॥

सीताऽपि जीवतीत्यस्य भूयसीं मुदमावहत् ।
सानुषङ्गाणि सन्त्येव कल्याणानि महीतले ॥ 80 ॥

पुत्रस्य लाभेन समं पत्नीलाभोऽपि चेद् भवेत् ।
सकृदेवार्पयेद्धाता द्वे फले अमृतोपमे ॥ 81 ॥

किमतः परमिष्टं स्यात्प्रियं वा किमतः परम् ।
ममान्त इव दुःखानामयं बाल उपस्थितः ॥ 82 ॥

किन्तु सीता प्रमीतेति लक्ष्मणः प्रोक्तवान् पुरा ।
सा जीवतीति सम्भाव्यं कथमेतन्नु सम्प्रति ॥ 83 ॥

स्थितिं सम्यक् विवेक्तुं स पृष्टवान् लक्ष्मणं तदा ।
यथास्थिति समाख्याहि किं न सीता हता त्वया ॥ 84 ॥

न्यक्षेण लक्ष्मणः प्राह सर्वं वृत्तं पुरातनम् ।
आकर्ण्य रामचन्द्रो यत्परं सन्तोषमाययौ ॥ 85 ॥

त्वया सम्यक् कृतं तात! त्वं ममानन्दवर्धनः ।
इत्युक्त्वावरजं भूयो भूयश्च परिषस्वजे ॥ 86 ॥

ततः स मङ्कुटं प्राह स्नेहसिक्तेन चेतसा ।
वत्स! द्रष्टुं त्वदीयाम्बामहमस्मि समुत्सुकः ॥ 87 ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तेनोमिति सति प्रोक्ते सह तेन लवेन च ।
वज्मृगस्याश्रममृषेः सद्यः स प्रस्थितोऽभवत् ।।88।।

अल्पीयसैव कालेन तं च प्राप्तोऽभवत्प्रभुः ।
समङ्कुटलवश्चापि समगंस्त स सीतया ।।89।।

तत्र वृत्तं यथावृत्तमर्भकौ तामवोचताम् ।
रामेण सह युद्धं च तेन सङ्गममेव च ।।90।।

(उपजातिवृत्तम्)

अबोधयेतां निखिलेन वृत्तं
स्वां मातरं तौ लवमङ्कुटौ द्राक् ।
रामेण युद्धं च समागमं च
प्राप्तिं वनात् पुण्यतमाश्रमं च ।।91।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्रयोविंशः सर्गः

(सीतापातालप्रवेशोपाख्यानम्)

(इन्द्रवज्रावृत्तम् उपजातिवृत्तञ्च)

दृष्ट्वा तु रामं समुपस्थितं स्वे
साक्षात्कुटीरे जनकात्मजा सा ।
स्थातुं न शक्ता न च वा प्रयातुं
गता तरङ्गेष्विव राजहंसी ।।1।।

चिराददृष्टं प्रविलोक्य राम-
मुपोषिताभ्यामिव लोचनाभ्याम् ।
पपौ ययौ नैव च तृप्तिमेषा
निमेषमात्रं च ततोऽन्यथाऽभूत् ।।2।।

सोऽयं जनो येन पुराऽहमासं
हन्तुं प्रदिष्टा ननु मन्ददिष्टा ।
वर्षाणि तावद्दश यापितानि
मयाऽति कष्टश्रितया वनेऽस्मिन् ।।3।।

रोषात् पुरा संशयशूकदष्टो
वस्तुस्थितिं योऽनवबुध्य सम्यक् ।
वाचं मदीयामवधीर्य शुद्धि-
प्रख्यापिकां मे वधमादिदेश ।।4।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तेनास्ति मे किं करणीयमद्य
शङ्कालुना क्रूरतमेन चापि ।
कठोरतां मां प्रति यो बिभर्ति
न स्यामहं तं प्रति किं कठोरा ? ।।5।।

श्मशानवज्जीवितमद्य मेऽस्ति
नानन्दलेशोऽपि विभाव्यतेऽत्र ।
ऋषेः कुटीरे निवसामि कष्टात्
तपस्विनीवाद्य तपस्विनी भोः ।।6।।

तस्याः स्त्रियाः सत्यमजीवनिः स्याद्
भर्त्रैव यस्या वध इष्यतेऽत्र ।
दण्डं प्रयुक्ताऽस्मि विनाऽपराधं
किमस्य राज्ञः सदृशं कुलस्य? ।।7।।

कष्टैरनिष्टैः परिवेष्टितां मां
विधाय किं नास्य मनोऽतितृप्तम् ।
कष्टायितु मे प्रियपुत्रकौ यत्
प्राप्तोऽयमद्यास्ति कुटीरकं मे? ।।8।।

इत्यादिनानाकुवितर्कवीचि-
प्रेङ्खोलिता सा शफरीव भूयः ।
विदेहपुत्री क्षणमप्यवाप
नैव क्षणं मौनमुपाश्रयच्च ।।9।।

ऽभिरामं चन्द्रमस्या
दुःखाम्बुदाच्छन्नमभिप्रपश्यन् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

उवाच चैनामपराधभीरु-
भीरु! क्षमां त्वामहमद्य याचे ।
कृतागसि त्वं मयि यद्दधासि
कोपं न तत्रानुचितं हि किञ्चित् ।। 16 ।।

त्वां नेतुमद्याहमुपस्थितोऽस्मि
पुरीमयोध्यामुपयाहि तां त्वम् ।
प्रासादशोभा भव मे पुनस्त्वं
मम प्रसादं च विवर्धयस्व ।। 17 ।।

नीतानि वर्षाणि मया दशै-
तान्यरण्यवासोचितजीवनेन ।
त्वया विना भामिनि कल्पकल्पा
हर्म्येषु रात्र्यो व्यतियापिताश्च ।। 18 ।।

त्वदेकचित्तोऽस्मि न रोचतेऽन्यत्
किञ्चित् समस्ते नृपवैभवेऽपि ।
शून्या दिशो भान्ति जगच्च शून्यं
शून्यस्य मे सर्वत एव शून्यम् ।। 19 ।।

इत्येवमुक्त्वा विरते नृपेन्द्रे
क्रोधेन दुःखेन च तप्यमाना ।
सन्धारयन्ती स्वमथो कथञ्चित्
सा मानिनी वाचमिमामुवाच ।। 20 ।।

सन्देहदंशेन भयङ्करेण
दष्टो यदा मे वधमादिशस्त्वम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

न जीवितं ते सकलं तदानीं
शून्यं भवेदित्यवधारणासीत्? ।। 21 ।।

जीवामि दैवादहमद्य राजन्!
मृता त्वहं त्वत्कृत आसमेव ।
मृतां गृहाणैव तु मां त्वमद्य
त्वया मया किं करणीयमस्ति ।। 22 ।।

अवर्णनीयाऽत्र मया विसोढा
ऽसहायया कष्टपरम्परा हा ।
स्वकीयहर्म्ये सुखितस्त्वमासी-
रहं पुनः काननमध्यवात्सम् ।। 23 ।।

यद् भाषसे चापि समं त्वयाऽहं
पुरीमयोध्यां प्रति संव्रजेयम् ।
तच्चित्रमाभाति वचस्त्वदीयं
चित्राऽस्ति पुंसां मनसो गतिर्नु ।। 24 ।।

संरक्षिताया दशकण्ठहर्म्ये
पुरा सुरक्षापुरुषैरनेकैः ।
चारित्र्यमालम्ब्य मदीयमासी-
स्त्वं शङ्कितान्तःकरणो नितान्तम् ।। 25 ।।

एकाकिनी त्वत्र वनेऽहमासं
दीर्घाणि यावद्दश हायनानि ।
चारित्र्यमालम्ब्य कुतो न शङ्का
तवाऽस्ति मां यत्सह नेतुमिच्छा ।। 26 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्षुद्रं तवातीव मनो मतं मे
शङ्काग्रहग्रस्तमसूयकं च ।
कृतां दशास्याकृतिमेव दृष्ट्वा
क्रोधेन सद्यो भ्रमितं बभूव ।। 27 ।।

प्रतिक्षणं सन्निधिमेव तेऽहं
त्वया समं भ्रान्तवती लषन्ती ।
वर्षाणि नाना विपिनान्तरेषु
तथाऽपि सन्देह उदैत्त्वदन्तः ।। 28 ।।

यथैव वर्षाणि मया दशाऽत्र
वनस्य मध्ये व्यतियापितानि ।
तथैव शिष्टं वन आयुषोऽत्र
लषाम्यहं यापयितुं कथञ्चित् ।। 29 ।।

तत्स्वस्ति तेऽस्तु व्रज राजधानीं
न्यायेन सर्वाः प्रकृतीः प्रशाधि ।
पत्नी तवाहं तव नित्यमेव
ध्यास्यामि कल्याणमहं स्थिताऽत्र ।। 30 ।।

इत्येवमुक्त्वा विरराम सीता
मुमोच चास्त्रौघमजस्रमेव ।
दुःखौघमेषाऽगलयच्चिरोत्थं
स्वकीयमस्त्रौघमिषेण तत्र ।। 31 ।।

तूष्णीं स्थितस्तत्र रघूत्तमोऽपि
प्रावाहयत्सन्ततमस्रजालम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पत्युश्च पत्न्याश्च हि सङ्गमोऽय-
मवासृजद् दुःखमनन्तमेव ।। 32 ।।

स्वं पर्यवस्थाप्य यथा कथञ्चित्
रामोऽस्रधाराविलनेत्रयुग्मः ।
उवाच सीतां यदि नो प्रयासि
मया समं त्वं जहि तर्हि मां त्वम् ।। 33 ।।

त्वया विना मे क्षणमात्रमिच्छा
न जीवितुं सम्प्रति जीवलोके ।
त्वमेव सर्वस्वमसि प्रमादं
क्षमस्व मे देवि! दयां च धेहि ।। 34 ।।

नेदं कदाचिन्मयि सम्भवीति
वचः कठोरं तमुवाच सीता ।
पत्या निहन्तुः सविधे कथञ्चित्
मया न वस्तव्यमवश्यमेव ।। 35 ।।

सङ्कल्प एषोऽस्ति यदि प्रमाथी
तवेत्यहं किं करवाण्यभाग्यः ।
पुत्रौ प्रियौ त्वं मयका प्रयातुं
सहानुमन्यस्व तयोर्हिताय ।। 36 ।।

सीता समाकर्ण्य वचोऽदसीयं
बभूव दोलाचलचित्तवृत्तिः ।
सम्प्रेषये वा नहि वा सुतौ स्वा-
वित्यत्र तस्या न विनिश्चयोऽभूत् ।। 37 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

चतुर्विंशः सर्गः

(सीतापातालप्रवेशोपाख्यानं पूर्वानुवृत्तम्)

(इन्द्रवज्रावृत्तम् उपजातिवृत्तञ्च)

सुतौ स्वतातेन सह प्रयान्तौ
कालेन साकेतमवाप्तवन्तौ ।
आकर्षणं तत्र निवासिनां च
बभूवतुश्चन्द्रमरीचिगौरौ ।।1।।

विकस्वराम्भोरुहदर्शनीयौ
गजेन यान्तौ कलभाविव द्वौ ।
रघूत्तमख्यातकुलप्ररोहौ
तपस्विवेषौ च धनुर्धरौ च ।।2।।

आनन्दनौ नेत्रयुगस्य दृष्ट्वा
ऽयोध्यापुरीवासिजनो न तृप्तः ।
बभूवतुः सत्यमुभौ कुमारौ
नेत्रद्वयासेचनकं जनस्य ।।3।।

हर्षोत्सवव्यापृतयोरजस्रं
नृपोचितैर्हृष्टहृदोश्च भोगैः ।
दिनान्यतीयुः प्रथमानि तावत्
क्षणोपमान्येव तयोः क्षणेन ।।4।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

आकर्ण्य यं वज्रसमं कठोरं
सीतामनो नो द्रवितं बभूव ।। 10 ।।

वाच्यः पिता मद्वचनाद् भवद्भ्यां
भवेदपीदं यदि सत्यमेव ।
एष्याम्यहं तेऽन्तिमदर्शनार्थं
पुरीमयोध्यामिति मे प्रतिज्ञा ।। 11 ।।

तौ तत्र कालं व्यतियाप्य कञ्चित्
पुनः स्वतातं समभिप्रयातौ ।
तमुक्तवन्तौ जननीवचश्च
रामोऽभवन्मर्मसु येन विद्धः ।। 12 ।।

निद्रां न लेभे स निशा अनेकाः
प्रजागराच्चापि कृशो बभूव ।
छाया तु लावण्यमयी मुमोच
लोकाभिरामं नहि तं कथञ्चित् ।। 13 ।।

विदेहजासङ्गमनाभ्युपायं
व्यचारयद्दीर्घविचारवान् सः ।
सीतावचस्येव तमाससाद
न बह्वपायं सममंस्त तं च ।। 14 ।।

निमन्त्रयामास कपिं स्वभक्तं
सदा स्वकार्यार्थसमुत्सुकं सः ।
उवाच चैनं प्रणयात्सखे! त्वं
कार्यं ममैकं हनुमन्! कुरुष्व ।। 15 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

สวยเกินใคร
ในสไตล์ง่าย ๆ สบาย ๆ
สไตลิ่งก์มูส ปรับสภาพผม
ให้นุ่มหนา มีน้ำหนัก
สลวยเก๋ไก๋ จัดทรงได้อย่างใจ
ในขนาด 150 มล.



WELLA

New Wave

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्वमाश्रमं याहि परं पवित्रं
कपे! ऋषेर्वज्मृगनामकस्य ।
कुटीरके तत्र च संवसन्तीं
विदेहपुत्रीं भण कौशलेन ।। 16 ।।

त्वद्विप्रयोगार्तिविदीर्णचेता
दिवं गतः सम्प्रति राघवेन्द्रः ।
इत्यस्मि दुःखाकरमद्य वृत्तं
त्वामागतः सूचयितुं विदूरात् ।। 17 ।।

यथोक्तमेतत्कुरु कार्यमाशु
सखे! हनूमन्नतिपाटवेन ।
त्वं संवृताकार उपेहि तां च
संभाषमाणो भव गूढभावः ।। 18 ।।

प्रियोऽसि मे त्वं कुरु तत् सखेदं
कुरु प्रसन्नं ननु मां सखेदम् ।
सदैव सप्रत्ययमस्ति चेत-
स्त्वय्येव मद्भक्तवरे हनूमन्! ।। 19 ।।

ओमित्युदीर्य प्रणिपत्य चासा-
वुत्पुप्लुवे द्यां पवनस्य पुत्रः ।
सम्प्राप गत्या पवनस्य शीघ्रं
विदेहजाशून्यकुटीरकं च ।। 20 ।।

आलोक्य तामश्रुकषायकण्ठो
निवेदयामास स घोरवृत्तम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

विहाय किं त्वं त्रिदिवं गतो भू-
रेकाकिनीं मामिह जीवलोके ।
स्वभर्तृवर्त्मप्रतिपन्नतैव
स्त्रीणां विधात्रा विहिता जगत्याम् ।। 27 ।।

पतिं तु या नार्यतिजीवतीह
नान्या ततोऽधन्यतमाऽत्र लोके ।
एवंविधाया हतजीविताया
न जीवनं हा मम जीवनं स्यात् ।। 28 ।।

न जीविता वा न मृता च वापि
स्वकर्मभोगार्थमहं श्वसन्ती ।
यथाकथञ्चिन्निजमायुषोऽहं
शेषं प्रभो! यापयितास्मि कृच्छ्रात् ।। 29 ।।

विलापमग्नेत्थमभूद्यदा सा
सीता तदाऽभूत्सहसैव रामः ।
तिरस्करिण्याः प्रकटश्छलेन
यस्यां हि सोऽन्तर्हित आस्त पूर्वम् ।। 30 ।।

आलोक्य तं विस्मितमानसा सा
स्वस्मिन्नविश्वासमुपेयुषी च ।
क्षणं तु तावद् बुबुधे न किञ्चिद्
बुद्धिभ्रमः सम्भ्रमजोऽत्र हेतुः ।। 31 ।।

ततो व्यजानाच्छलिताऽस्मि भर्त्रा
स्वमृत्युसन्देशमिषेण तावत् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri



สวยเกินใคร
ในสไตล์ง่ายๆ สบายๆ
สไตลิ่งก์มูส ปรับสภาพผม
ให้นุ่มหนา มีน้ำหนัก
สลวยเก๋ไก๋ จัดทรงได้อย่างใจ
ในขนาด 150 มล.

ต่างแบบเพื่อสไตล์ที่ต่างกัน

ผู้แทนจำหน่าย บริษัท เฟรอห์ลิงก์ คอมเมติคส์ จำกัด

เพราะ



นิวเวฟ ฮาร์ดลุค แฮร์สเปรย์
เฉี่ยวกว่าใคร
ในสไตล์ไฮ-แฮร์

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

विहाय किं त्वं त्रिदिवं गतो भू-
रेकाकिनीं मामिह जीवलोके ।
स्वभर्तृवर्त्मप्रतिपन्नतैव
स्त्रीणां विधात्रा विहिता जगत्याम् ।। 27 ।।

पतिं तु या नार्यतिजीवतीह
नान्या ततोऽधन्यतमाऽत्र लोके ।
एवंविधाया हतजीविताया
न जीवनं हा मम जीवनं स्यात् ।। 28 ।।

न जीविता वा न मृता च वापि
स्वकर्मभोगार्थमहं श्वसन्ती ।
यथाकथञ्चिन्निजमायुषोऽहं
शेषं प्रभो! यापयितास्मि कृच्छ्रात् ।। 29 ।।

विलापमग्नेत्थमभूद्यदा सा
सीता तदाऽभूत्सहसैव रामः ।
तिरस्करिण्याः प्रकटश्छलेन
यस्यां हि सोऽन्तर्हित आस्त पूर्वम् ।। 30 ।।

आलोक्य तं विस्मितमानसा सा
स्वस्मिन्नविश्वासमुपेयुषी च ।
क्षणं तु तावद् बुबुधे न किञ्चिद्
बुद्धिभ्रमः सम्भ्रमजोऽत्र हेतुः ।। 31 ।।

ततो व्यजानाच्छलिताऽस्मि भर्त्रा
स्वमृत्युसन्देशमिषेण तावत् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अहो! जघन्याऽस्य विचाररीतिः
कृत्यं जघन्यं च ततोऽपि भूयः ।। 32 ।।

पुरा मयोक्तं सुतयोर्मुखाद्यद्
भवेत्तु यद्यस्त्रभरेण तेऽन्तः ।
अवश्यमेवान्तिमदर्शनार्थं
पुरीमयोध्यामहमाव्रजेयम् ।। 33 ।।

तदेव सङ्केतमदादमुष्मै
येनाहमायामिह राजधान्याम् ।
मत्प्राप्तिहेतो रचिताऽत्र माया
मायाविना मत्पतिना नृशंसा ।। 34 ।।

प्रवञ्चनां शुद्धहृदो जनस्य
विगर्हणीयां प्रवदन्ति सन्तः ।
समाश्रयन्मद्विषये पतिस्तां
मर्मप्रहारं समपातयन्मे ।। 35 ।।

न स्थातुमीशे क्षणमप्यहं द्राग्
ऋष्याश्रमं यामि च मे निवासम् ।
पुनर्न विश्वासमहं कदाचिद्
गिर्यस्य यास्यामि शठोत्तमस्य ।। 36 ।।

इत्थं वचः प्रोच्य समुत्थिताऽभूत्
ततो विदेहस्य सुता प्रयातुम् ।
तन्निर्गमं च प्रतिरोद्धुकामो
रामोऽवदत् सान्त्वपरं वचस्ताम् ।। 37 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्वत्प्राप्तये भामिनि! संश्रितोऽभूद्
दुःखातिरेकेण मयैष पन्थाः ।
तन्मा क्रुधस्त्वं मयि देवि! सीते!
दीने जने ते करुणैव साध्वी ।। 38 ।।

दयापराऽसाधुमिमं क्षमस्वा-
न्याय्यं ममाचारमति प्रबुद्धा ।
मतिभ्रमः प्राकृतिकोऽस्ति पुंसु
जायाविहीनस्थितिकेषु लोके ।। 39 ।।

क्रोधाद् भ्रमन्ती परिनिःश्वसन्ती
विदेहजाऽऽकर्ण्य वचस्तदीयम् ।
प्रवञ्चकेनेह न मेऽस्ति कार्यं
पुनः पुनर्वाचमिमामुवाच ।। 40 ।।

हन्ताऽसि पत्या अनुदारभावः
प्रवञ्चकोऽस्युत्पथमाश्रितोऽसि ।
इतो विनिर्यामि निजाश्रमं च
प्रयामि तत्रैव सुखं ममास्ति ।। 41 ।।

इत्येवमुक्त्वा क्रुधमभ्युपेता
प्रचक्रमे सा तु यदा प्रयातुम् ।
तदैव रामः समुवाच गन्तु-
मितो न शक्ताऽसि कथञ्चिदेव ।। 42 ।।

द्वाराणि रुद्धानि समन्ततोऽत्र
विनिर्गमस्यास्ति न तेऽभ्युपायः ।

CC-0. Prof. Satya Vrat Shastri Collection.
9

Digitized by Arya Samaj Foundation Chennai and eGangotri

न त्वादृशः स्युर्विनयेन शक्याः
कर्तुं वशे नानुनयेन वापि ।। 43 ।।

श्रुत्वातिघोरं वचनं तदीयं
सीता परं विस्मयमाजगाम ।
सम्प्रार्थयामास च सेष्टदेवं
बद्धाञ्जलिर्नेत्रयुगं निमील्य ।। 44 ।।

अतीव चित्रं समभूत्तदैव
पृथ्वी विदीर्णा स्वयमेव जाता ।
विदेहजाता च ततः प्रयाता
पाताललोकं प्रति लोकवन्द्या ।। 45 ।।

(अनुष्टुब्वृत्तम्)

राजा पाताललोकस्य नाम्ना नागविरुण्णिति ।
तदाऽऽसीद्यः शशासामुं न्यायेनामितविक्रमः ।। 46 ।।

स्वयं पृथ्व्यां विदीर्णायां प्राञ्जलिः प्रणता तदा ।
तस्यैव राजधानीं सा सीता माता गताऽभवत् ।। 47 ।।

तच्च दृष्ट्वाऽद्भुतं दृश्यं सुतरां रोमहर्षणम् ।
रामः सीतावियोगार्तो निःसञ्ज्ञो भूतलेऽपतत् ।। 48 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पञ्चविंशः सर्गः

(सीतारामसमागमोपाख्यानम्)

(इन्द्रवज्रावृत्तम्)

कालेन भूयः परिलब्धसञ्ज्ञः
स्वं पर्यवस्थाप्य यथाकथञ्चित् ।
राजा प्रजारञ्जनमादधानो
रामः स्वकार्येषु बभूव सक्तः ।।1।।

अत्रान्तरे देवसभं विशालं
श्रीशङ्करादेशवशाद् बभूव ।
कैलासशैले त्रिदिवाः समेऽपि
यल्लोकलोकान्तरतः समेताः ।।2।।

(इन्द्रवज्रावृत्तम् उपजातिवृत्तञ्च)

प्रत्येकमेतच्छतहायनाना-
मायोज्यतानन्तरमत्र शैले ।
असूचयन्निर्जरसः समेता
यत्रेश्वरं सृष्टिगतं यदास्त ।।3।।

संयोजिते देवसभे तदानी-
मिन्द्रादयो देवगणा अवोचन् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तथास्त्विति प्रोक्तवतीश्वरे द्राग्
राम: समाहूयत जानकी च ।
आनाय्यतादेशवशात्प्रभोर्द्राक्
पाताललोकाद्विबुधैः सुदूरात् ।। 10 ।।

तयोः प्रभुः सङ्गममीप्सुरेवं
व्यचिन्तयद् यद् यदि कौशलेन ।
वर्तेऽहमत्रातिसुदुष्करस्य
कार्यस्य सिद्धिर्भविताऽन्यथा न ।। 11 ।।

सीतागतं रोषमसौ प्रजानन्
रघूद्वहाङ्गीकरणे च नेच्छाम् ।
तदानुकूल्यं प्रथमं विधातुं
रामं स निर्भर्त्सयितुं प्रवृत्तः ।। 12 ।।

विवेकवान् सन्नपि यत् स्वपत्न्या
यथास्थितिं न प्रविजानतैव ।
वधस्त्वयाऽऽदिष्ट इति प्रमाथी
रामास्त्ययं ते प्रथमोऽपराधः ।। 13 ।।

प्रख्याप्य मृत्युं हनुमन्मुखेन
प्रावञ्चयो यज्जनकात्मजां त्वम् ।
राज्ञोऽतिसन्धानपरस्य सत्यं
तव द्वितीयोऽस्त्यपराध एषः ।। 14 ।।

दिवं गतोऽसीति कपेरसत्य-
सम्भाषणात्तेऽन्तिमदर्शनार्थम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पञ्चविंशः सर्गः

(प्रहर्षिणीवृत्तम्)

आजह्रे प्रयतपरिग्रहद्वितीयः
काकुत्स्थो विविधमखान् स दक्षिणाढ्यान् ।
आराध्य प्रकृतिजनान्निजांश्च कामं
लोकेऽस्मिन्विमलतमामवाप कीर्तिम् ।। 31 ।।

इति श्रीसत्यव्रतशास्त्रिणः कृतिषु
श्रीरामकीर्तिमहाकाव्यं समाप्तिमगात् ।
शुभं भूयादध्यापकानामध्यायकानां च ।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अलं बहूक्तैरथवाऽत्र शक्तिं
नियोधने त्वं मम विद्धि साक्षात् ।
हस्ते स्थिते नैव हि कङ्कणे स्यात्
कस्याऽप्यपेक्षा मुकुरस्य तावत् ।। 60 ।।

पातालराजो निशितैः समन्ताद्
हनूमतो वाग्विशिखैः प्रविद्धः ।
क्रोधेन जज्वाल तदाज्यधारा-
सारैः समिद्धो हुतभुग् यथैव ।। 61 ।।

ततः समादाय कपिं स दोर्भ्यां
बलाद्विनिष्पेष्टुमियेष दुष्टः ।
कपिस्तरस्वी तरसा च तं द्राक्
सम्पातयां भूमितले बभूव[1] ।। 62 ।।

समारुरोहाथ च तस्य वक्षो
विनिष्पिपेषाथ च तत्समन्तात् ।
नखैश्च तीक्ष्णैर्नखिनां वरेण्य
'उरोविदारं प्रतिचस्करे च' ।। 63 ।।

उन्मोच्य हस्ताद् दृढया स्वशक्त्या
हनूमतो दानवराजमुख्यः ।
कोपारुणाक्षः पुनरेव तावत्
तमभ्यधावद्विनिहन्तुकामः ।। 64 ।।

ततोऽतिभीमं ववृते नियुद्धं
दुर्दान्तयोस्तत्र परस्परेण ।

1. तं पातयां प्रथममास पपात पश्चादितिकालिदासीयप्रयोगवदेवायं प्रयोगः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्वाहं वीरो जगति विदितो राक्षसानामधीशो
राज्याद् भ्रष्टो वनमधिवसन् राघवो वा पुनः क्व ।। 15 ।।

तं तादृक्षं मशकमिव भोः स्वेच्छयैवोपपन्नं
निष्पीड्याऽहं करतलगतं हेलयैव प्रसन्नः ।
मामाक्रान्तुं कृतपरिकरं स्वस्य मृत्युं यथैव
रामं रामाविरहजरुजं प्रापयिष्याम्यनन्ताम् ।। 16 ।।

नाम्नैवास्से दनुजकुलजो भीषणस्त्वं विशेषाद्
यत्सत्यं मे विगतमिव ते भीषणत्वं विभाति ।
यस्त्वं रामं दशरथसुतं वन्यवेषं ब्रवीषि
मृत्युं मे भोस्त्रिभुवनजयस्फीतबाहुद्वयस्य ।। 17 ।।

वस्तुं सत्यं मयि न सुतरामर्हसि त्वं विमूढो
निर्गच्छेतो स्वयमहमुत त्वामहं शत्रुपक्ष्यम् ।
लङ्कापुर्याः पृथगनुचरैः सावमानं करोमि
स्वाङ्गं चेत्स्याद् वपुषि गलितं तद् बहिष्कार्यमेव ।। 18 ।।

श्रुत्वा भ्रातुः परुषवचनं सर्वथाऽशान्तचित्तः
स्वप्नव्याख्याविधिविधिवशात्प्राप्तभूयोपमानः ।
याप्ये रोगे भिषगिव रुजाक्रान्तकायं नरं स
सन्त्यज्यायादवमतिशिखिज्वालया दह्यमानः ।। 19 ।।

रामञ्चाऽऽयात्सपदि शरणं तं शरण्यं विपश्चित्
तं चाप्याख्यत्कृतचरमभूद्यद्दशास्येन तस्मिन् ।
भक्तिप्रह्वश्चरणकमले राघवस्य प्रणम्य
स्वं स्वीकर्तुं प्रभुमयमहो! प्रार्थयामास धीरः ।। 20 ।।

1.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

एकोऽस्ति वज्राङ्गबली हनूमान्
योऽस्मासु शक्तः समभिप्रपत्तुम् ।
पातालदेशं दनुजाधिराज-
निवासभूमिं भुजगैः परीतम् ।। 21 ।।

तस्मात्स यात्वाशु विहाय चिन्तां
तत्र स्थितं रक्षतु राघवं च ।
कृत्येषु सर्वेष्विदमेव कृत्यं
भजेत तावत्प्रथमत्वकोटिम् ।। 22 ।।

वाचं निशम्याथ विभीषणस्य
श्रीरामभद्रार्थपरायणस्य ।
उत्पुप्लुवे द्यां पवनस्य पुत्रः
पातालदेशं प्रति च प्रतस्थे ।। 23 ।।

सङ्कल्पितार्थं हृदि सम्प्रधार्य
कष्टैरनिष्टैरपि वेष्टिताङ्गाः ।
मनस्विनो धैर्यपराः स्वकार्यं
संसाधयन्त्येव तदेकचित्ताः ।। 24 ।।

प्रतिष्ठमानश्च ददर्श मध्ये-
पथं तदा वीरवरः सरः सः ।
चक्रैरिवात्यन्तविशालरूपैः
पद्मैर्भृतं यत्परितो बभूव ।। 25 ।।

समुद्दधारैकमसौ तदैषु
तन्नालदण्डे स्वमवेशयच्च ।

1. वष्टि

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

एकोऽस्ति वज्राङ्गबली हनूमान्
योऽस्मासु शक्तः समभिप्रपत्तुम् ।
पातालदेशं दनुजाधिराज-
निवासभूमिं भुजगैः परीतम् ।।21।।

तस्मात्स यात्वाशु विहाय चिन्तां
तत्र स्थितं रक्षतु राघवं च ।
कृत्येषु सर्वेष्विदमेव कृत्यं
भजेत तावत्प्रथमत्वकोटिम् ।।22।।

वाचं निशम्याथ विभीषणस्य
श्रीरामभद्रार्थपरायणस्य ।
उत्पुप्लुवे द्यां पवनस्य पुत्रः
पातालदेशं प्रति च प्रतस्थे ।।23।।

सङ्कल्पितार्थं हृदि सम्प्रधार्य
कष्टैरनिष्टैरपि वेष्टिताङ्गाः ।
मनस्विनो धैर्यपराः स्वकार्यं
संसाधयन्त्येव तदेकचित्ताः ।।24।।

प्रतिष्ठमानश्च ददर्श मध्ये-
पथं तदा वीरवरः सरः सः ।
चक्रैरिवात्यन्तविशालरूपैः
पद्मैर्भृतं यत्परितो बभूव ।।25।।

समुद्दधारैकमसौ तदैषु
तन्नालदण्डे स्वमवेशयच्च ।

1. वष्टि

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

दशमः सर्गः

(बेञ्जकय्युपाख्यानम्)

(इन्द्रवज्रावृत्तम् उपजातिवृत्तञ्च)

आसीत्पुरा बेञ्जकयीतिनाम्नी
क्रूराकृती राक्षसकन्यकैका ।
सा रावणोक्ता विदधे स्वरूप-
मभिन्नरूपं जनकात्मजायाः ।। 1 ।।

मृतामिव स्वं परिदर्शयन्ती
तस्याः प्रवाहे स्वमवाहयत्सा ।
नद्या वगाहं[1] व्यतनिष्ट यस्यां
श्रीरामभद्रोऽनुदिनं प्रभाते ।। 2 ।।

मायावशेनैव तया स्वरूपं
धृतं मृताया जनकात्मजायाः ।
येनावगाहार्थमुपागतः स-
न्नालोक्य तां मुह्यतु रामभद्रः ।। 3 ।।

नष्टा प्रिया मे किमु जीवितेन
कार्यं ममेति प्रतिपन्नबुद्धिः ।
खिन्नान्तरात्मा विरमेत्स युद्धात्
प्राणांस्त्यजेद्वा वनमाश्रयेद्वा ।। 4 ।।

1. वष्टि भागुरिरल्लोपमित्यनेनावगाहस्थाने वगाहशब्दः प्रयुक्तः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सप्तमः सर्गः

(हनुमत्सम्पर्कोपाख्यानम्)

(इन्द्रवज्रावृत्तम् उपजातिवृत्तञ्च)

मध्येपथं वृक्षतले क्वचित् स
श्रमापनोदाय निषण्ण आसीत् ।
अवीजयत्तं पवनोऽतिमन्द-
स्तत्र स्थितं सेवकवच्छ्रमेण ।।1।।

वातेन मन्देन स वीज्यमानो
जगाम निद्रां व्यथितो हृदाऽपि ।
निद्रा मता शान्तिकरी जगत्यां
कष्टश्रितानामपि देहभाजाम् ।।2।।

अत्रान्तरे दीर्घवपुः कुतश्चित्
समापतत्तत्र कपिप्रवीरः ।
अदृष्टपूर्वौ युवकौ वनान्ते
स विस्मितोऽभूत् सुतरां च दृष्ट्वा ।।3।।

सौमित्रिरत्रावसरे बभूव
स्थितोऽग्रजं स्वं समयाऽसिहस्तः ।
नैवोर्ध्वदृष्टिः स बभूव यस्मात्
नालोकयामास कपिं स तस्मात् ।।4।।

CC-0 Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

वात्यामिवाभ्यापतितां विलोक्य
तां लक्ष्मणः स्तम्भयितुं प्रवृत्तः ।। 10 ।।

नारीत्यहिंस्येति स मन्यमान-
स्तां नो सुमित्रातनयोऽजिघांसत् ।
कर्णौ च नासां च चकर्त तस्याः
स केवलं तां निरभर्त्सयच्च ।। 11 ।।

वैरूप्यमेवं प्रतिपादिता सो-
पैद् भ्रातरौ द्वौ खरदूषणाख्यौ ।
उपेत्य वृत्तं निजगाद चापि
तौ चापि योद्धुं समुपेयतुर्द्राक् ।। 12 ।।

सलक्ष्मणं दाशरथिं वनान्ते
सैन्येन साकं महता निजेन ।
सहायहीनोऽपि सलक्ष्मणस्
तौ सम्प्रापयत्प्रेतपुरीं स वीरः ।। 13 ।।

ततो ययौ शूर्पणखाऽतिखिन्ना
भ्रात्रन्तरं रावणनामधेयम् ।
तं चाह केनापि विरूपिताऽस्मि
तपस्विवेषेण वनान्तरेऽहम् ।। 14 ।।

सीतेति नाम्न्यस्ति तदीयभार्या
रसायनं नेत्रयुगस्य लोके ।
धात्रा प्रयत्नेन कृता पृथिव्याम्
'एकत्र सौन्दर्यदिदृक्षयेव' ।। 15 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

यावत्स्थास्यन्ति गिरयः सरितश्च महीतले।
तावद्रामायणकथा लोकेषु प्रचरिष्यति।।

So long as the mountains and the rivers last
on the surface of the earth, will continue
the Rāma story in the worlds.

ตราบใดที่ภูเขาและแม่น้ำทั้งหลายยังมีอยู่บนพื้นปฐพี
ตราบนั้นเรื่องของพระรามก็จะยังคงอยู่ในโลกต่อไป

VII

OK

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सीतामुपेतां यदुपारुधस्त्व-
मयं तृतीयोऽस्ति तवापराधः ।। 15 ।।

क्षमामिमामस्य कृतेऽपराध-
त्रयस्य याचस्व विदेहजां त्वम् ।
मन्ये ध्रुवं त्वामपराद्धमेषा
मृष्येदमर्षं च हृदो विजह्यात् ।। 16 ।।

न साध्वहं नाम विदेहजाया-
मचारिषं तेन कृतापराधः ।
उपस्थिते देवसभे तदर्थं
याचे क्षमां राम इदं बभाषे ।। 17 ।।

तदोन्मुखीभूय विदेहजातां
महेश्वरो वाचमिमामुवाच ।
क्षमस्व सीते! पतिमर्हसि त्वं
नैवास्य तावत्प्रणयं विहन्तुम् ।। 18 ।।

श्रुत्वा प्रभोर्वाचमुवाच सीता
पतिर्ममैषोऽस्थिरचित्तवृत्तिः ।
रुष्येत्कदाचित्त्वथवा प्रसीदेत्
कदाचिदित्यस्मि नितान्तभीता ।। 19 ।।

नाङ्गीकरिष्यामि विभो! अतोऽहम्
एवं कदाचित्पुनरप्ययं स्यात् ।
असाधुवृत्तिर्मयि वृत्तिरस्य
दृढं विनिर्धारयितुं न शक्या ।। 20 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सत्यं प्रसादोऽपि भयङ्करः स्या-
ल्लोके जनस्यास्थिरचित्तवृत्तेः ।
अतो न शक्ताऽस्य गृहे निवस्तुं
सङ्कल्प एषोऽस्ति दृढो मदीयः ।। 21 ।।

विदेहजाया अभिलक्ष्य बुद्धिं
दृढां महेशः पुनरूचिवांस्ताम् ।
मैवं शुभे ! बुद्धिमिमां कृथास्त्वं
पतिर्हि नार्याः परमेश्वरोऽस्ति ।। 22 ।।

अङ्गीकुरुष्वात इमं प्रसादा-
न्मत्वात्र सीते ! खलु मत्प्रसादम् ।
नात्रान्यथा ते मतिरस्तु भद्रे !
वचो मम त्वं परिपालयस्व ।। 23 ।।

प्रभो! तवाज्ञां शिरसा वहामि
सदा तवादेशवशंवदाऽहम् ।
बुद्धेर्भ्रमो नैव ममात्र कश्चि-
'दाज्ञा प्रभूणां ह्यविचारणीया' ।। 24 ।।

अङ्गीकरोम्येव तवाज्ञयाऽहं
पतिं पुनर्देवसभेऽद्य शम्भो ! ।
इत्येवमुक्त्वा प्रणनाम सीता
प्रभुं महेशं जगतामधीशम् ।। 25 ।।

रामोऽपि भक्त्या प्रणनाम शम्भुं
विदेहजासङ्गमसम्प्रहृष्टः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रत्यावृत्तः क्षणेनैव रङ्गाख्येन द्रुमेण सः ।
तत्प्रहारं पातयिष्णुः कुम्भकर्णेऽतिदारुणम् ।। 48 ।।

ततः प्रववृते युद्धं दैत्येन्द्रकपिमुख्ययोः ।
कपिमुख्यस्य तत्राभूच्छक्तौ ह्रासोऽभिलक्षितः ।। 49 ।।

गतागताभ्यां श्रान्तोऽभूत्सुतरां वानरस्तदा ।
श्रान्तः सोऽस्त्वित्युपायोऽयं कुम्भकर्णेन चिन्तितः ।। 50 ।।

श्रान्ते तस्मिन्महावीरेऽनायासेनैव दानवः ।
तं विजिग्ये प्रतस्थे च तं स्वकक्षे विधारयन् ।। 51 ।।

सुग्रीवस्य दशामेतामालोक्य हनुमांस्तदा ।
परापतद्दानवेन्द्रं सुग्रीवं च व्यमोचयत् ।। 52 ।।

अदशत्कर्णनासे च दनुजस्याञ्जनीसुतः ।
गैरिकाद्रेः प्रावृषीव रक्तस्रावोऽभवद्यतः ।। 53 ।।

स एवंस्थितिको लङ्कामभिपेदेऽतिलज्जितः ।
अवमानप्रतीकारं स्वां शक्तिं मनसा व्रजन् ।। 54 ।।

तस्याऽऽसीद्रक्षसः शक्तिर्मोक्षशक्तिरितीरिता ।
मोक्षोपायो दानवानां रामाख्यविपदस्तदा ।। 55 ।।

शक्तेर्जागरणं शक्तेर्भवेद्दैवतपूजया ।
इति सञ्चिन्त्य दैत्योऽसौ तदर्थं समनह्यत ।। 56 ।।

पूजार्थं स नदीतीरं पुण्यमेकं समाश्रयत् ।
पूजां यथाविधानं च सम्प्रारभत वीर्यवान् ।। 57 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अहो! भागधेयं यदावां स्मृतौ स्वः
करिष्याव आवां समुद्रेऽत्र सेतुम् ।
भवत्कार्यहेतौ निमित्तीभवन्ता-
ववश्यं प्रभो! धन्यकोटिं गतौ स्वः ।।5।।

तमुक्त्वैवमाशु प्रवीणौ स्वकार्ये
विहायान्यकार्यं समासज्जतां तौ ।
सुशीलाश्च सद्वृत्तयश्च स्युरेव
नियोज्या नियोगे स्वके सावधानाः ।।6।।

तयोरेवमासीन्निबन्धोऽत्र सेतो-
र्यदेकः शिलाः प्रक्षिपेदब्धिमध्ये ।
तदन्यश्च सम्यग्यथास्थानमेना
उपस्थापयेत्सेतुकार्यप्रवीणः ।।7।।

शिलानामवक्षेपकार्यं चकार
कपीनां वरो नीलफद्वीरवर्यः ।
निवेशं च तासां व्यधादाञ्जनेयो
यथाशक्ति कालातिपातं विहाय ।।8।।

पितृव्ये हनूमान् न मे साध्वचारीत्
पुरा जम्बुनाम्नीति कोपं दधानः ।
कपिर्नीलफद् मन्यते स्मोपयुक्तां
प्रतीकारवेलामिमामेव वीरः ।।9।।

द्रुतोऽभूत्तथा क्षेपणेऽसौ शिलानां
यथा नाशकत्तान् निवेष्टुं कथञ्चित् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

आविष्ट औत्सुक्यभरेण यावत्
कुम्भं स उद्घाटयते नृपर्षिः ।
तावद्ददर्शान्तरमुष्य कन्यां
सद्यःप्रसूतामतिविस्मितः सः ।। 37 ।।

नद्या अधिष्ठात्र्यतिसौम्यभावा
नाम्ना प्रसिद्धा मणिमेखलेति ।
सहान्यदेवैः कुशलं निजाङ्के
न्यध्यायदस्याः शुभकन्यकायाः ।। 38 ।।

लक्ष्मीरियं भूतलमागतेति
विवेद सा साधुतयाऽतिसाध्वी ।
होतोरतः कुम्भमुखापिधाने-
ऽप्यजीवदेषा न च कष्टमाप्नोत् ।। 39 ।।

राजर्षिरेषोऽभिललाष गन्तुं
राज्यं स्वकं नो च ववाञ्छ भङ्गम् ।
निजस्य तावत्तपसस्तपस्वी
कुम्भं ततोऽरण्यमसावनैषीत् ।। 40 ।।

कस्यापि वृक्षस्य च तत्र मूले
ऽखानीदसौ गर्तमुपायकामः ।
देवान् स सम्प्रार्तथतापि कन्या
पत्नी भवित्री यदि केशवस्य ।। 41 ।।

लोकेऽवतीर्णस्य तदाऽत्र पद्म-
माविर्भवत्वात्मनि चापि कुम्भम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

वृत्तं श्रुत्वाऽतिमृदुहृदयो राघवः स्वीचकार
शत्रोः पक्षादुपगतमपि प्रेमभावात्तमाशु ।
तत्पश्चात्तौ परमसुहृदौ प्रत्ययं धारयन्ता-
वन्योन्यस्मिन् कमपि समयं निन्यतुः स्वं सुखेन ।। 21 ।।

रामं भ्रातुः परिगतवतो राक्षसानामधीश-
स्यासीत् पूर्वं कपिवरभटैः संस्तवोऽदृष्टपूर्वः ।
तत्र प्राप्तेः प्रथममभवत्तस्य चित्तं सचिन्तं
शक्त्या युक्ताः क्व दनुजभटा वानराः क्व श्लथाङ्गाः ।। 22 ।।

रामस्याप्तः शिबिरमनघस्तान्यदा सन्ददर्श
चित्रीयायाः परमुपगतः पारमासीत् स दैत्यः ।
शक्ताः किं स्युर्दनुजकुलजैर्योद्धुमेते कपीन्द्रा
इत्याशङ्कां निजमनसिजां सोऽथ सुग्रीवमाह ।। 23 ।।

सुग्रीवस्तांस्तदनु स कपीनादिशच्छक्तिमेनं
वीराः! सद्यो दनुजकुलजं दर्शयध्वं स्वकीयाम् ।
जानीयात्सोऽप्यविदितचरीं येन वः शक्तिमद्य
साक्षाद् दृष्टे भवति सुतरां प्रत्ययो नात्र शङ्का ।। 24 ।।

तच्छ्रुत्वा ते वचनममलं यूथमुख्यस्य दीप्ताः
शक्तेः स्वस्याः परिचयविधौ स्वं मनो दत्तवन्तः ।
वृक्षान् केचिद् विपुलतरकान्केचिदेवापि चाद्रीन्
मूलोच्छेदं करतलगताञ्चक्रिरे साहसेन ।। 25 ।।

अन्ये तावद् दृढतरधियः सूर्यमावव्रिरे द्राग्
जातं विश्वं प्रबलतमसाऽऽच्छादितं येन विश्वम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

बुद्ध योद् फेति नामाऽऽसीत्तस्य विद्वन्महामणेः ।
रामगाथां स्ववाचा यो जगौ कविधुरन्धरः ।। 13 ।।

रामकीर्तिरितिख्यातं तत्काव्यमतिविस्तृतम् ।
नानासहस्रसङ्ख्याकैर्निबद्धं हृदयङ्गमैः ।। 14 ।।

पद्यरूपै[1] रामगाथामवान्तरकथाशतैः ।
जोषयत्सुतरां रुच्यैरधिलोकं विराजते ।। 15 ।।

न दृष्टं वा श्रुतं वाऽपि काव्यं तादृङ् मनोहरम् ।
रामगाथागानपरमित्यत्रत्याः प्रचक्षते ।। 16 ।।

पाठं पाठं च तत्काव्यं पायं पायं च तद्रसम् ।
काव्यामृतरसज्ञानां नैव तृप्तिः प्रजायते ।। 17 ।।

बुद्ध नाइ लर्त् लेत्याख्यस्तत्परो नृपतिर्वरः ।
प्रास्तौषीन्नाट्यरूपेण रामगाथां मनोहराम् ।। 18 ।।

अशिश्रियत्स संक्षेपं रामगाथानिरूपणे ।
अतो नाट्यप्रयोगार्थमुपयुक्ताऽस्ति तत्कृतिः ।। 19 ।।

तद्वर्णितां रामगाथां कौशलेन प्रयुञ्जते ।
तदुच्चारणयोगेन सम्प्रत्यपि कुशीलवाः ।। 20 ।।


वसाना आढ्यवर्णानि वासांसि रुचिराणि ते ।
छद्ममुखा[2] वृतमुखा रञ्जयन्ति नृणां मनः ।। 21 ।।

अभिनेयं तथा वस्तु कुशलाः प्रस्तुवन्ति ते ।
येन गूढोऽपि तद्भावः स्फुटो भवति तत्क्षणात् ।। 22 ।।

1. प्रशस्तैः पद्यैरित्यर्थः । प्रशंसायां रूपप् (5. 3. 66) ।
2. मास्क इत्याङ्गल्यां वाचि ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri



CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदेषु भूयो भयमाततान
जग्मुः प्रभुं ते च समे जवेन ।। 10 ।।

सर्वे च सम्भूय तमार्थयन्तो-
पायं स्वरक्षार्थमभिप्रयुक्ताः ।
तेषां दशां वीक्ष्य कृपालुरेष
नारायणं द्राङ् मनसा जगाम ।। 11 ।।

उपस्थितेऽस्मिन्समुवाच चैनं
देवानवेर्निर्जितनन्दकस्त्वम् ।
एवं भवेदीश्वर ! यत्त्वमात्थ
त्वदीयवाङ् मान्यतमा मता मे ।। 12 ।।

ततोऽप्सरोरूपमसौ दधानः
सम्मोहनं, नन्दकमाससाद ।
क्रीडारतश्चापि बभूव तेन
स्मराभिभूतः स बभूव येन ।। 13 ।।

यावत्तया[1] सङ्गममाचकाङ्क्ष
नृत्याम सैनं समुवाच तावत् ।
नृत्यप्रसङ्गे च निजाङ्गुलं स्वा-
धःकाय एषा समपातयिष्ट ।। 14 ।।

अदीर्घदृष्टिः खलु नन्दकोऽपि
चकार तद्वत् प्रबभञ्ज तं[2] च ।
छिद्रं प्रपश्यंश्च वधाय तस्य
नारायणस्तत्र समुद्यतोऽभूत् ।। 15 ।।

2. तम्-अधःकायम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्रमेण तेनाभवदेष केश-
हीनोऽतिदीनस्त्रिदशौघसेवी ।
हीनत्वबुद्ध्याऽऽत्मनि चाप दुःखं
ययौ महेशं च स तन्निवृत्त्यै ।।5।।

बद्धाञ्जलिः प्रार्तथतैनमाशु-
तोषं निजं तोषमभीप्सुरेषः ।
तादृग् वरं देहि विभो ! भवेयं
न येन भूयो ह्युपहासपात्रम् ।।6।।

युगानि नाना मयका विसोढा
ऽवमाननादुःखपरम्परा भोः ! ।
नातः परं सोढुमहं क्षमस्तां
तद्देहि मे शक्तिमनन्तशक्ते ! ।।7।।

यमेव तावत्स्वकराङ्गुलेन
विनिर्दिशेयं स भवेत्प्रमीतः ।
तथास्त्विति प्रत्यवदन्महेशः
सेवां तदीयां गणयन् पुरस्तात् ।।8।।

ततोऽनु देवाः समुपेयिवांसः
कैलासशैलं प्रभुदर्शनार्थम् ।
समाचरन्पूर्ववदेव तस्मि-
न्नबुध्यमाना नवशक्तिमस्य ।।9।।

तदाङ्गुलं तद्दिशि सोऽकरोद् द्राक्
पेतुश्च देवा व्यसवः क्षणेन ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

विदेहजां काञ्चनदेहयष्टिं
शास्त्रोक्तरीत्या परिणीय रामः ।
पुरीं स्वकीयां न्यवृतत्सुखेन
प्रजाजनौघैरभिनन्द्यमानः ।।59।।

(रामासुरोपाख्यानम्)

रामासुराख्यः पथि दिव्ययोनि-
र्ज्ञात्वा धनुर्भङ्गमथेश्वरस्य ।
तमाह्वतातिप्रतिकूलभावा-
दयुद्ध तेनाथ च घोरयुद्धम् ।।60।।

रामेण रामासुरनामकोऽसौ
भुवि प्रसिद्धं परशुं दधानः ।
पराजितः शस्त्रभृतां वरेण
प्रदर्शितश्चापि निजस्वरूपम् ।।61।।

नारायणोऽयं प्रकटः पुरस्ता-
न्मद्भागधेयादिति हृष्टरोमा ।
तस्यानुकूल्याय समार्पिपत्तद्
धनुर्महेशः प्रददे पुरो यत् ।।62।।

त्रिमेघनाम्नेऽस्य पितामहाय
समाददे तन्मुदितश्च रामः ।
चिक्षेप खे चैतदिति ब्रुवाणो
न्यासोऽस्त्विदं मे वरुणाह्वदेवे ।।63।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

राज्येऽभिषेकं पतिमर्थयस्व
वरावुभौ पूर्वप्रतिश्रुतौ तौ। ।।15।।

तथेति तां प्रत्यवदत्तनूजा
सा केकयानां प्रययौ पतिं च।
वराविमौ देहि प्रतिश्रुतौ ता-
वित्यभ्यधात् तं च जरापरीतम् ।।16।।

वराविमौ वज्रनिपाततुल्यौ
प्राणान्नृपस्याहरतां क्रमेण।
रामोऽपि सम्पूरयितुं प्रतिज्ञां
पितुः प्रयातो विपिनं ससीतः ।।17।।

सलक्ष्मणश्च व्यनयत्स कालं
बम्भ्रम्यमाणो विपिनान्तरेषु।
तत्रापि कष्टं नहि तं मुमोच
'छिद्रेष्वनर्था बहुलीभवन्ति' ।।18।।

आसीत्तदा शूर्पणखेति नाम्नी
स्वसा दशास्यस्य सुदुर्दशेव।
जिह्वेत्यभिख्येन विवाहिता या
ऽसुरेण लङ्कापुरमध्युवास ।।19।।

गन्तव्यमासीद्विपिनं कदाचिद्
दशाननेनेति स आह जिह्वम्।
रक्ष त्वमेव ह्यनुपस्थितौ मे
लङ्कापुरीं प्राणमिव स्वकीयम् ।।20।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्बन्ध आभाषणपूर्वकोऽभूद्
रामस्य सुग्रीवकपेश्च तत्र ।
मैत्री च सम्बन्धवशात्प्रजाता
प्रगाढतां या क्रमशः प्रयाता ।। 16 ।।

मैत्र्या तया दाशरथिर्जघान
सुग्रीवशत्रुं किल वालिसञ्ज्ञम् ।
सीतापुनःप्राप्तिकृते च साह्यं
सुग्रीवराजः प्रतिजज्ञ एनम् ।। 17 ।।

वालीतिनामास्य बभूव शक्ति-
शालीति लोकत्रितये प्रसिद्धः ।
भ्राताऽग्रजो वानरयूथमुख्यो
येनास्य जातः प्रबलो विरोधः ।। 18 ।।

(स्वागतावृत्तम्)

पूर्ववृत्तमभवत्खलु तावत्
कारणं प्रबलमत्र विरोधे ।
तादृगेव घटतेऽत्र जगत्यां
नैव चिन्तयति कोऽपि तु यादृक् ।। 19 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

नियोधने तं विनिहत्य चापि
स शूरमानीश्वरमाससाद ।
नियोधनायाह्वत तं च दर्पान्
मत्ताः प्रमत्ताः किमु वा न कुर्युः ।। 10 ।।

तमीश्वरो वालिनमाह गन्तुं
यतो वधोऽभूत्सुविनिश्चितोऽस्य ।
स वालिनं प्रेक्ष्य नियोधनाय
स्वशक्तिगर्वान्धितयाह्वत द्राक् ।। 11 ।।

आह्वानमस्यातितराममृष्य-
न्नमर्षणस्तेन बलान्न्ययुद्ध ।
वाली न तं चाप्यशकद्विजेतुं
न तं च स प्रार्थितशत्रुलुब्धः ।। 12 ।।

वाली ततस्तं महिषं जगाद
योद्धुं परेद्युर्गिरिकन्दरायाम् ।
ओमित्युवाचाथ च तं स वीर!
यथाभिलाषस्तव तत्तथाऽस्तु ।। 13 ।।

सुग्रीवसञ्ज्ञं समुवाच वाली
गुहामुखे स्थातुमथानुजं सः ।
द्रष्टुं प्रवाहं रुधिरस्य चापि
तेनानुमातुं विजयाजयौ च ।। 14 ।।

वीक्षेत रक्तं यदि कृष्णवर्णं
स मन्यतां यन्महिषो हतोऽस्ति ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

आलोकमालोकमहं न तृप्तिं
त्वां यामि कल्पद्रुफलं यथैव ।। 48 ।।

आत्मैव नामात्मज उक्तपूर्वः
श्रुतौ ममात्मैव ततोऽसि वीर ! ।
शौर्यं यथा मे त्वयि तत्तथैव
तथैव रूपं च गुणास्तथैव ।। 49 ।।

प्रभो ! विचित्रैव तवाऽस्ति माया
ऽकस्माद्यया सङ्गमिताविह स्वः ।
इत्येवमुक्त्वा स बभूव तूष्णीं
कपिः प्रहर्षाश्रुभराविलाक्षः ।। 50 ।।

मच्छानुरूप्येनमथो विदित्वा
वायोस्तनूजं पितरं प्रियं स्वम् ।
अप्रार्थितावाप्तफलो विधानाद्
विधेर्बभूवातितरां प्रहृष्टः ।। 51 ।।

याभ्यां भुजाभ्यामभवन् प्रहाराः
सम्पातिता येन भृशं कठोराः ।
ताभ्यां गलच्चेतन एष तात-
मालिङ्गने गाढतमे बबन्ध ।। 52 ।।

पादौ च पस्पर्श गुरोः प्रवीरः
क्षमामिमं चापि भृशं ययाचे ।
अज्ञानहेतोर्बहु कर्म लोके
ऽनौचित्यपूर्णं क्रियते जनेन ।। 53 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

नैव श्रुतं वा न च वा कथञ्चिद्
दृष्टं भवेल्लोमविहर्षणं यत् ।।65।।

(अनुष्टुब्वृत्तम्)

दण्डादण्डि मुष्टीमुष्टि दन्तादन्ति कचाकचि ।
हनुमन्मैयराबौ तौ न्ययुद्ध्येतां परस्परम् ।।66।।

सर्वं पातालतलोकं तन्नियुद्धं समकम्पयत् ।
द्रष्टुं भूतगणाः सर्वे नानादिग्भ्यो यदागताः ।।67।।

तालवृक्षान्समुत्पाट्य प्रजह्रे हनुमान् रिपौ ।
अहतश्चाक्षतश्चापि सोऽवातिष्ठत दानवः ।।68।।

ततो वीरक्वना प्राह हनूमन्तमिदं वचः ।
लब्धोऽनेन वरो भद्र! येन हन्तुं न शक्यते ।।69।।

प्रथमं यावदात्माऽस्य हन्यते नहि केनचित् ।
तावद्धन्तुं न शक्योऽयं देवैरपि कदाचन ।।70।।

यावद्धनूमानशृणोदिमा वीरक्वनागिरः ।
तावद्विराट्स्वरूपं स्वं विततान महाकपिः ।।71।।

क्षणेन च त्रिकूटाख्यं पर्वतं समुपेयिवान् ।
भृङ्गरूपं समापन्नं तदात्मानमवैक्षत ।।72।।

समापत्य च तं तावद्धृत्वा चात्मकरे कपिः ।
तत्क्षणं मुष्टिनिष्पेषं निष्पिपेष हसन्निव ।।73।।

तस्मिन्पिष्टे मैयराबो निःसञ्ज्ञो भूतलेऽपतत् ।
अलुठद् दीनवच्चापि दशकण्ठसखः शठः ।।74।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तमाह्वयामास नियोद्धुकामो
बलाद् बली बालिशबुद्धिमेनम् ।
आह्वानमेतस्य न मृष्यमाणः
सोऽमर्षणो द्रागभवत् सुसज्जः ।। 49 ।।

उज्झाञ्चकार स्वमथासनं स
भीमं च हुङ्कारमवाससर्ज ।
स सृक्किणी चापि लिहन्बभूव
प्रोच्छूनरक्तायतनेत्रयुग्मः ।। 50 ।।

हसन् बभाषे कपिमेष मे त्वं
कोपाग्निमेतः शलभो यथैव ।
भस्मीभविष्यस्यचिरेण तेन
मच्छक्तिसञ्ज्ञापरिशून्यकत्वात् ।। 51 ।।

कापेयमेतन्मम यत् पुरस्त्वं
स्थितो नियुद्धं ननु याचसे माम् ।
अपेहि तद्दूरमितः प्रयाहि
प्राणाः प्रियास्ते यदि सन्ति कच्चित् ।। 52 ।।

किं मादृशा वीरवराः कदाचित्
प्रत्यर्थिसार्थं प्रविजेतुकामाः ।
नियुध्य तावत्कपिना विशुद्धां
कीर्तिं स्वकामाविलयन्ति लोके ? ।। 53 ।।

पातालराजेन दिगन्तराल-
विश्रान्तिमद्विश्रुतकीर्तिभाजा ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीराघवेन्द्रस्तदनु प्रवीरः
पौलस्त्यसेनाकदनं चकार ।
एकैकशस्तत्र निकृत्तशीर्षा
निकृत्तशाखा इव शाखिसङ्घाः ।।7।।

निशाचरा भूमितले निपेतू
रक्तं वमन्तो लुलुठुश्च दीनाः ।
तत्सर्वमालोक्य बभूव चिन्ता-
चान्तान्तरङ्गो दनुजाधिनाथः ।।8।।

एवं स्थितिश्चेत्कतिचिद् दिनानि
चमूर्ममेयं क्षयमेव यायात् ।
अतोऽत्र किञ्चित्करणीयमेव
नो चेद्विनाशो मम निश्चितोऽस्ति ।।9।।

बहु प्रतर्क्यैवमुपायमेष
श्रीरामनाम्न्या विपदो विमुक्तेः ।
सञ्चिन्तयामास विचारशीलः
पितामहप्रार्थनमेव तावत् ।।10।।

नाथस्त्रिलोक्या मलिवग्गपूर्व-
ब्रह्मेतिसंज्ञस्त्रिदशाग्रगण्यः ।
मलीवराजेत्यपराभिधानो
न्यायप्रियत्वेन बिभर्ति कीर्तिम् ।।11।।

रामेण कर्माचरितं जघन्यं
मद्देशमाक्रान्तवतेति तथ्यम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पितामहो यद्यवबोधितः स्यात्
प्रत्यायितश्चापि विनिश्चयेन ।। 12 ।।

न्यायप्रियत्वाद् ध्रुवमेष रामं
शपेत कोपस्य वशं गतः सन् ।
न्यायप्रियोऽयं नहि रेखयाऽपि
न्याय्यात्पथः प्रच्यवनं सहेत ।। 13 ।।

शप्तोऽमुना स्याद्यदि राघवो नु
वर्चस्वहीनः स विनाशमेयात् ।
तस्मिंश्च नष्टे सकलाऽस्य सेना
दिशो द्रवेन्नौरिव नेतृहीना ।। 14 ।।

एवं स्थिते सर्वमनोरथा नः
सिध्येयुरित्यत्र न संशयोऽस्ति ।
एवं शठो नैकविधं कुतर्क-
जालं स्वचित्ते रचयाम्बभूव ।। 15 ।।

विरच्य तं कामपि निर्वृतिं स
भजन् स्वदूतावयमाजुहाव ।
कार्ये पटू नान्यविगेतिवायु-
वेगेतिसञ्ज्ञौ समुवाच तौ च ।। 16 ।।

यातां भवन्तौ चतुराननस्य
लोकं स्थितिं वेदयताममुं च ।
एतुं भुवं प्रेरयतां जघन्यं
दुष्कर्मिणं दण्डयितुं च रामम् ।। 17 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri



CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सप्तदशः सर्गः

(रावणात्मोपाख्यानम्)

(स्वागतावृत्तम्)

यत्नजातमभितः प्रविलोक्य
जेतुमाहवमृते रघुवंश्यम् ।
निष्फलं दृढमतिं प्रविधाय
रावणः समरभूमिमुपेतः ।। 1 ।।

तादृशः समभवत् किल घोरः
सङ्गरोऽतिभयदस्त्रिजगत्सु ।
राघवेन्द्रदशकन्धरयोर्यो
न श्रुतो नहि च वा परिदृष्टः ।। 2 ।।

तत्कुतूहलवशात्समुपेता
अद्भुतं तमवलोकयितुं द्राक् ।
सिद्धयक्षमुनिपन्नगपूगा
देवता इतरभूतगणाश्च ।। 3 ।।

शौर्यमत्र समरे रघुवंश्य-
स्यात्यरिच्यत न चापि दशास्यः ।
पर्यहीयत मनागपि शस्त्रै
राघवस्य निशितैरपि धीरः ।। 4 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

128

Digitized by Arya Samaj Foundation Chennai and eGangotri

आत्मनो हननमस्य विधातु-
माश्रमे ऋषिवरस्य च यातुम् ।। 10 ।।

रामभद्रमयमाह तरस्वी
कार्यमेतदहमस्मि विधाता ।
शीघ्रमेव भविता तव चिन्ता
मत्प्रयत्नवशतो व्यपयाता ।। 11 ।।

युक्तिमाश्रितवता मयका भो-
याश्रितो भवति चेच्छलमार्गः ।
नाहमस्मि भवता परिदृश्यः
संशयेन मनसाऽपि कदापि ।। 12 ।।

एवमस्त्विति महात्मनि रामे
प्रोक्तवत्यथ कपिर्द्रुतगत्या ।
अङ्गदेन सहितः प्रययौ गो-
पुत्रसञ्ज्ञकऋषेर्वरधाम ।। 13 ।।

प्राप्य चैनदयमाह ऋषिं तं
मान्य ! तेऽस्मि शरणं प्रतिपन्नः ।
रामनामकजनं परिचर्य
नांशतोऽपि फलमस्त्यृषिवर्य ।। 14 ।।

तेन मान्यवर ! विप्रकृतोऽस्मि
धिक्कृतोऽस्मि बहु चापकृतोऽस्मि ।
न क्षणं क्षणमपि प्रतिपन्न-
स्त्वां शरण्यमहमस्म्युपपन्नः ।। 15 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri



ด้วยมาตรฐานที่สูง บรรยากาศอบอุ่น การวางผังที่ดี...ไม่แออัด
สาธารณูปโภคที่เพียบพร้อมสมบูรณ์ ความเอาใจใส่...และเป็นกันเอง
แบบบ้านที่มีให้เลือกหลายแบบ เหตุผลเหล่านี้เองที่ทำให้ตัดสินใจได้เลยว่า...



ซื้อบ้านสัมมากรดีกว่า



CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ततो याहि लङ्कां विहायान्यचिन्तां
सहायं स्वकं मोचयस्वापदश्च ।
विपन्नस्य तावत्सहायस्य साह्य-
मवश्यं विधेयं सता मानवेन ।। 16 ।।

इमं रामभद्रस्य सन्देशमाप्य
हनूमान् नवं फ्यानुजं नाम बिभ्रत् ।
नृपालो नवाभिख्यपुर्या इदानीं
पुरीं रावणभ्रातुराशु प्रतस्थे ।। 17 ।।

अनल्पेन कालेन चैनामवाप्य
प्रवीरो महीपालदेवासुरं सः ।
नियुद्धाय सज्जो भवेत्याह्वतैनं
समाचष्ट तावत् तवान्तोऽस्मि चेति ।। 18 ।।

समाकर्ण्य तच्छ्रोत्रशूलं वचोऽस्य
नदन् सिंहनादं प्रकोपारुणाक्षः ।
तमभ्यद्रवद्वायुवेगेन वायोः
सुतं सङ्गतोऽभूच्च तेन क्षणेन ।। 19 ।।

नियुद्धाय सम्प्रार्थिता वीरवर्याः
स्वमानैकसंरक्षणासक्तचित्ताः ।
निजां शक्तिमेवाकलय्य स्वशस्त्रं
झटित्येव शत्रोः पुरस्ताद् भवन्ति ।। 20 ।।

समालोक्य वीरं कपिं सम्मुखे स
तृणायैव तं मन्यमानो बभाषे ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

विंशः सर्गः

(सीतानिर्वासनोपाख्यानम्)

(शिखरिणीवृत्तम्)

मृधे रक्षोराजे दशमुख उपेते यमपुरी-
मयोध्यां श्रीरामो जनमहित आसीत्प्रतिगतः ।
अभूत्तत्रामुष्याभिमततरकः सर्वजगतो-
ऽभिषेको राज्ये यो जनमनसि मोदं समतनोत् ।। 1 ।।

वसन् प्रासादे स्वे समहृदयभ्रातृत्रययुतः
समं जानक्याऽथो मृदुहृदययाऽऽनन्दमतुलम् ।
अयं विन्दन् भिन्दन् जनमनसि मोहान्धतमसं
सुखं कालं नैजं व्यपगमयति स्म प्रमुदितः ।। 2 ।।

अभूत्तस्मिन् काले जनकतनयाऽपि प्रमुदिता
पुरा कष्टौघं याऽसहत वचनानामविषयम् ।
विचित्रैषा लोके स्थितिरिह यया नन्दति जनः
क्षणान् कांश्चित्कांश्चिद् गहनतमकष्टं व्रजति च ।। 3 ।।

वनेषु भ्रान्त्वाऽपि प्रथममतिकष्टेषु गहने-
ष्वयोध्यायां सम्प्रत्यतिमहितपुर्यामधिगता ।
पदं सीता राज्ञ्या इह जगति वीताखिलभया
विनिन्ये सुप्रीता निजसमयमत्यन्तसुखिता ।। 4 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अपाहरच्चापि सुतं ततः स्वं
स्वेनैव तं चापि नदीं निनाय ।
प्रबोधिता साध्विति वानरीभिः
कृतज्ञतां ताः प्रति धारयन्ती ।। 38 ।।

अत्रान्तरे मुक्तसमाधिकः सन्
यदा ऋषिर्नैव शिशुं ददर्श ।
किं जातमस्येति विचारमूढ-
श्चिन्तामनन्तां स तदा प्रपेदे ।। 39 ।।

कृताभिषेका जनकस्य पुत्री
सुतं न पश्येन्मयि संस्थितं चेत् ।
शोकान्धकारे गहने निमग्ना
किं सा प्रकुर्यादिति को नु वेद ।। 40 ।।

अहो! नु दुर्भाग्यपरम्पराऽस्याः
कष्टात्परं कष्टमियं प्रयाति ।
नैकस्य कष्टस्य हि यावदन्त-
स्तावद् द्वितीयं समुपस्थितं हा! ।। 41 ।।

अयं ध्रुवं घोरतरः प्रहारः
सीतान्तरङ्गं शकलानि कुर्यात् ।
नेमं क्षमा सोढुमियं भवेदि-
त्येवं महर्षिर्हृदि सम्प्रधार्य ।। 42 ।।

एकस्य नूत्नस्य शिशोस्तदानीं
पूर्वाकृतेः सर्गविधौ प्रसक्तः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

परुषाक्षरया वाचा दण्डनीयाविति स्मरन् ।
स तौ निर्भर्त्सयामास मा चापलमिति ब्रुवन् ।। 58 ।।

तस्य निर्भर्त्सनं तावत्तयोर्बालकयोस्तदा ।
क्रोधाग्निं दीपयामास घृतधारेव सन्तता ।। 59 ।।

सिंहनादस्तयोरासीत्सिंहशावकयोरिव ।
गजेन्द्रालोकने तावन्नृपेन्द्रालोकने सति ।। 60 ।।

आस्फालयन् घोरघोषां धनुर्ज्यां मङ्कुटो मुहुः ।
अवसृजंश्च फूत्कारं पदा स्पृष्ट इवोरगः ।। 61 ।।

प्रज्वलत्क्रोधताम्राक्षो बालसूर्य इवापरः ।
ओजस्विनीं तदा तत्र गिरमेवं समाददे ।। 62 ।।

न दोष आवयोरेष यदश्वो भवतामयम् ।
आवाभ्यां निगृहीतोऽत्र वाहितश्च वनान्तरम् ।। 63 ।।

दोषस्तु भवतामेव यल्लेखो दृप्तभावतः ।
अतिसृष्टो भवद्भिर्यं मादृशो विषहेत नो ।। 64 ।।

नहि निःक्षत्रिया राजन्! पृथिवी सचराचरा ।
अहमत्र प्रतीरोधं भवतां कर्तुमुद्यतः ।। 65 ।।

यद्यस्ति शक्तिर्भवतां योद्धव्यं वा मया सह ।
निवर्तितव्यं देशं वा स्वं प्रहीणपराक्रमैः ।। 66 ।।

न मेघगर्जनं सह्यं शरभाणां कथञ्चन ।
युद्धं मे दीयतां राजन्नहं शरभशावकः ।। 67 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सञ्ज्ञाहीनः कपिरभूत् प्रापितो बन्धनं यदा ।
सञ्ज्ञां लब्ध्वा तु सुतरामसकौ समतप्यत ॥38॥

दौर्भाग्यस्य न मे सीमा सर्वेषां पश्यतामहम् ।
बालाभ्यां गमितस्तावद् दयनीयामिमां दशाम् ॥39॥

सुतः प्रभञ्जनस्याहं प्रभञ्जनसमो जवे ।
वज्राङ्गश्च बली चापि बालाभ्यामेव निर्जितः ॥40॥

सामान्यकपिवच्चापि बद्धः शोचामि, नैव च ।
शक्तोऽस्मि प्रतिविधातुं विधातुः शासनादहम् ॥41॥

चञ्चलाभ्यामर्भकाभ्यां दृढं बद्धोऽस्मि रज्जुभिः ।
किं मां भरतशत्रुघ्नौ न मोचयितुमर्हतः ॥42॥

इति दुःखभराक्रान्तहृदयः कपिपुङ्गवः ।
तदा भरतशत्रुघ्नावुपसन्नोऽतिलज्जितः ॥43॥

तौ स सम्प्रार्थयाञ्चक्रे स्वबन्धस्य विमोचनम् ।
न शेकतुश्च तत्रैतौ प्रयत्नं परमास्थितौ ॥44॥

आवां महारथौ नाम कथं छेत्तुं न शक्नुवः ।
रज्जुजालं बालकृतमिति तौ विस्मयं गतौ ॥45॥

तत्प्रयत्नं समालोक्य विफलं कपिपुङ्गवः ।
करुणां च दशां स्वस्य नैराश्यं परमं गतः ॥46॥

किं मयाऽत्र प्रकर्तव्यं वर्तितव्यं कथञ्च वा ।
विपदम्भोधिमग्नस्य तरिः को वा भवेन्मम ॥47॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्युक्त्वा स शरं घोरं रामप्रभुमवासृजत् ।
जाज्वल्यमानः क्रोधेन स चापि प्राहिणोच्छरम् ।। 68 ।।

एतावुभौ शरौ हन्त! लक्ष्यभ्रष्टौ बभूवतुः ।
परस्परेण संश्लिष्य पेततुश्च महीतले ।। 69 ।।

नास्वादितचरं पुत्ररक्तं रामशरेण हि ।
न चैव स्वपितू रक्तं मङ्कुटस्य शरेण वा ।। 70 ।।

न केवलमिदं तावत्तत्र चित्रमिवाभवत् ।
अपरं चापि सुतरां विलक्षणमभूत्तदा ।। 71 ।।

मङ्कुटस्य प्रवीरस्य सायको निशितः क्षणात् ।
परिवृत्तः पुष्पराशौ रामपादावपूजयत् ।। 72 ।।

तद् दृष्ट्वाऽत्यद्भुतं दृश्यं सुतरां रोमहर्षणम् ।
बालस्य विषये ज्ञातुं समैहत रघूत्तमः ।। 73 ।।

तमन्वयुङ्क्त बालं स कस्य त्वमिति मां वद ।
न पृथग्जनवद् भासि सर्वं तेऽस्ति विलक्षणम् ।। 74 ।।

तमूचे मङ्कुटो रामं सीताया अस्म्यहं सुतः ।
वज्रमृगस्याश्रमे पुण्ये निवसामि तया सह ।। 75 ।।

तच्छ्रुत्वा रामभद्रस्य हृदये न ममुर्मुदः ।
असम्भावितसम्प्राप्तिः कस्य मोदाय नो भवेत् ।। 76 ।।

ममैवायं सुत इति तं स द्रुतमुपागमत् ।
प्रहर्षनिर्भरश्चापि समालिङ्गत्पुनः पुनः ।। 77 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुनः पुनर्नैव जगाम तृप्ति-
मुदन्वितः स्वादुतमाऽम्बुनेव ॥ 10 ॥

सङ्क्लिष्टकान्त्यस्ति तु यद्यपीदं
तथापि लावण्यमयी न छाया ।
विमुञ्चतीदं नयनाभिरामं
मोदं मुखं सिञ्चति चान्तरङ्गे ॥ 11 ॥

स स्वं परां ग्लानिमुपेयिवान् सन्
क्षमापयामास विदेहजायाः ।
विगर्हयामास पुनः पुनश्च
मतिभ्रमं स्वं विधिवैपरीत्यात् ॥ 12 ॥

अग्नौ विशुद्धामपि यत्समक्ष-
मदण्डयं चित्रविलोकनेन ।
वध्येति चामंसि विदन्न तथ्यं
तदर्थमत्यन्तविलज्जितोऽस्मि ॥ 13 ॥

तन्मेऽपराधं सुमुखि! क्षमस्व
क्षमाधना त्वं सुतरां क्षमेव ।
लोकेऽत्र को नाम न नापराध्येद्
दोषाः प्रकृत्या प्रकटीभवन्ति ॥ 14 ॥

इत्येवमुक्त्वाऽतितरां विलक्षो
विशन्निवाङ्गानि स लज्जमानः ।
प्रसादनार्थं जनकात्मजायाः
पस्पर्श पादावपराधचण्ड्याः ॥ 15 ॥

CC-0: Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तयोर्विना हा! सुतरामहं स्या-
मेकाकिनी तौ तु ममावलम्बः ।
शून्ये वने यापयितुं कथं स्यां
वृद्धा सती शिष्टमहं स्वमायुः ।। 38 ।।

अन्धं तमो मे सचराचरं स्यात्
कृत्स्नं जगच्छून्यमिवाथ च स्यात् ।
स्वपुत्रवक्त्राम्बुजदर्शनेन
कथञ्चिदेव क्षपयामि कालम् ।। 39 ।।

निःस्वा दरिद्रा च तपस्विनी च
कष्टैरनिष्टैः परिवेष्टिता च ।
जीर्णं ममेदं क्व कुटीरकं च
क्व चैव साकेतविशालसौधाः ।। 40 ।।

माताऽस्मि न स्वार्थवशात्कदाचित्
स्वपुत्रयोर्हानिमहं विधास्ये ।
पुरीमयोध्यां प्रति सम्प्रयातौ
सुशिक्षितौ तौ नियतं भवेताम् ।। 41 ।।

पिता तयो राजकुमारवच्च
सम्पादयेत्सर्वविधं विधानम् ।
तन्मे प्रियं स्यात्सुतरामतस्तौ
विसर्जये तद्धितकाम्ययाऽहम् ।। 42 ।।

पत्युर्वियोगो मयका विसोढ-
श्चिराय, सम्प्रत्यहमाश्रमेऽस्मिन् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

दीर्घं सहिष्ये सुतयोर्वियोगं
सीताऽस्मि सर्वं मम सह्यमेव ।। 43 ।।

एवं विनिश्चित्य सुतौ ततः सा
विसर्जयामास सबाष्पनेत्रा ।
कुटीरकद्वारि च संस्थिता तौ
ददर्श यान्तौ जनकेन साकम् ।। 44 ।।

यावन्न दृष्टेः परतस्तनूजौ
बभूवतुस्तावदसौ ददर्श ।
ततः कुटीरान्तरमाप्रपन्ना
पपात भग्ना कदलीलतेव ।। 45 ।।

(अनुष्टुब्वृत्तम्)

सुतौ तस्या अभवतामवलम्बनमाश्रमे ।
वज्मृगस्य ऋषेस्तावप्यपयातौ विहाय ताम् ।। 46 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

ตรีที่ปรารถนาแต่สิ่งเลอค่าในชีวิต
รน้ำหนึ่ง 2533

Digitized by Arya Samaj Foundation Chennai and eGangotri

ततस्तु मातुः स्मृतिराविरासीद्
या तौ नितान्तं व्यथयाम्बभूव ।
आमन्त्र्य तातं तत आयियासू
स्नेहार्द्रभावां जननीमभूताम् ।।5।।

कुमारयोस्तं सुकुमारयोः स
भावं हृदो नोपरुरोध तातः ।
म्लानोऽपि दुःखेन तयोर्वियोगात्
तदीययात्रामनुमेन एव ।।6।।

सीतां च सन्देशमहारयत्स
तयोर्मुखेनार्भकयोर्नृपेन्द्रः ।
नो चेत्त्वमायासि पुरीमयोध्यां
ममाश्रुजालं मम [1]प्राणहृत्स्यात् ।।7।।

प्राप्तौ कुटीरं जनकात्मजाया
ददर्शतुः क्षामतमाममूं तौ ।
सा चाभ्यनन्दत्सुतदर्शनोत्थां
प्रवाहयन्ती नयनाश्रुधाराम् ।।8।।

पुनः पुनस्तावुपगुह्य सा चा-
ऽप्राक्षीदयोध्यापुरवृत्तजातम् ।
तौ चापि वृत्तं निखिलेन वाग्भि-
स्तामुक्तवन्तौ मधुराक्षराभिः ।।9।।

रामस्य सन्देशमथापि यं स
सम्प्रेषयामास मुखेन ताभ्याम् ।


1. 'हृ प्रे वा' इत्याश्रित्य प्रयोगः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ต่างแบบ เพื่อสไตล์ที่ต่างกัน

ผู้แทนจำหน่าย บริษัท เฟรอนลิงก์ คอสเมติคส์ จำกัด



นิวเวฟ ฮาร์ดลุค แฮร์สเปรย์
เฉี่ยวกว่าใคร
ในสไตล์ไฮ-แฮร์
โฉบชีวิตเส้นผม
ให้คงรูปได้นานเป็นพิเศษ
ให้คุณเท่ได้แน่
เท่ได้นานสมใจ
ในขนาด 150 มล.

เพราะ

ไม่ได้

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

आकर्ण्य यद् वज्रसमं बभूव
सीता क्षणार्धेन विनष्टसञ्ज्ञा ।। 21 ।।

अयो घनीभूतमिवास्त यस्या-
श्चित्तं भृशं दुःखपरम्पराभिः ।
विदेहजाया हृदयं तदेव
वृत्तादमुष्माद् द्रवितं बभूव ।। 22 ।।

कष्टान्यनिष्टानि सहेत नारी
बहूनि लोके बहुदुःखदानि ।
वैधव्यदुःखं न कदाचिदेव
सहेत साऽसह्यतमं तदस्ति ।। 23 ।।

सुदुःखिता वज्रसमप्रहारात्
पुरीमयोध्यां प्रति सा प्रतस्थे ।
हनूमता साकमकालहीनं
प्राप्ताऽभवच्चापि नृपेन्द्रसद्म ।। 24 ।।

प्राप्ता च तत्सा विललाप धीरा-
ऽप्यधीरवद् बाष्पमवासृजन्ती ।
कुत्रासि मे नेत्ररसायन! त्वं
कुतो न मां त्वं सह नीतवांश्च ? ।। 25 ।।

त्वं जीवने मह्यमदा वियोगं
वर्षाणि नाना नयनाभिराम ।
न मृत्युकालेऽपि समागते ते
सङ्गो मया सार्धमभीप्सितोऽभूत् ।। 26 ।।

CC-0. Prof. Satya Vrat Shastri Collection.

206